शासनसम्राट्-शताब्दीग्रन्थमाला - पुष्पम्-५

# स्तोत्रग्रन्थसमुच्चयः

स्तुतिकल्पलता - प्रवर्तकश्रीयशोविजयः
नूतनस्तोत्रसङ्ग्रहः - पं. श्रीप्रतापविजयगणिः
स्तोत्रभानुः - श्रीविजयनन्दनसूरिः
स्तोत्रचिन्तामणिः - श्रीविजयपद्मसूरिः
प्राकृतस्तोत्रप्रकाशः - श्रीविजयपद्मसूरिः
एभिर्विरचितः प्रकीर्णरचनासन्दोहश्च

प्रकाशनम्
**श्रीजैनग्रन्थप्रकाशनसमितिः, खम्भात**

ई.स. २०१३ वि.सं. २०७०

**स्तोत्रग्रन्थसमुच्चयः**
(संस्कृत-प्राकृतस्तोत्रसङ्ग्रहः)

संकलनम् - मुनित्रैलोक्यमण्डनविजयः

प्रकाशनम् - श्रीजैनग्रन्थप्रकाशनसमितिः, खम्भात

आवृत्तिः - प्रथमा, वि.सं. २०७०, मार्गशीर्षशुक्ला षष्ठी

पृष्ठानि - १२+३६८

प्रतयः - २५०

मूल्यम् - ₹ ४००/-

प्राप्तिस्थानम् - (१) **आ. श्रीविजयनेमिसूरि जैन स्वाध्यायमन्दिर**
१२, भगतबाग, जैननगर, नवा शारदामन्दिर रोड,
आणंदजी कल्याणजी पेढीनी बाजुमां,
अमदावाद-३८०००७
फोन : ०७९ - २६६२२४६५

(२) **सरस्वती पुस्तकभण्डार**
११२, हाथीखाना, रतनपोल,
अमदावाद-३८०००१
फोन : ०७९ - २५३५६६९२

मुद्रणम् - **क्रिष्णा ग्राफिक्स**
९६६, नारणपुरा गाँव, नारणपुरा, अमदावाद-१३
फोन : ०७९-२७४९४३९३

**श्रुतभक्ति**

**આ ગ્રંથના પ્રકાશનનો સંપૂર્ણ લાભ શ્રીમાટુંગા જૈન શ્વે. મૂ. પૂ. સંઘ - શ્રીવાસુપૂજ્યસ્વામી જૈન દેરાસરની પેઢી, આંબેડકર રોડ, કિંગ્ઝ સર્કલ, માટુંગાએ પોતાના જ્ઞાનખાતામાંથી લીધો છે. શ્રીસંઘની શ્રુતભક્તિની હાર્દિક અનુમોદના.**

# ઉત્તમ મુનિજનોની ઉત્તમ રચનાઓનો સંગ્રહ : પ્રભુ-ગુરુભક્તિનું સુંદર આલંબન

જ્ઞાન એ સાધુતાનો માપદંડ છે.

વિવેક અને ગંભીરતા એ ગીતાર્થતાનો માપદંડ છે.

કોઈ પણ ગચ્છ અથવા સંઘાડામાં આ બધાં તત્ત્વો કેવાં અને કેટલાં-કેટલી માત્રામાં છે તે જોવાની-સમજવાની દૃષ્ટિ પણ કોઈક પંડિતજન પાસે જ સંભવે છે. બાળ જીવોના ગાડરિયા પ્રવાહને આકર્ષી શકવાની લોકપ્રિયતા થકી આ બાબતનો નિશ્ચય થઈ શકે નહિ. અને છતાં તેવા વાતાવરણને આધારે જ જો આવો નિશ્ચય થાય તો તેવા જીવોને પણ 'બાળ જીવો' જ ગણવાના રહે.

બીજી વાત : જે સમયે જ્ઞાનાભ્યાસ વિરલ બન્યો હોય, સંસ્કૃત-પ્રાકૃતનું તેમજ શાસ્ત્રોનું અધ્યયન મુશ્કેલ બની ગયું હોય, તેવા મોંઘા કાળમાં તે બધા અધ્યયનનો નાદ ગાજતો કરવો, સ્વયં અધ્યયન કરવું અને અધ્યયન કરનારા દિગ્ગજ સાધુઓને તૈયાર કરવા, અને તેમના દ્વારા ગ્રંથસર્જન તેમજ શ્રુતોપાસના કરાવવી, એ પણ એક પડકારરૂપ અને મહત્ત્વપૂર્ણ શાસનપ્રભાવના છે. અધ્યયનનો પ્રવાહ વ્યાપક બનીને વહેવા માંડ્યો હોય અને પછી અભ્યાસીઓ તૈયાર થાય તે સારું જરૂર ગણાય, પરંતુ મહિમા તો જ્યારે બધું સાવ ખાડે ગયું હોય ત્યારે તેનું પુનરુત્થાન કરવું તેનો જ ગવાય.

શાસનસમ્રાટ શ્રીવિજયનેમિસૂરીશ્વરજી મહારાજ અને તેમના શિષ્યસમુદાય માટે ઉપરના બન્ને મુદ્દા યથાર્થપણે લાગુ પડે છે.

જે કાળે જ્ઞાનાધ્યયન દોહ્યલું અને વિરલ બની રહ્યું હતું, તેવા કાળમાં તેઓ સ્વયં, પોતાના ગુરુદેવ શ્રીવૃદ્ધિચંદ્રજી મ.ની ભાવનાને પ્રમાણીને ભણ્યા, મહાવિદ્વાન બન્યા, શાસ્ત્રોપાસક તેમજ શાસ્ત્રસર્જક બન્યા; તો પોતાને સાંપડેલા અનેક શિષ્યોને તેમણે વિવિધ વિષયોના મહાપંડિત બનાવ્યા. તેમણે પોતે તેઓને ભણાવ્યા; પંડિતજનો પાસે પણ ભણાવ્યા; અને સ્વતંત્ર પ્રતિભાના સ્વામી બનાવી તેઓને શાસનના શરણે સમર્પ્યા.

આ શિષ્યોમાં તેમણે વિવેક રેડ્યો. ગંભીરતા પણ સિંચી. જ્ઞાન તો આપેલું જ. ફલતઃ આ શિષ્યોની ગીતાર્થતા વિવેકપૂત બની રહી. વાચાળતા કે આડંબરથી તથા દંભથી કે અપવાદમાર્ગના અયોગ્ય અને અનાવશ્યક સેવનથી ભરેલી ગીતાર્થતા એમનામાં ન પાંગરી. એમના શિષ્યોએ ક્યારે પણ ''અમે ગીતાર્થ છીએ, ગીતાર્થને બધી છૂટ હોય છે'' એવાં દીન-હીન વેણ ઉચ્ચારવાની જરૂર નહોતી પડી. એમનો વિવેક જ એમને યોગ્ય પ્રસંગે યોગ્ય માર્ગ લેવાનું માર્ગદર્શન આપતો રહેતો. એને કારણે શાસનમાં કે સંઘમાં, તેમના દ્વારા લેવાતા માર્ગને કારણે, વ્યામોહ કે અવહેલનાનું વાતાવરણ કદાપિ પેદા થવા ન પામતું. એમના હાથે શાસનનો ઉદ્ધાર થાય અને લોકો ધર્મથી વિમુખ કે વિપરીત થાય તેવું ન બનતું.

દંભને કારણે અપવાદમાર્ગનું સેવન કરવા જેવી પરિસ્થિતિ પેદા થતી હોય છે, અને અપવાદમાર્ગનું સતત અને નિયમિત સેવન સ્વચ્છંદતાના દરવાજા ખોલી આપે છે, એવું અન્યત્ર જોવા મળી રહ્યું છે.

દાયકાઓ અગાઉ થઈ ગયેલો, શાસનસમ્રાટશ્રીના હાથે તૈયાર થયેલો શિષ્યગણ આ બધાંથી જોજનો વેગળો રહ્યો છે, રહી શક્યો છે, તેની પાછળ વિવેક, ગાંભીર્ય, શાસનસમર્પણ અને જ્ઞાન - એ ૪ વાનાં જ અગત્યનો ભાગ ભજવી ગયાં છે.

આ શિષ્યોની ગીતાર્થતા, સંઘ-શાસનમાં જાગતા પ્રશ્નો-સમસ્યાઓ અને સંઘર્ષોને શમાવવામાં ખપ લાગતી. તેમનું જ્ઞાન અને વિવેક ઇતરોને જિનમાર્ગ અને તેના સાધુ પ્રત્યે સદ્ભાવ જન્માવનારા બનતા.

આવા, ઉત્તમ અને સુયોગ્ય મુનિજનો દ્વારા રચાયેલાં, સંસ્કૃત-પ્રાકૃત ભાષાનિબદ્ધ સ્તુતિકાવ્યોનો આ ગ્રંથમાં સંગ્રહ કરવામાં આવ્યો છે. જ્ઞાની અને વિવેકશીલ આત્માઓએ રચેલી સ્તુતિઓ પણ કેવી સોહામણી અને હૃદયંગમ બને છે તેનો અંદાજ આ ગ્રંથમાંથી પસાર થનારાને અવશ્ય આવશે.

*

શાસનસમ્રાટશ્રીના અનેક શિષ્યો વિદ્વાન હતા અને તેમણે ગ્રંથોની રચના કરી હતી. તેમાં વિજયદર્શનસૂરિ, વિજયોદયસૂરિ, વિજયઅમૃતસૂરિ, વિજયલાવણ્યસૂરિ, વિજયકસ્તૂરસૂરિ વગેરે તેમજ તે બધાયના કેટલાક ઉત્તમ વિદ્વાન શિષ્યોનો પણ સમાવેશ થાય છે.

તે વિશાળ વિદ્વત્સમુદાય પૈકી ચાર મુનિવરોની સ્તોત્રરચનાઓ પૂર્વે સ્વતંત્ર ગ્રંથરૂપે પ્રગટ થયેલ છે, તે તમામનું સંકલન અહીં, આ એક પુસ્તકરૂપે થયું છે. તે ચાર મુનિજનોનો પરિચય આ પ્રમાણે છે :-

**૧. પ્રવર્તક શ્રીયશોવિજયજી**

આ મુનિરાજ મૂળે પાટણના હતા. અજૈન, ઘણા ભાગે ભરવાડ જ્ઞાતિના હતા. પણ બચપણમાં જ તેઓ અનાથ-માબાપવિહોણાં હતા. અમદાવાદમાં તેઓ આમતેમ ભટકતા હતા, તેમાં એક પીઢ શ્રાવકની નજરે ચડી ગયા. શ્રાવકને બાળકનો માસૂમ ચહેરો જોઈ સહાનુભૂતિ થતાં ઘેર લઈ ગયા. બે-ચાર દહાડા પછી તેઓ તેને શેઠ જેશીંગભાઈ હઠીસિંહના બંગલે મૂકવા નીકળ્યા. માર્ગમાં પાંજરાપોળ આવતાં ઉપાશ્રયે મહારાજજીને વાંદવા ગયા. મહારાજજીએ તેના વિષે પૃચ્છા કરી. તે બાળકને મહારાજજીને જોતાં જ બહુ સારું લાગવા માંડ્યું, અને તેણે ત્યાં જ રાખવાની માગણી કરી. મહારાજજીની સંમતિથી તે ત્યાં રહ્યો. તે વખતે ચાલતી જંગમ પાઠશાળાના વિદ્યાર્થીઓ સાથે તે પણ રહ્યો.

સં. ૧૯૫૭ની આ વાત. ચોમાસા દરમ્યાન છોકરો ઘણો પળોટાઈ ગયો. ચોમાસું પતતાં તે કહે કે ''મને દીક્ષા આપો, મારે તમારી સાથે રહેવું છે''. પણ એમ કેમ દીક્ષા અપાય ? એમ કરતાં એક વૃદ્ધ ગૃહસ્થને દીક્ષા આપવાનો પ્રસંગ આવ્યો. પેલો કહે કે ''હું પહેલાં આવ્યો છું, મને ના પાડો છો, અને આમને હા પાડો છો ? ના, પહેલાં મને આપો ને આપો''.

હવે તેને હજી નવકાર-પંચિંદિય પણ મોઢે ચડતાં ન હતાં, ત્યાં દીક્ષા કેમ આપવી ? વળી બાળક હતો. બાળદીક્ષા માટે લોકોમાં પૂરતી સહાનુભૂતિ પણ નહોતી. છેવટે તેની જીદ અને જીવદળની ઉત્તમતાનો વિચાર કરીને મહારાજજીએ શ્રીઆનંદસાગર મ. (સાગરજી મ.) તથા સુમતિવિજયજીને કાસીંદ્રા મોકલી ત્યાં તેને દીક્ષા અપાવી. પાછા આવ્યા પછી મહારાજજીએ તેમના મસ્તક પર હાથ મૂકીને એવા આશીર્વાદ આપ્યા કે જેને નવકારનો પણ વાંધો હતો તે બાળક, ૯ વર્ષની વયે જ, રોજની સો ને બસો ગાથા કંઠસ્થ કરતા થઈ ગયા.

બચપણમાં જ તેમણે ૧૮ હજારી કંઠે કરી હતી. સંસ્કૃત ભાષાના, વ્યાકરણ-છંદ-અલંકાર-સાહિત્યના તે પ્રકાંડ પંડિત થયા હતા.

ખરતરગચ્છના જિનકૃપાચંદ્રસૂરિજી સાથે એક પંડિત હતા, જે સંસ્કૃતમાં શ્લોકબદ્ધ વાર્તાલાપ કરતા. તેમને જોઈને બાળ યશોવિજયજીએ પણ પરિશ્રમ કર્યો, અને શ્લોકબદ્ધ વાર્તાલાપ કરતા થઈ ગયા.

મહારાજજીને તેમના પર અનહદ વહાલ હતું. તેઓ તેજસ્વી, રૂપવંત અને જબ્બર વિદ્વાન હતા.

પણ કુદરત આવી વ્યક્તિને બહુ સાંખી શકતી નથી હોતી. તેમને નાની ઉંમરમાં જ રાજરોગ ગણાતો ક્ષયરોગ લાગુ પડી ગયો, જે તેમના માટે જીવલેણ નીવડ્યો.

મહારાજજીએ તેમને મોટા યોગોદ્વહનની અશક્તિ જાણીને 'પ્રવર્તક' પદ આપેલું. પણ માંદગીને કારણે ખેડાના વૈદ્યની દવા લેવાની હોઈને તેઓ થોડાક સાધુ સાથે ખેડા સ્થિરવાસી થયેલા. પણ તે ગાળામાં પણ તેમણે ત્યાંના બહુશ્રુત વૈદ્યરાજ સાથે બેસીને આયુર્વેદના મહાગ્રંથોનો અભ્યાસ કર્યો, અને નિદાનવિદ્યા તથા ઔષધસેવન, પથ્યપાલનનાં રહસ્યો શીખી લીધાં. તે અરસામાં તેમની સ્તોત્રાદિ રચનાઓ નિરંતર ચાલુ જ રહી. વળી, ખેડાના ફોજદાર બ્રાહ્મણ હતા અને વેદ-વેદાંતના પ્રખર અભ્યાસી હતા. તેઓ મુનિશ્રીના સંપર્કમાં આવ્યા, અને બન્ને વચ્ચે નિત્ય સત્સંગ-સ્વાધ્યાય શરૂ થઈ ગયો. તે દરમ્યાન, યશોવિજયજીએ આખી ભગવદ્ગીતાનું અર્થઘટન, ઋષભદેવ ભગવાન ભરત ચક્રવર્તીને ઉપદેશ આપતા હોય તે રીતે કર્યું, અને ફોજદારને ચકિત-પ્રભાવિત કરી મૂક્યા હતા.

સં. ૧૯૭૦ માં તેમની તબિયતે ગંભીર વળાંક લીધો, અને જીવનની આશા ઘટવા લાગી. તેમને એક ઝંખના જાગી : મારે એકવાર ગુરુભગવંતનાં દર્શન કરવાં છે.

મહારાજજી અમદાવાદ હતા. ખબર મળતાં જ તેમણે વિહાર આદર્યો, અને એક જ વિહારમાં બપોરે ૧૮ માઈલ કાપ્યા. ખેડા ખબર પહોંચાડી દીધા કે પોતે આવી રહ્યા છે. તે વાતે મુનિશ્રીને પરમ સંતોષ થયો.

પણ એ જ દિવસે અચાનક સ્વાસ્થ્ય કથળ્યું. બધાના અચંબા વચ્ચે તેઓ બેઠા થયા, ટટાર બેસીને તેમણે પં. પ્રતાપવિજયજીને કહ્યું કે ''મને મહાવ્રત ઉચ્ચરાવો.'' પંન્યાસજીએ તત્ક્ષણ વ્રતોચ્ચારણ શરૂ કર્યું. જરાક ધીમું ચાલ્યું, તો મુનિવર કહે, ''ઝડપ કરો, હવે સમય નથી.'' અને ઝડપ વધારી. વ્રતના એકેએક આલાવા સાંભળતાં સાંભળતાં મુનિવરે પોતે તેના અર્થ કહ્યા, અને એ પૂર્ણ થતાં જ તેમણે 'અરિહંત' એવા ઉચ્ચારણ સાથે દેહ તજી દીધો. તે વખતે તેમની ઉંમર ૨૨ વર્ષની હતી.

તેમણે રચેલ અને તે વખતે પ્રકાશિત स्तुतिकल्पलता નામે ગ્રંથ આ ગ્રંથમાં સામેલ થયો છે. તેમની કેટલીક અન્યત્ર પ્રગટ રચનાઓ પણ આમાં મૂકેલ છે. વિ.સં. ૨૦૭૦નું વર્ષ તેમની સ્વર્ગારોહણ-શતાબ્દીનું વર્ષ છે. એ જ વર્ષે તેમનાં સ્તોત્રોનું પુનઃપ્રકાશન થાય છે તે એક સુખદ યોગાનુયોગ છે.

પં. શશિનાથ ઝાના તેઓ માનીતા વિદ્યાર્થી હતા. એકવાર તેમને કોઈ પાઠ ન આવડતાં રોષે ભરાયેલા શાસ્ત્રીજીએ તેમને લાકડી ફટકારી. આડો હાથ ધરવા જતાં આંગળી પર પ્રહાર થયો અને હાડકું તૂટ્યું. બાળ સાધુ હતા પોતે; રડી પડ્યા. શાસ્ત્રીજી ગભરાયા કે હવે મારું આવી બન્યું !

થોડી જ વારમાં મહારાજજીનું તેડું આવ્યું. ગભરાતાં ગભરાતાં શાસ્ત્રીજી ગયા. મહારાજજીએ કારણ પૂછ્યું, જાણ્યું કે બાળ સાધુને પાઠ ન આવડ્યો તેથી સજા કરવા જતાં આમ થઈ ગયું. મહારાજજીએ પાસે બેઠેલા શ્રાવકને આદેશ કર્યો કે શાસ્ત્રીજીને ૯૫/- આપો છો, તેમાં ૧૦/- નો વધારો કરી આપો. બધા, શાસ્ત્રીજી પણ, ડઘાઈ ગયા. ઠપકાની જગ્યાએ પગારવધારો ? મહારાજજીએ કહ્યું કે મારી પણ શેહ રાખ્યા વગર પોતાના પુત્રની જેમ સાધુને ભણાવનારા આવા શાસ્ત્રીને ઠપકો ન હોય, ઈનામ જ હોય !

આ યશોવિજયજીએ એકાક્ષર, દ્વયક્ષર, યમક, વિવિધ ચિત્રબંધ, છંદોબદ્ધ જે કાવ્યસૃષ્ટિ રચી છે તે ભલભલાના માન મૂકાવે તેવી છે. અત્યારના કોઈ કોઈ સાધુઓ આ પ્રકારનું એકાદું નાનું કાવ્ય બનાવીને જાહેર કરે છે કે સેંકડો વર્ષો પછી આવી રચના કરનારા અમે પ્રથમ છીએ! એ વાંચ્યું ત્યારે તરત યશોવિજયજી અને તેમની રચનાઓ યાદ આવેલ. વીસમા સૈકામાં આવી અદ્ભુત પ્રતિભા થઈ જ છે, પણ કૂપમંડૂકતાને કારણે બાલિશ જીવો આપવડાઈ કરતાં રહે છે, ભલે કરતાં રહે.

*

**૨. પં. શ્રીપ્રતાપવિજયજી ગણિ**

આ મુનિરાજનો પરિચય આપતી કોઈ વિગત સચવાઈ નથી; ઉપલબ્ધ નથી. સં. ૧૯૬૯માં કપડવંજમાં તેમને ગણિપદ તથા પંન્યાસપદ અપાયાનો ઉલ્લેખ મળે છે. તેઓ શાસનસમ્રાટના પોતાના શિષ્ય હતા. પોતે સંસ્કૃત-પ્રાકૃતના પ્રખર જ્ઞાતા હતા, અને મહારાજજીના વિશ્વાસભાજન હતા, તેવું જાણી શકાય છે.

તેમણે રચેલો નૂતનસ્તોત્રસંગ્રહ પ્રકાશિત છે, તેની જ પુનરાવૃત્તિ આ ગ્રંથમાં થઈ રહી છે. તેમણે 'પ્રાકૃતરૂપમાલા' નામક પુસ્તક પણ રચ્યું હતું, જે પણ પ્રકાશિત થયેલું. ઉપરાંત તેમણે 'પ્રાકૃતશબ્દરૂપકોશ'ની રચના માટે ૮૦૦-૧૦૦૦ પૃષ્ઠનું ૧ એવાં ૭ વોલ્યુમો તૈયાર કરેલાં, જેમાં પાને પાને પ્રાકૃત શબ્દો તેમણે નોંધ્યા છે, અને તેનાં રૂપોનાં સ્થાન કોરાં રાખેલ છે.

તેઓની દીક્ષા સં. ૧૯૬૦ થી ૬૨ના ગાળામાં થઈ હોવાનો સંભવ છે.

એક વીસરાવા માંડેલા જ્ઞાની મુનિની રચનાઓનો અહીં પુનરુદ્ધાર થાય છે તેનો ઘણો આનંદ થાય છે.

*

**૩. આ. શ્રીવિજયનન્દનસૂરિજી મ.**

બોટાદના વતની શાહ હેમચંદ શામજીના પુત્ર. નરોત્તમભાઈ નામ. સં. ૧૯૭૦માં ૧૪ વર્ષની વયે દીક્ષા લીધી - ઘરેથી ભાગીને. વળાદ મુકામે દીક્ષા અને શ્રીઉદયવિજયજીના શિષ્ય થયા.

દીક્ષાના ત્રીજા જ વર્ષે તેમણે સંસ્કૃત સ્તુતિકાવ્યોની રચના કરી, તે સ્તોત્રભાનુ ના નામે પ્રકાશિત થયાં. તેમનો અહીં સમાવેશ થયો છે.

સં. ૧૯૮૩માં, રાજનગરના નગરશેઠ કસ્તૂરભાઈ મણિભાઈના આગ્રહથી તેમને આચાર્યપદ મળેલું. ન્યાય, સિદ્ધાંત અને જ્યોતિષ-શિલ્પના પ્રકાંડ વિદ્વાન પંડિત. છ દર્શનોના પ્રખર અભ્યાસી.

તેમણે સોળ જેટલા ગ્રંથો રચ્યા છે. અસંખ્ય મુહૂર્તો શાસનનાં કાર્યો માટે આપ્યાં છે. તેમના આપેલા મુહૂર્તે થયેલાં શુભ કાર્યો શ્રીકાર થતાં.

શાસનસમ્રાટશ્રીના તેઓ અપૂર્વ કૃપાપાત્ર હતા. તેમની દૃષ્ટિસંપન્ન પ્રતિભાની તુલના જાણકારો શાસનસમ્રાટશ્રી સાથે કરતા.

સં. ૨૦૩૨માં તગડી મુકામે તેઓ કાળધર્મ પામ્યા હતા.

દીક્ષાના ત્રીજા વર્ષે થયેલી રચનાઓમાં, પ્રૌઢિની અપેક્ષા રાખી ન શકાય. પણ તેમણે ૧૯૯૩માં એક જ રાત્રિમાં રચેલું, ૩૨ શ્લોકપ્રમાણ કદમ્બગિરિસ્તોત્ર જોઈશું, તો કાવ્ય કેવું હોય, કાવ્યમાં પ્રસાદ, ઓજ અને માધુર્યનાં તત્ત્વો કેવાં હોય, તેનો વિશદ અંદાજ મળી શકે છે. આ ગ્રંથમાં તેનો પણ સમાવેશ થયો છે.

*

**૪. આ. શ્રીવિજયપદ્મસૂરિજી મ.**

શાસનસમ્રાટશ્રીના સીધા પટ્ટશિષ્યો પૈકી ત્રીજા ક્રમે આવતા આ આચાર્ય મૂળે અમદાવાદ-ટેમલાની પોળના રહીશ હતા. કિશોરઅવસ્થામાં જ તેમણે દીક્ષા લીધી હતી. તેઓ પ્રાકૃત ભાષાના વિશેષજ્ઞ હતા. પ્રાકૃતમાં તેમજ સંસ્કૃતમાં તેમણે અઢળક સ્તોત્રરચનાઓ કરી છે. તેમાં અજિતશાન્તિસ્તવની અનુકૃતિરૂપ સિદ્ધચક્રસ્તોત્ર તો તેમની અદ્‌ભુત કહી શકાય તેવી રચના છે.

તેમણે ગુજરાતી કાવ્યબદ્ધ ઉપદેશાત્મક ગ્રંથો ઘણા રચ્યા છે. ૪૫ આગમોના સારદોહનરૂપ ગ્રંથ 'પ્રવચન-કિરણાવલી' તો આજે આખાયે સંઘમાં ખૂબ મહત્ત્વનો તથા ઉપકારક બની ગયો છે. ૨૪ પરમાત્માની

દેશનાને વર્ણવતા ૨૪ ગ્રંથો તેમણે રચવા ધારેલા, તેમાં ૧ થી ૬ ભાગોમાં છ પ્રભુની દેશના વર્ણવતા 'દેશનાચિંતામણિ' નામે ગ્રંથની રચના પણ તેમણે કરી હતી. શ્રમણધર્મજાગરિકા, શ્રાવકધર્મજાગરિકા, સંવેગમાળા, સિંદૂરપ્રકર, કર્પૂરપ્રકર વગેરેનાં પદ્યાનુવાદયુક્ત વિવરણો ઇત્યાદિ અનેક શાસ્ત્રાધારિત રચનાઓ તેમના નામે છે.

શરીરની અસ્વસ્થતાને કારણે તેમના જીવનનો મોટો ભાગ અમદાવાદમાં સ્થિરવાસમાં જ વીત્યો. શિષ્યગણ હતો, પણ તે વહેલો અસ્ત થયેલો.

પાંજરાપોળની જ્ઞાનશાળામાં કબાટો ભરીને ગ્રંથો હતા, તે લગભગ તમામ - હજારો ગ્રંથો - તેમણે વાંચેલા. સ્વાધ્યાય એ તેમનો પ્રધાન જીવનરસ હતો. શાસ્ત્રના અનેક કઠિન પદાર્થો અને રહસ્યો તેઓ અત્યંત વિશદતાથી સમજાવતા.

સં. ૨૦૨૮માં તેઓ કાળધર્મ પામ્યા હતા. તેઓએ રચેલા બે સ્તોત્રગ્રંથો स्तोत्रचिन्तामणि તથા प्राकृतस्तोत्रप्रकाश આ ગ્રંથમાં સમાવવામાં આવ્યા છે.

તેઓ નિજાનંદી પુરુષ હતા. રાત્રે તેમને મોજ ચડે અને રચનાઓ સ્ફુરે. ત્યારે અંધારામાં તેઓ કાગળો તથા પેન્સિલો લઈને બેસતા. જેમ જેમ સ્ફુરણા થતી જાય તેમ તેમ આડાઅવળા અક્ષરો પાડી દેતા. ક્યારેક કાગળ ન જડે તો પાસેની દીવાલ ઉપર શ્લોકો લખી દેતા. સવારે વ્યવસ્થિત ઉતારો કરી તે બધા પર રબર ફેરવી દેતા.

૧૯૯૦ના મુનિસંમેલન પછી શ્રમણસંઘ દ્વારા પ્રકાશિત થતાં સામયિક ''જૈન સત્યપ્રકાશ''ના અનેક અંકોમાં ઉઘડતા પાને તેઓની પ્રાકૃત રચનાઓ પ્રગટ થતી. તે પણ આમાં સમાવાઈ છે.

*

શાસનસમ્રાટશ્રીની સૂરિપદશતાબ્દી સં. ૨૦૬૪માં આવી, ઉજવી, ત્યારે તેઓએ તથા તેમના શિષ્યગણે રચેલા, હાલમાં અજાણ્યા તથા અલભ્ય બનેલા, વિવિધ ગ્રંથોનું પ્રકાશન કરવું એવો નિર્ધાર થયેલો. તે માટે ''શાસનસમ્રાટ્ શતાબ્દી ગ્રંથમાળા''નો પ્રારંભ પણ કરેલો, અને તેના ઉપક્રમે સૂરિસમ્રાટશ્રી-વિરચિત ગ્રંથો ૧. सप्तभङ्गीप्रभा, ૨. न्यायसिन्धुः તથા ૩. વિજયોદયસૂરિકૃત, तर्कभाषा ગ્રંથ ઉપરની रत्नप्रभा ટીકા, ૪. વિજયદર્શનસૂરિ-વિરચિત पर्युषणपर्वकल्पलता-कल्पप्रभा એમ ચારેક પુસ્તકોનું સંપાદન-પ્રકાશન થયું છે. તે જ શ્રેણિમાં આ પાંચમા ગ્રંથ स्तोत्रसंग्रहसमुच्चयનું અને તેના માધ્યમથી ચાર ભગવંતોની પાંચેક ગ્રંથકૃતિઓનું પ્રકાશન થઈ રહ્યું છે, તે અમારા સમગ્ર સમુદાય માટે આનંદદાયક ઘટના છે.

શાસનસમ્રાટશ્રીની આચાર્યપદ-શતાબ્દીના અવસરે જ નિર્ધારિત ઉજવણીના ભાગરૂપે, અમદાવાદમાં શેઠ હઠીસિંહની વાડીમાં એક ભવ્ય ભવન બનાવવાનો ઉપક્રમ રચાયો. દાતાઓએ જમીન તેમજ ધનનું દાન કર્યું. પૂજ્યપાદ તેજોમૂર્તિ ગુરુમહારાજ આચાર્યશ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મહારાજની ભાવના, પ્રેરણા તેમજ માર્ગદર્શન અનુસાર તે ભવન સાકાર થઈ રહ્યું છે, અને ''શાસનસમ્રાટ્ ભવન''ના નામે તેનું ૨૦૭૦ના માગસર સુદિ ૬ તા. ૮-૧૨-૨૦૧૩ના શુભ દિવસે ઉદ્ઘાટન થઈ રહ્યું છે, ત્યારે તે પ્રસંગને અનુલક્ષીને આ ગ્રંથ તૈયાર થઈ રહ્યો છે, તે ઘણા જ હર્ષની બીના છે.

આ તમામ સ્તોત્રોનાં વાંચન, સંમાર્જન, સંપાદન અને સંકલનનું શ્રમસાધ્ય કાર્ય મુનિ શ્રીત્રૈલોક્યમંડનવિજયજીએ કર્યું છે તે માટે તેમની અનુમોદના છે.

આ ગ્રંથના પ્રકાશનનો લાભ માટુંગાના શ્રી જૈન શ્વે. મૂ. પૂ. સંઘે પોતાના જ્ઞાનદ્રવ્ય દ્વારા લીધો છે, તેમને પણ અભિનંદન ઘટે છે.

સાબરમતી, **— શીલચન્દ્રવિજય**

સં. ૨૦૭૦ કાર્તિક શુદિ ૮

# कथयति सङ्कलनकारः किञ्चित्

समस्ति वार्तेयं गतवर्षस्य ज्येष्ठमासस्य । वयं गुरुचरणानां निश्रायां विहरन्त आस्म । तदा राजनगरे 'शेठ हठीभाईनी वाडी'-परिसरे निर्मीयमाणस्य शासनसम्राट्-भवनस्योद्घाटनसमारोहस्य विषये चर्चा प्रचलति स्म । तदा गुरुभगवद्भिः प्रेरणा कृता - "अस्मिन्नुत्सवे परमगुरोः सम्बन्धिनः कस्यचिद् ग्रन्थस्याऽपि प्रकाशनं भवतु । तेनोत्सवस्य शोभा वर्धिष्यते" इति । प्रस्तावोऽयमतीव रोचकः । समयोऽपि पर्याप्त एव । परं ममाऽल्पीयसीं क्षमतां कार्यकाले दीर्घसूत्रित्वं च पश्यतो मम कार्यं दुःशकमेव प्रत्यभात् । तथापि "येन प्रेरणा कृता, मयि च विश्वासो निहितः, स एव कृपालुः कार्यं कारयिष्यतीति किं मम निमित्तमात्रभूतस्य चिन्तये"ति विमृश्य मया सा प्रेरणाऽऽज्ञेव सादरीकृता । अस्याः फलमेव विलसति भवतां करकमले ।

ग्रन्थेऽस्मिन् प्रवर्तक-मुनिश्रीयशोविजयः, पंन्यास-श्रीप्रतापविजयगणिः, श्रीविजयनन्दनसूरिः, श्रीविजयपद्मसूरिश्चेत्येतेषां चतुर्णां महापुरुषाणामुपलब्धानि सर्वाण्यपि प्रकाशितानि संस्कृत-प्राकृतस्तोत्राणि सङ्कलितानि । (प्रवर्तक-श्रीयशोविजयमुनिवरस्याऽप्रकाशितानि कानिचिदद्भुतानि स्तोत्राणीदमिदानीमेवोपलब्धानि । परं समयाभावात् तान्यत्र योजयितुं न शक्तम् । तानि स्तोत्राणि तस्य मुनिवरस्य स्वर्गारोहणशताब्दरूपेऽस्मिन्नेव वर्षे पृथग्ग्रन्थरूपेण प्रकाशयितुं भावनाऽस्ति ।) स्तोत्रग्रन्थसमुच्चयोऽयं षट्सु विभागेषु प्रविभक्तः, क्रमशः - १. प्रवर्तक-मुनिश्रीयशोविजयविरचिता स्तुतिकल्पलता २. पं. श्रीप्रतापविजयगणिसन्दृब्धो नूतनस्तोत्रसङ्ग्रहः ३. श्रीविजयनन्दनसूरिप्रणीतः स्तोत्रभानुः ४.-५. श्रीविजयपद्मसूरिकृतौ स्तोत्रचिन्तामणि-प्राकृतस्तोत्रप्रकाशौ ६. तेषामेव चतुर्णां विदुषां विभिन्नस्थलेषु प्रकटितानि स्तोत्राणि समावेशयन् प्रकीर्णरचनासन्दोहश्च । आद्यविभागपञ्चकरूपेण समाविष्टेषु पञ्चसु ग्रन्थेषु सर्वाण्यपि स्तोत्राणि यथावदेव मुद्रितानि । केवलं नूतनस्तोत्रसङ्ग्रह-स्तोत्रचिन्तामणि-प्राकृतस्तोत्रप्रकाशेषु कञ्चनाऽऽनुपूर्वीविशेषं मनसि निधाय स्तोत्राणां क्रमपरिवर्तनं विहितम् ।

समुच्चयोऽयं ग्रन्थषट्कं, तदङ्गभूतानि शताधिकानि स्तोत्राणि, तन्नाम सहस्राधिकान् श्लोकान् स्वस्मिन् समावेशयति । एतावन्महाकायस्याऽस्याऽऽमूलचूलं काव्यशास्त्रीयपरीक्षणं नेयं तन्वी भूमिका कर्तुं शक्नोति । न चाऽस्या लेखकस्य तादृशी क्षमताऽपि । इह तु केवलमेतेषां स्तोत्राणां पठनेन य आह्लादोऽनुभूतस्तमेव सहृदयेभ्यो वितरीतुमुपक्रम्यते ।

इदं तु ध्येयं – अत्र समाविष्टानि सर्वाण्यपि स्तोत्राणि काव्यतत्त्वस्य दृष्ट्योत्तमान्येवेति विधानं कर्तुं न पार्यते । तारतम्यं तु स्यादेव । परं किं तेन ? स्तोत्रेषु भक्तिरेव प्रमुखो रसः, इष्टतत्त्वस्य गुणवर्णनमेव तत्राऽलङ्करणं, भावप्रवणतैव तत्र गुणः, सर्वस्वसमर्पणस्यैव तत्र प्राधान्यम् । काव्यानुशासननियमान् मनसि निधाय कविः काव्यं विदधातुं शक्नुयात्, परं भक्तेन स्तोत्रं नैव रच्यते, स्तुतिर्नैव क्रियते, स्तवनं नैव विधीयते; तस्याऽन्तस्तलात् स्वयमेवैतेषां प्रादुर्भावः । काव्यशास्त्रं तत्राऽकिञ्चित्करतां बिभर्ति । अन्तःकरणेऽसम्मान्त्या भक्तेर्हठाद् बहिः समुच्छल्ल्येष्टतत्त्वं प्रति प्रवहणमेव स्तुतिः । भक्तिस्तावतैवाऽऽत्मानं कृतकृत्यं मन्यमाना नैवाऽपेक्षते काव्यशास्त्रीयप्रमाणपत्रम् । एतेषु स्तोत्रेषु भक्तितत्त्वं कियत् प्रबलं तत् पठनैकगम्यम् ।

अथैतेषां ग्रन्थानां लेशतः परिचयः –

**स्तुतिकल्पलता –** प्रवर्तकमुनिराजैः प्रायो वैक्रमीये १९६५ तमे वर्षे तन्नाम स्ववयसोऽष्टादशे एव वर्षे रचितेयं कृतिः । अत्र तैर्व्यापारितां महनीयां विद्वत्तां दृष्ट्वा के वाऽऽनन्दभाजो न भवेयुः ? अत्रस्थानि छन्दोनामगर्भ-पकारादिबन्धाख्य-निर्दन्त्य-पञ्चवर्गविनिर्मुक्तादीनि काव्यानि बुद्धिवैभवद्योतनेन यथाऽस्मान् चकितचकितान् कुर्वन्ति, तथैव स्तम्भनपार्श्वस्तोत्र-विजयनेमिसूरिशतकादीनि स्तोत्राणि भाववाहित्वेन हठादस्मासु समर्पणभावनामुद्गमयन्ति । मुनिवराणामार्जवसम्भृतां विज्ञप्तिं पश्यत –

> ''यस्य स्मृतिर्न च मतिर्न गतिर्न शक्ति-
> रापद्रुजाऽतिपरिपीडितविग्रहस्य ।
> तस्यौषधीपतिसमप्रभकेवलं त्वां,
> त्यक्त्वा विधास्यति परो मम कश्चिकित्साम् ? ॥'' (पृ. १९)

शब्दलालित्यं तु वर्णनातिगम् –

> ''भुवनभूषण ! विहतदूषण ! कुमतिसंहतिपूषणं,
> भुवनपावन ! विगतभावनविषयधावनलोलुभम् ।
> भयविभञ्जन ! भविकरञ्जन ! वरनिरञ्जनपूजन !,
> सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥'' (पृ. ३४)

मुनिवराणां शब्दचातुर्यपि रम्या –

> ''यस्ते यजस्त्वमिह तस्य जयप्रदोऽसि,
> यस्ते प्रयच्छति रवं वरदोऽसि तस्य ।
> एवं त्वमक्षरविपर्ययकेलिशीली,
> किं नाथ ! यच्छति नमो न मनो ददासि ?'' (पृ. १९)

सङ्क्षेपेण कथ्यते चेत् स्तुतिकल्पलतायाः फलान्यास्वदमानानां चित्ते आनन्दाद्वैतं संजनिष्यते इति निश्चप्रचम् ।

**नूतनस्तोत्रसङ्ग्रहः –** पंन्यासश्रीप्रतापविजयगणिभिः १९६७ संवति सन्दृब्धोऽयं ग्रन्थ आन्तं यावदवगाहितुमस्मान् विवशीकरोति। कवेर्भक्तिप्राबल्यं, निर्दुष्टं वैदुष्यं, वैदग्ध्यपूर्णभङ्गभणितिः, समुचित-शब्दचयनशक्तिश्चेति सर्वमपि मनसि किमप्यकथ्यमाकर्षणं जनयति । विविधच्छन्दोभिर्ग्रथितायां जिनचतुर्विंशिकायां प्रत्येकं स्तुतिगुच्छस्य चरमे श्लोके गुरुनामगर्भश्चक्रबन्धः शब्दशास्त्रपारङ्गततामेव व्यनक्ति ।

**स्तोत्रभानुः –** वैक्रमीये १९७२ वर्षेऽर्थात् श्रीविजयनन्दनसूरीश्वराणां (तदानीं श्रीनन्दनविजय-मुनीनां) प्रव्रज्यापर्यायस्य तृतीये वर्षे तन्नाम वयसः सप्तदशे एव वर्षे उदितोऽयं भानुः। इदमेवाऽस्या-ऽनितरसाधारणं वैशिष्ट्यम्। योऽयमिदानीं संस्कृतव्याकरणाध्ययनस्य प्रारम्भकालः परिगण्यते, तस्मिन् दीक्षापर्यायस्य तृतीये एव वर्षे एतादृशीं प्रौढिं मधुरां भणितिभङ्गीं शब्दयोजननिपुणतां च निरीक्ष्याऽनायासेनैवाऽनुमीयते गुरोः प्रतिभोद्भावकः प्रभावः शिष्यस्य च प्रारब्धपुष्टः परिश्रमः । मुनेः प्रस्तुतिकौशलं दृश्यताम् –

''अल्पाशयेन तव नाथ ! मयोच्यमानं,
स्तोत्रं धरिष्यति हृदि प्रवराशयोऽपि ।
क्षीराब्धिमौक्तिकमदन्नपि राजहंसः,
किञ्जल्कमत्ति किल कर्दमजस्य किं नो ?'' (पृ. १३५)

ग्रन्थे सुचारुतयाऽवलोकिते न कदापि वयं कवेरेतत्कथनेन साकं सम्मतिमादधातुं शक्नुयाम -

''नाऽस्त्येव सुन्दरतरा बहुकल्पनाऽत्र,
नाऽस्त्येव शब्दरचना जनतोषदात्री ।'' (पृ. १३८)

**स्तोत्रचिन्तामणिः –** श्रीविजयपद्मसूरिभिः १९७७ तः १९९५ यावद् रचितानि स्तोत्राण्यत्र सङ्कलितानि सन्ति। स्तोत्रेष्वेषु पदे पदेऽनुभूयमानान् प्रभुभक्ति-गुरुसमर्पण-नम्रतादीन् गुणान् दृष्ट्वा हृदयमिदमेव रटति यदीदृशी भावप्रवणता नाऽस्ति तर्हि वृथा वाग्विलासेनाऽलम्। कर्तृत्वस्याऽहंतायाश्च विलयः सहजसिद्धोऽस्मिन् महापुरुषे । समर्पणस्योत्कटतां पश्यत -

''वक्तुं शक्तिमती न मेऽपि रसना यस्योपकारावलिं,
ध्येयो यो मयि निर्गुणेऽपि प्रगुणो भद्रोन्नतौ सर्वदा ।
आत्मोद्धारक एक एव मम सोपाधेर्भवाम्भोधितः,
तीर्थोद्धारपरायणो जयतु स श्रीनेमिसूरीश्वरः ॥'' (पृ. १८८)

अत्रस्थस्तोत्रेषु न केवलमिष्टतत्त्वस्य गुणवर्णनमपि तु इतिहासदर्शनं, तीर्थकरदेशनादेशनं, तत्त्वनिरूपणमित्यादीनि तत्त्वान्यपि दृश्यन्ते इत्यनन्यं वैशिष्ट्यम्। यत्किमपि विषयवस्तु भवतु, तस्य सुन्दरतया प्रस्तुतौ सूरीणामेकाधिकारः ।

**प्राकृतस्तोत्रप्रकाशः –** प्राकृतभाषायां रचनाकरणमिदानीं विरलं जातम्। रचनाकौशलमेवेदानीं न दृश्यते इति कथ्यते चेदपि नाऽतिशयोक्तिः । न केवलं तावत्, प्रायोऽद्य प्राकृतसाहित्यं न पठ्यते

पाठ्यते चर्च्यते वा । प्राकृतक्षेत्रमेवोपेक्षणीयं जातम् । ईदृश्यां स्थित्यामपि प्राकृतभाषयैतावन्ति स्तोत्राण्येकेनैव सूरिणा रचितानीत्येतत् प्राकृतप्रेमपरवशतामेव द्योतयति । या किल भगवतो भाषा, तया तस्यैव गुणकीर्तनं, या खलु जिनशासनस्य निजा वाणी, तया तस्यैव माहात्म्यगानं कियदानन्ददायकम् ? तत्रापि सूरीणां रचनासृष्टेर्विशालतां पश्यन्तु, सर्वासां विधानां तत्र समावेशः, न किमपि जिनशासनाङ्गं तत्परिधेर्बहिस्तिष्ठति ।

**प्रकीर्णरचनासन्दोहः –** अत्र समाविष्टानि स्तोत्राण्युपरिनिर्दिष्टैश्चतुर्भिर्महापुरुषैरेव विरचितानि । एतानि नन्दनवनकल्पतरु–जैनसत्यप्रकाशपत्रिकयोः प्रकाशितानि तत एव च सङ्गृहीतानि । द्वित्राण्यन्यस्मात् स्रोतसोऽपि गृहीतानि । एतेषां सम्पादकानां प्रकाशकानां च कार्तज्ञ्यमावहत्ययं सङ्कलनकारः । एतेषां स्तोत्राणां रमणीयता तु रसनास्वादैकगम्या, नाऽत्र तद्विषयेऽधिकं चर्च्यते ।

ग्रन्थपरिचयोऽत्र समाप्तिं भजति । नैतावता मया ग्रन्थानां माहात्म्यमंशतोऽपि विशदीकृतम् । इतोऽप्यत्र बहु बहु लेखनीयम् । परं मम लेखनी तादृशीं क्षमतां नैव बिभर्ति । वस्तुत आवश्यकता–ऽपि नाऽस्ति । कान्दविकैः सज्जीकृतानि स्वादूनि मिष्टान्नानि भवतां पुरतः परिवेषितानि परिवेषकेण । किमथो तस्य मधुरिमागानेन ? स्वयमेव कणेहत्याऽऽस्वद्यन्तां, ब्रह्मानन्दसहोदरश्चाऽऽह्लादोऽनुभूयताम् ।

पूज्यतमैर्गुरुचरणैः श्रीविजयशीलचन्द्रसूरिभिरेवाऽहमस्मिन् कार्ये प्रेरितो नियोजितोऽसमञ्जस–स्थितौ समाहितः कृपादानेनाऽनुगृहीतश्च । तेषामियमाशीर्वृष्टिर्मय्यविरतं पतत्वित्येव तेषां श्रीचरणयो–र्विज्ञप्तिः । ज्येष्ठानां मुनिवराणां सौहार्देन साहाय्यदानमेव मम प्रेरकबलम् । कार्येऽस्मिन् तद् बलं कियत् समर्थकं जातं तदहमेव जानामि ।

संशोध्यप्रतेः (proof) द्विस्त्रिर्वा सावधानमवलोकनेऽप्यर्थानवगम–त्वराकरणादिहेतुभिः स्खलना अवशिष्टाः स्युरेव । ताः संसूच्याऽनुग्राह्योऽयं जन इति विदुषां पुरतः सादराऽभ्यर्थना ।

श्रीश्रमणसङ्घ एतेषां स्तोत्राणां पठनेन भक्त्युल्लसितो भवत्वित्याशया सह...

श्रीविजयशीलचन्द्रसूरिशिष्यः
मुनि–त्रैलोक्यमण्डनविजयः

# अनुक्रमः

पृष्ठम्

स्तुतिकल्पलता ........ १

नूतनस्तोत्रसङ्ग्रहः ........ ६५

स्तोत्रभानुः ........ ११९

स्तोत्रचिन्तामणिः ........ १३९

प्राकृतस्तोत्रप्रकाशः ........ १९५

प्रकीर्णरचनासन्दोहः ........ ३२१

# स्तुतिकल्पलता

◆

प्रवर्तक-मुनिश्रीयशोविजयः

# अनुक्रमः

| | |
|---|---|
| | पृष्ठम् |
| १. श्रीशङ्खेश्वरपार्श्वषट्त्रिंशिका | ४ |
| २. विविधनामगर्भच्छन्दोमयमुक्तक–श्रीपार्श्वजिनेश्वराष्टकम् | ९ |
| ३. प्रथमैकवचनान्तपदैः श्रीचिन्तामणिपार्श्वस्तोत्रम् | ११ |
| ४. अकारान्तद्वितीयान्तपदैः श्रीदादापार्श्वनाथस्तवनम् | १३ |
| ५. इकारादिरहिताकारान्तद्वितीयान्तपदैर्विरचितं श्रीभाभापार्श्वनाथस्तोत्रम् | १५ |
| ६. श्रीस्तम्भनपार्श्वनाथस्तोत्रम् | १७ |
| ७. श्रीगौडीपार्श्वनाथस्तोत्रम् | २५ |
| ८. पादिबन्धाख्येन चित्रकाव्यभेदेन श्रीपार्श्वनाथस्तोत्रम् | ३० |
| ९. निर्दन्त्यबन्धाख्येन चित्रकाव्यभेदेन श्रीपार्श्वेश्वरस्तोत्रम् | ३२ |
| १०. शरणगतोद्धरणाख्यं श्रीपार्श्वेश्वरस्तोत्रम् | ३४ |
| ११. स्तुतिफलप्रशंसाख्यं श्रीपार्श्वनाथस्तोत्रम् | ३५ |
| १२. महावीरस्वामिषट्त्रिंशिका | ३७ |
| १३. अकारान्तप्रथमान्तपदैर्महावीरस्तोत्रम् | ४४ |
| १४. पञ्चवर्गविनिर्मुक्तं श्रीमहावीराष्टकम् | ४५ |
| १५. श्रीवीरचित्रकाष्टकम् | ४६ |
| १६. श्रीमहावीरचित्रकाष्टकम् | ५० |
| १७. अकारान्तचतुर्थ्यन्तपदैः श्रीमहावीराष्टकम् | ५३ |
| १८. श्रीमहावीराष्टकम् | ५४ |
| १९. श्रीविजयनेमिसूरिशतकम् | ५५ |
| २०. द्वितीयान्तपदमाचार्याष्टकम् | ६२ |
| २१. गुप्तक्रियापदमाचार्याष्टकम् | ६३ |

# प्रस्तावना

इह हि समग्रविद्याविद्रावणविशारदे कलयति कालेऽपि वैयाकरणचक्रचक्रवर्त्तिनो विदितराद्धान्ततत्त्वाः सद्बोधबोधितसत्त्वा विलोकितविविधशास्त्रार्थसार्थाः शुद्धयोगोद्वहनादिक्रियाकलापसम्प्राप्तपरमाचार्यपदाः सतत-मुग्रविहारकरणाकुण्ठितकाया निरन्तरमध्ययनाध्यापनक्रियायां परिदत्तपरिश्रमाः व्याख्यानाख्यानक्रियायामा-विष्कृतकौशलाः श्रीमद्विजय**नेमिसूरीश्वराः** पादपद्माभ्यां पावयन्तः पृथ्वीतलं विद्यन्ते विश्वविख्यातास्तेषां प्रसादप्राप्तपरिज्ञानलवेन कलिकालसर्वज्ञश्रीमद्धेमचन्द्राचार्यविरचितश्रीमद्बृहच्छद्बानुशासनाध्ययनतो विदित-व्युत्पत्तिविद्यालवेन अस्मिन्नसारेऽपारकान्तारे दुःखैर्दुर्दिनायमानेषु दिवसेषु इतस्ततः प्रतिपथं बंभ्रम्यमाणाः प्राप्यस्थानप्रापणपथमप्राप्नुवन्तः प्रतिपदं प्रतिपत्तिशून्या विपत्तुमुद्यता अपि मर्त्त्या भगवत्स्तोत्रैः समुत्तीर्यन्ते इति मन्यमानेन भगवद्गुणोदन्वद्बिन्दुवन्दनपरायणेन पामरेणाऽपि मया किमपि **स्तुतिकल्पलता**विरचनात्मकं बालचापलमाकलितं, तत्र काऽप्यशुद्धिश्चेत् परिदृश्यते, तर्हि संशोधनीया गुणैकपक्षपातिभिः क्षमावद्भिर्विद्वद्भिरिति विविधधर्मकर्मधुरन्धराणां श्रेष्ठिवर्य**मनसुखभाई-भगुभाई**प्रभृतीनामस्मद्विद्यासारसहायभूतानामतीवोपकारं संस्मरन्नुपसंहरामि ॥

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

## ॥ १. श्रीशङ्खेश्वरपार्श्वषट्त्रिंशिका ॥

॥ अथ पञ्चदशाक्षरचरणमतिशक्वर्यां मालिनीवृत्तम्[1] ।

असमशमविलासं निर्जराचार्यवाचा-ऽप्यगणितमहिमानं शुद्धबोधप्रदानम् ।
प्रभुमहमथ नौमि त्रायकं विश्वजन्तो-रतलकुगतिकूपाद् वर्य**शङ्खेश्वरेशम्** ॥१॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्राच्छन्दः[2] ॥

यद्यप्यबुद्धिस्तव सुस्तवेऽहं, निःशक्तिको नाथ! तथाऽपि मेऽद्य ।
दोषापनोदक्षमवाग्विलासं, त्वां वीक्ष्य चित्तं यतते स्तवाय ॥२॥

॥ अथैकादशाक्षरचरणमुपजातिवृत्तम्[3] ॥

विचित्रमाधुर्यविलासिदेवा-ऽसुरादिवाक्यैः सुहितश्रुतेस्ते ।
प्रमोददायी भविता मदीय-वाक्काङ्क्षिको देव ! रुचिप्रदानात् ॥३॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्रावृत्तम् ॥

श्रीपार्श्वनाथं भवघोरकूप-सन्तारवाग्दीर्घवरत्रमाप्तम् ।
सद्बोधनौतीर्णभवाब्धिपारं, वन्दारुसन्तानकमानतोऽस्मि ॥४॥

निःशेषदोषानलनाशनीरं, त्वां ये श्रयन्ते गुणवल्लिमेघम् ।
तानुत्सुका निर्वृतिरेति शीघ्रं, पद्मालया पद्ममिव प्रभाते ॥५॥

---

१. नगणयुगलयुक्ता मेन मध्ये प्रयुक्ता यगणयुगलनद्धा बद्धमोदप्रबन्धा। इह भवति न केषां हारिणी चित्तवृत्तेर्मधुरपदविलासा मालिनी नोगवाहैः ॥ उट्टवणिका यथा - ।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ

२. आदौ तयुग्मेन विराजमाना मध्ये जकारेण विभूषिता या। अन्ते गकारद्वयमण्डिता सा स्यादिन्द्रवज्रा विबुधप्रसिद्धा ॥ उट्टवणिका यथा - ऽऽ। ऽऽ। ।ऽ। ऽऽ

३. उपेन्द्रवज्राचरणेन युक्ता स्यादिन्दवज्राचरणाभिरामा। कवीन्द्रलोकैः कथितोपजातिः तस्याः प्रभेदा बहवः प्रसिद्धाः ॥ चतुर्दशोपजातयस्तासां नामानि - कीर्तिर्वाणी माला शाला हंसी माया जाया बाला । आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिस्तासामाख्याः ॥

प्राप्तप्रकर्षं कृतपुण्यसारं, जन्माऽद्य जातं सफलं ममैव ।
अद्यैव जातो बहुमानपात्रं, ज्ञाताऽद्य संसारविसारता च ॥६॥

पद्मावती रक्षति यस्य भक्त्या, तीर्थं जनानां भववारिवारि ।
कीर्त्तिप्रतापैरभिराजमानः, श्रीपार्श्वराजः सुखराजयेऽस्तु ॥७॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि [१]उपेन्द्रवज्रावृत्तम् ॥

शठे द्विषा नो कमठे व्यधारि, बहुज्वलद्दुःखददेऽभवत् ते ।
न सेवके भक्तिभरान्विते च, तवाऽनुरागो धरणेन्द्रराजे ॥८॥

इति प्रभो! कर्मचमूरजेया, समूलमुन्मूलितपुण्यराशिः ।
अहो उदासीनतया त्वयाऽरं, जिता स्ववीर्येण जगत्पतीश ! ॥९॥

॥ अथैकादशाक्षरचरणमुपजातिवृत्तम् ॥

त्वत्पादसेवामकरन्दपूर्णं, त्वद्ध्यानभानूदयजातहर्षम् ।
सतां हृदब्जं समुपैति सिद्धि-र्मरन्दलोभाद् भ्रमरीव पद्मम् ॥१०॥

अलब्धपुण्यैरिह दुर्लभं तद्, विपच्छिलोच्छेदनवज्रपातम् ।
वीताभ्रवृष्टेस्सममीक्षणं मे, जातं त्वदीयं शमसौख्यमुख्यम् ॥११॥

कोपप्रवेशो न तवाऽस्ति देव !, न रागलेशोऽपि च देव ! कुत्र ॥
उपेक्षया व्याप्तमिदं जगत् ते, न खण्डिता चेश्वरता तथाऽपि ॥१२॥

॥ अथ द्वादशाक्षरचरणं जगत्यां वंश[२]स्थवृत्तम् ॥

तव क्रमस्पर्शकरा नरास्तु ये, सुखं लभन्ते परमं जिनेश्वर ! ।
यतो न किं हेम भवेदयस्तु ते, प्रभावतः स्पर्शमणेरगोचरात् ॥१३॥

॥ अथेन्द्रवंशा-वंशस्थस्योरुपजा[३]तिर्द्वादशाक्षरचरणिका ॥

अवर्णनीयं बहुपापगुम्फितं, यच्चाऽनुभूतं भवदुःखभारकम् ।
चरित्रकं मे पुरतस्तवाऽधुना, जानासि देवेति कृतं प्रलापकैः ॥१४॥

नमत्सुधाभुक्पतिपूजितक्रमः, श्रीकेवलज्ञानविलोचनाञ्चितः ।
त्वमीक्षसे नाथ! जगत्त्रयं सदा, ततस्त्रिनेत्राय नमो नमोऽस्तु ते ॥१५॥

---

१. श्रुतिप्रमोदं विदुषां करोति विचित्रशोभा जतजैर्गयुग्मैः । उपेन्द्रवज्रा कथिता कवीन्द्रैर्न कस्य हृद्या भुवि सा प्रसिद्धा ॥ उट्टवणिका यथा - ।ऽ। ऽऽ। ।ऽ। ऽऽ

२. गणो जसंज्ञः प्रविभासते पुरस्तकारनामा च परस्ततो भवेत् । ततो जकारो रगणश्च भासते प्रतीहि वंशस्थमिदं महामते ! ॥ उट्टवणिका यथा - ।ऽ। ऽऽ। ।ऽ। ऽ।ऽ

३. स्यादिन्द्रवंशाचरणाभिशोभिता प्रबद्धवंशस्थपदावपूरिता । विद्वन्मनःकैरवमोदचन्द्रिका ख्यातोपजातिर्भुवि चाऽपरा बुधैः ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि शालिनीवृत्तम्[१] ॥

भुक्त्वा भुक्त्वा भोज्यसारं भवेषु, तृप्ता दृप्ता नैव लोकाः कदाचित् ।
जातास्ते ते त्वद्वचःपानकेन, तुष्टेः पुष्टेर्धारकाः शान्तचित्ताः ॥१६॥

भ्राता त्राता सर्वविश्वस्य चाऽसि, धृत्वा धृत्वा केवलं वर्त्तमानः ।
जातस्तात ! त्वं तु लोकोपकारी, सेव्यो देव्यो नैव केषां जनानाम् ॥१७॥

सारा धारा मेघधारेव वाचो, रोहं रोहं सारसौख्यालिवल्लिम् ।
मारापारस्मेरदर्पौघहन्त्री, यस्य त्रस्यत्पापराशिं नुमस्तम् ॥१८॥

भ्रान्त्वा भ्रान्त्वा घोरसंसारदावे, श्रान्ताः श्रान्ता जन्तवो देवदेव ! ।
नत्वा नत्वा त्वत्पदाम्भोजयुग्मं, हत्वा हत्वा कर्मसङ्घं विमुक्ताः ॥१९॥

हारं हारं सर्वमोहान्धकारं, कारं कारं सर्वपापप्रणाशम् ।
भव्यं नव्यं देव ! दत्से जनानां, तारं तारं घोरसंसारवार्धेः ॥२०॥

॥ अनुष्टुभ्वृत्तम्[२] ॥

जितश्रमं जितात्मानं, जितामित्रं जितेन्द्रियम् ।
जिनेन्द्रं जितदं नौमि, जित्तमं तं जितामयम् ॥२१॥

सर्वसज्ज्ञानसम्पन्नं, परब्रह्मप्रतिष्ठितम् ।
देवेन्द्रपूजितं देवं, वन्दे शङ्खेश्वरं वरम् ॥२२॥

सुवर्णकं तं धर्माणां, सुवर्णच्छविविग्रहम् ।
सुवर्णनीयचारित्रं, सुवर्णवचनाकरम् ॥२३॥

सर्वदा धर्मयन्तारं, सर्वदा धर्मदायकम् ।
धर्मेशं धर्मवर्माणं, वन्देऽहं धर्मदेशकम् ॥२४॥

ज्वलज्ज्वालावलीरक्त-भासा भाभासिनो नखाः ।
विघ्नं निघ्नन्तु देवेश!, पादपद्मोद्भवास्तव ॥२५॥

॥ शिखरिणीवृत्तम्[३] ॥

महोभिः श्रीमद्भिर्भुवनमथ चोद्दीपयति यो, यतः प्राप्तो धर्मः सुरतरुवरो मोक्षफलदः ।
अनन्तैः संशान्तैर्विबुधजनवन्द्यं क्षितिपतिं, स्तुवे श्रीशङ्खेशं जिनवरमहं तं प्रतिदिनम् ॥२६॥

---

१. स्फारस्फूर्जत्प्रोर्ज्जितोद्दामदीप्तिः चित्ताह्लादं म्तौ तगौ गं दधाना । कुर्यान्नेयं कस्य संश्रूयमाणा प्राज्ञैः प्रोक्ता शालिनी वार्द्धिवाहैः ॥ उट्टवणिका यथा – ऽऽऽ ऽऽ। ऽऽ। ऽऽ

२. पादे सर्वत्र षष्ठः स्याद् गुरुर्लः पञ्चमस्तथा । समे लघुः सप्तमश्च यत्र तद् विद्ध्यनुष्टुभम् ॥

३. भवेत् पूर्वं यस्यां यगणरचना मेन सुभगा, ततः पश्चान्नस्स्यात् सगणसहितो भेन कलिता । लघुर्गान्त्या विज्ञैरिह विमलवर्णा स्फुटपदा । रसै रुद्रैश्छिन्ना भवति भुवि सैषा शिखरिणी ॥ उट्टवणिका यथा – ।ऽऽ ऽऽऽ ।।। ।।ऽ ऽ।। ।ऽ

भवारण्ये नृणां चिरमपि च सुभ्रान्तमनसां, सदा शान्त्यावासं तव मुखमहं नाथ ! शमदम् ।
निरीक्ष्याऽस्तक्रोधोऽभवमिह तु संसारविपिने, यतः के च स्युर्नो स्वमृतभरमापीय विजराः ॥२७॥

सदा मोहद्रोहप्रकटनपरस्य क्षितिपते-र्व्यपारेका त्वेका समवसरणे गीस्तव वरा ।
असारां व्याधारां भवजलनिमग्नां जिन! धरां, समुद्यच्छन्ती सा सकलनरमोदा विजयते ॥२८॥

ज्वलत्काष्ठज्वालावृततनुरहिर्दारसहितः, प्रसादात् तेऽलभ्यादमरपदवीं प्रापदथ सः ।
जनाः सर्वे धर्मे समजनिषताऽथ त्वदतुल-प्रभावप्रज्ञानात् प्रसितमनसः शान्तमतयः ॥२९॥

अमी पार्श्वाधीशा विमलगुणजातान् विदधतू-पसर्गाणां सेना ज्वलदनलवद् भीतिभरदाः ।
अलक्ष्याऽसह्या यैर्बहुकलितदुःखा नृनयनै-स्त्रिलोकीं भिन्दाना शठकमठजाता समसहि ॥३०॥

सदा देवासेवां त्यजत उपकाराय सहसा, यदूनां दूनानां क्षितितलमलङ्कुर्वत इव ।
जराजीर्णा दीर्णाः स्नपनजलतस्तेऽमृतभुजः, प्रसन्नाः संपन्ना यदुकुलभवा रूपमतुलम् ॥३१॥

॥ शार्दूल[१]विक्रीडितवृत्तम् ॥

श्रीदेवासुरसंस्तुतक्रमयुगो भव्याब्जभानूदयः, श्रीदेवत्वमचिन्त्यशक्तिकलितः पापप्रणोदक्षमः ।
आश्चर्यं प्रतिभाति यच्छिवपदे दूरेऽपि संस्थापको, भव्यानां विपदः करोषि विपदाः सत्सौख्यकल्पद्रुम ! ॥३२॥

स्याद्वादामृतवर्षिणी भगवती यद्वक्त्रनिःस्यन्दिनी, गीः शृण्वन्नरनाकिलोकहृदयानन्दाश्रुदानक्षमा ।
मुग्धान्तस्थितिकप्रमोहतिमिरव्राते तु सूर्यप्रभा, श्रीपार्श्वः स करोतु भव्यभविनामानन्दवृद्धिं सदा ॥३३॥

त्वन्नामस्मरणाद् भवन्ति विबला व्याघ्रादयः प्राणिन-स्त्रैलोक्यं स्वबलाज्जिघत्सुरिव यो दन्दह्यमानो दवः ।
सोऽपि त्वत्स्मरणाद् विमूढनरवत् किञ्चिन्न कर्तुं क्षमः, स त्वं वाञ्छितदायको विजयसे शङ्खेश्वर ! श्रीप्रभो ! ॥३४॥

अद्यैवोत्तमताऽभवच्च शिरसो यत् त्वन्नतेः साधनं, हस्तौ मे सफलत्वमञ्जलिकृतेराप्तौ जिनेशस्य ते ।
अद्यैवोत्तमतां दधाति दिवसो मे प्राप्तपुण्योदय, इत्याह्लादभरेण नौम्यभयदं शङ्खेश्वरं सौख्यदम् ॥३५॥

मोहव्याप्तजगन्महोदयकृते त्यक्त्वा समृद्धिं परां, त्वं तीर्थङ्करकर्मशर्मकरणं धृत्वा स्वबोधात् ततः ।
श्रीदीक्षां शिवसौख्यदूतिमधरः पश्चाच्छिवस्थानकं, कैवल्येन करस्थितामलकवत् पश्यंस्त्रिलोकीं गतः ॥३६॥

॥ कविनामगर्भश्चक्रबन्धः ॥

**य**स्मादाविरभूत् स्तुतागमवरोऽरिग्रामभीत्यत्ययः, **शो**भाढ्यो महितः शिवाय महतामानन्ददानां वरः ।
**वि**श्वव्याप्तभयार्त्तिनाशमतुलं यं प्राप्य लेभे शुचिः, **ज**य्या **य**स्य नमामि पार्श्वमनिशं तं कर्मसेना तता ॥३७॥

॥ स्तुत्यस्तोतृनामगर्भो बीजपूरप्रबन्धः ॥

जय **शं**स्यलसद्वाद !, जय **खे**चरसौख्यद ! ॥
जये**श्वर** ! **यशो**ह्लाद !, जयाऽरं **विजय**प्रद ! ॥३८॥

---

१. सूर्याश्वैर्विरतं बुधैरिह भवेत् पूर्वं मसंज्ञो गण-स्तस्मात् स्यात् सगणस्ततश्च जगणस्सस्स्यात् ततोऽनन्तरम् । तस्मात् तश्च ततस्स एव यदि चेदेकेन गेनाऽन्वितो यस्मिस्तत् कथितं विशुद्धमतिभिश्शार्दूलविक्रीडितम् ॥ उट्टवणिका यथा – ऽऽऽ ॥ऽ ।ऽ। ॥ऽ ऽऽ। ऽऽ। ऽ

॥ स्तुत्यनामगर्भो बीजपूरप्रबन्धः ॥

जय **शं**स्यगुणश्रीक !, जय **खे**दप्रभेदक ! ।
जये**श्वर** ! शिवश्रीक !, जय रम्ययशोऽधिक ! ॥३९॥

अद्य मे सफला सूक्ति-रद्य मे सफला मतिः ।
अद्य मे सफलं जन्म, अद्य मे सफलं फलम् ॥४०॥

इत्येवं स्तुतिभि**र्यशोविजय**इत्याख्येन शिष्याणुना,
श्रीम**न्नेमि**विभोः पदाम्बुजयुगध्यानप्रभावात् स्तुताः ।
श्री**शङ्खेश्वर**मण्डनाः क्षितितले भव्यावलीसेविताः,
सन्तापं नु हरन्तु भव्यभविनां पार्श्वाधिराजाः सदा ॥४१॥

श्री**नेमीश्वरसूरि**राज्यसमये भाद्रे सिते पञ्चमी-
तिथ्यां **भावपुरे**ऽभवन्मम वरो यत्नः स एष प्रभोः ।
श्रीनेमीश्वरसद्गुरोः पदयुगध्यानप्रसादादरं,
साफल्यं समवाप पापहरणः प्राज्ञप्रमोदावहः ॥४२॥

॥ इति श्रीप्रतापप्रभापटलव्याप्तदिगन्तराल-कीर्त्तिकौमुदीनिमज्जितराकाकान्त-महोपदेशामृतसारसेचनप्रोज्जीवित-जैनधर्मकल्पद्रुमा-ऽऽचार्यवर्यश्रीमद्विजय**नेमिसूरि**गुरुपादपद्ममकरन्देन्दिन्दिरप्रवर**यशोविजय**कृता सहृदयकण्ठशोभिनी **पार्श्वो**ज्ज्वलगुणगुम्फिता विविधच्छन्दोमय**मुक्तकषट्त्रिंशिका** ॥

## ॥ २. विविधनामगर्भच्छन्दोमयमुक्तक–श्रीपार्श्वजिनेश्वराष्टकम् ॥

(एकादशाक्षरचरणं त्रिष्टुभि बन्धुवृत्तम्)

पार्श्वजिनं भवभीतिनिरासं, मायिकपाशविनाशनदक्षम् ।
देशनवारिनिवारिततापं, **बन्धु**महं सकलस्य नतोऽस्मि ॥१॥[१]

(त्रयोदशाक्षरचरणमतिजगत्यां मायावृत्तम्)

लोकाधीशैर्भक्तिभरेणाऽऽनतपादं, यस्मिंश्चेतो लग्नमपापं भविता ते ।
सर्वानन्दप्राप्तमुदारं भविबन्धो !, त्यक्त्वा **मायां** लोभमपि त्वं भज पार्श्वम् ॥२॥[२]

(द्वादशाक्षरचरणं जगत्यां तामरसवृत्तम्)

सुरहृदयालिनिपीतमरन्दो–पमशुभदेशनवाचमुदारम् ।
कलुषनिदाघहरं जनताया–स्तव मुख**तामरसं** जिन ! जीयात् ॥३॥[३]

(त्रयोदशाक्षरचरणमतिजगत्यां प्रबोधितावृत्तम्) (मञ्जुभाषिणीत्यपि)

परिभूतमानसतया मनोभुवा, हृतधर्मशेवधिचयाश्शरीरिणः ।
भवता जिनेन्द्र ! सहसा **प्रबोधिता**–स्सुखमाप्नुवन्ति मदमाननिद्रया ॥४॥[४]

(चतुर्दशाक्षरचरणं शक्वर्यामपराजितावृत्तम्)

जिनवरवृषभः फणीन्द्रसुचिह्नितो, गुणमणिनिकरो जगत्पतिरीश्वरः ।
सकलसुरनरेश्वरा**द्यपराजिता**–तुलबलधरणो दधातु शिवश्रियम् ॥५॥[५]

---

१. भत्रयशोभितपादपिनद्धं गद्वयवर्णसुवर्णितबन्धम् । बन्ध्वभिधं प्रथितं भुवि विज्ञैर्दोधकसंज्ञमिदं प्रथितञ्च ॥ उट्टवणिका यथा – ऽ॥ ऽ॥ ऽ॥ ऽऽ

२. माभिख्यः पूर्वं तगणस्स्याद् यदि पश्चात् पश्चात् तस्मात् स्याद् यगणस्साख्यगणाढ्यः । गान्त्योत्कृष्टा विज्ञमनोमोददैषा माया प्रोक्ता विज्ञजनैः पदरम्या तु ॥ उट्टवणिका यथा – ऽऽऽ ऽऽ। ।ऽऽ ॥ऽ ऽ मत्तमयूरमित्यपि वदन्ति ॥

३. नगणविलास इतः परमेव जगणनिबन्धकृतिः सुभगा च । भवति ततः परमेव जकारो यगणयुतो यदि तामरसं तत् ॥ उट्टवणिका यथा – ॥। ।ऽ। ।ऽ। ।ऽऽ

४. सगणो भवेत् प्रथममेव गुम्फितो, जगणस्ततस्सगणशोभितस्ततः । जगणः पुनर्गुरुयुतो यदा तदा, कथिता बुधैरिह वरा प्रबोधिता ॥ उट्टवणिका यथा – ॥ऽ ।ऽ। ॥ऽ ।ऽ। ऽ

५. नगणयुगयुता रकारविराजिता, सगणयुतपदा लघुप्रविमण्डिता । भवति गुरुयुता बुधप्रवरैरियं, स्वरविरतिरुदाहृता त्वपराजिता । उट्टवणिका यथा – ॥। ॥। ऽ।ऽ ॥ऽ ।ऽ

(षोडशाक्षरचरणमष्ट्यां चञ्चलावृत्तम्)

**चञ्चला** बुधेह चञ्चला सुतादिवर्ग एष, ते भवत्यवश्यमेव मोहपाशबन्धनेन ।
दुःखदावदाहदानकारणं सदाश्रयेह, तद्भवोदधिप्रघोरदुःखनाशपार्श्वमाशु ॥६॥[६]

(विंशत्यक्षरचरणं कृत्यां चित्रनामकं वृत्तम्)

लोभमोहमानकालसर्पसङ्कुले भवाख्यकाननेऽत्र,
कर्मवर्गवैरिपातितो जनो भृशं विदूनचेतसा तु ।
त्वत्पदाब्जसेविनां निरीक्ष्य दुःखभारनाशमप्यहो न,
**चित्र**मेतदेव भाति यत् तथापि सेवते भवन्तमाशु ॥७॥[७]

(अथ स्तुत्यनामगर्भो बीजपूरः)

जगज्जन्तुसमुद्धार !, जप्य ! **पार्**षद्यमुत्कर ! ।
जरा**श्व**भ्र ! शुभाकार !, जयाह्लाद ! यशस्कर ! ॥८॥
**श्रीनेमीश्वर**सूरिराज्यसमये तस्य प्रतापादिदं,
स्तोत्रं श्रोत्रसुखावहं विरचितं **श्रीपार्श्वनाथ**स्य यत् ।
तेनाऽऽकल्पमिहाऽऽश्रयन्तु सुधियः श्रीपार्श्वनाथं जिनं,
सद्धर्मप्रतिपन्न**भावनगरे** स्तुत्यं वरं श्रेयसे ॥९॥
श्रीपार्श्वस्तवनं पठन्ति भुवि ये ते प्राप्तपुण्याशया,
लोकाः श्लोककदम्बपुष्पकलिता धर्मद्रुमाः सर्वदा ।
श्रीमन्नीतिफला भवन्ति विनयप्रोदूढमूलाश्चिरं,
कल्याणावलिवल्लिवेष्टनकृतच्छायाः सुसेव्याः सताम् ॥१०॥

॥ इति श्रीवसुमतीहारायमाणकीर्त्तिलतासम्वेष्टितापरचारित्रमूर्त्तिधर्मकल्पद्रुम-
**श्रीविजयनेमिसूरि**पादारविन्दमकरन्दतुन्दिलमिलिन्दायमान**यशोविजयमुनि**कृतं
विविधनामगर्भच्छन्दोमयमुक्तक**श्रीपार्श्वजिनेश्वरा**ष्टकं समाप्तिमभजत् ॥

---

६. यत्र राभिधो गणः पुरस्ततो जसंज्ञकोऽथ, राभिधेन मण्डितो गणेन जस्ततः पुनस्तु । कीर्त्तितो रसंज्ञको गणश्च लान्तिमं बुधेन, चित्रसंज्ञमीरितं बुधप्रमोददायकं तत् ॥ (अस्य चञ्चलानामकस्य वृत्तस्य चित्रसंज्ञतया प्रसिद्धत्वात् चित्रसंज्ञतया एव लक्षणं लिख्यते ।) उट्टवणिका यथा – ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ।ऽ ।

७. पूर्वमेव राभिधो गणस्ततो भवेज्जसंज्ञको गणस्तु, राभिधस्ततो भवेज्जसंज्ञको गणः पुरश्च राभिधोऽथ । जाभिधो भवेद् गणः पुनः पुनर्गुरुस्ततो भवेल्लघुश्च, एक एव चेत्तदा प्रतीहि चित्रनामकं बुध ! त्वमत्र ॥ उट्टवणिका यथा – ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ।

## ॥ ३. प्रथमैकवचनान्तपदैः श्रीचिन्तामणिपार्श्वस्तोत्रम् ॥

श्री**चिन्तामणिपार्श्व**नाथममरस्तुत्यक्रमाम्भोरुहं, दर्प्पोद्दामकरीन्द्रकुम्भदलनप्रख्यातकण्ठीरवम् ।
क्रोधक्रूरभुजङ्गगर्वगिलनश्रीवैनतेयोपमं, स्तोष्येऽहं प्रथमान्तशब्दनिवहैरेकत्वसंराजितैः ॥१॥ (शार्दूल०)

जयत्यखिलखेचरप्रखरमौलिरत्नप्रभा-प्रभासितपदाम्बुजप्रचलरेणुपुञ्जेन्दिरः ।
निरस्तजनमानसप्रभवदर्प्पकाडम्बरः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥२॥ (पृथ्वीच्छन्दः)

जयत्यतुलविक्रमप्रहतमानमायानल-प्रजातभवरोगकप्रशमनप्रजाताक्षरः ।
विपद्व्रजधराधरोद्दलनवज्रपातस्मृतिः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥३॥

जयत्यघभरोद्भवत्प्रबलदुःखदावानल-प्रदूनभविमानसप्रशमदानधाराधरः ।
विमुद्रनवमल्लिकाकुसुममित्रकीर्तिव्रजः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥४॥

जयत्यमरदीर्घिकाजलजजालगर्वापह-प्रसृत्वरविलोचनप्रशमितोग्रपापज्वरः ।
प्रमोहरजनीशतक्षपणवाक्यभानूदयः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥५॥

जयत्यवनिसंस्थिताखिलकुसृष्टिवादप्रथा-निरस्तभविसन्मतिप्रबलदानकल्पद्रुमः ।
प्रभीषणभयार्णवप्रबलकर्णधारक्रमः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥६॥

जयत्यसमसद्द्युतिप्रकरसारपीयूषक-प्रसिञ्चनकृतावनिप्रबलशान्तिसङ्क्रमः ।
सुधासमसमुच्छलद्वचनजातवेगोद्धुरः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥७॥

जयत्यजितविक्रमप्रवरदन्तवेगोद्भव-त्समग्रकलुषद्रुमोद्दलनदृप्तदन्तावलः ।
समस्तभुवनोदयप्रथनवैनतेयारवः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥८॥

जयत्युरुगुणावलिप्रसितचित्रमुक्ताफल-प्रकाशिचरणावगत्युदितशुद्धजैनागमः ।
अचिन्त्यचरितोज्ज्वलज्ज्वलनभासपक्षच्छविः, प्रभूतकरुणारसप्रसरणः स चिन्तामणिः ॥९॥

(अनुष्टुब्वृत्तेन स्तुत्यनामगर्भो बीजपूरकप्रबन्धः)

जय **चि**न्ताव्रजोद्धार ! जय **ता**पहरोद्धुर ! ।
जय **म**न्युप्रसंहार ! जयो**ष्णि**क्स्तुतसंवर ! ॥१०॥

(शार्दूलविक्रीडितवृत्तेन कविनामगर्भश्चक्रबन्धः)

**यः** सौख्यं विदधाति भव्यभविषु प्रौढप्रतापोदयः,
**शो**कं हन्ति स सर्वभूतभयसंहारो विहारो गिराम् ।
**वि**ज्ञानप्रसुवां सुरेन्द्रभरसंपूज्यो महर्षिः सदा,
**जन्तु**क्रोधशमः शिवा**य** भविनां भूयात् स चिन्तामणिः ॥११॥

श्री**नेमीश्वरसूरि**राज्यसमये भव्यारविन्देनभा,
विद्वत्कैरवचन्द्रिका समजनि प्रौढप्रभावस्मृतेः ।
तस्यैवाऽतुलतेजसो मम गुरोरेषा स्तुतिः पावनी,
यावद्भूमिरतो धराधरधरा तावज्जनैः पठ्यताम् ॥१२॥

एनां पार्श्वगुणप्रवाहकणिकाबोधेन धर्मद्रुम-
प्रोल्लासामलशान्तिवारिविसरप्रोद्वर्षिणीं मानवाः ! ।
अज्ञेनाऽपि मया कृतां भणत भोः किं वर्धितः पावको,
मूढेनाऽपि न तार्णकूटदहने प्रौढप्रभावो भवेत् ? ॥१३॥

एषा **यशोविजय**सञ्ज्ञकृता तनोतु, मोदं नवा बुधजनस्य किमस्ति तेन ।
श्री**पार्श्व**पादयुगले तु समर्प्यमाणा, पापानि सर्वभविनां निहनिष्यतीह ॥१४॥

श्री**नेमिसूरि**पादाब्ज-प्रभावविहिता स्तुतिः ।
पठ्यमाना सदा भूयात्, सर्वकल्याणकारिणी ॥१५॥

॥ इति निजस्फुरद्वाग्वज्रविदारितपाखण्डप्रचण्डखर्वगर्वपर्वत-महोपदेशामृतसेकसंवर्द्धितभव्य-
भविहृदयङ्गमातिशर्मदजिनोपज्ञसुज्ञानदानसिद्धान्तसारकारुण्यलता-ऽऽचार्यवर्यश्रीमद्विजय-
**नेमिसूरी**श्वरपादपङ्कजमिलिन्द**यशोविजयमुनि**ना विरचितं प्रथमैकवचनान्तपदसन्दर्भित-
श्री**चिन्तामणिपार्श्वस्तोत्रं** समाप्तम् ॥

## ॥ ४. अकारान्तद्वितीयान्तपदैः श्रीदादापार्श्वनाथस्तवनम् ॥

अकारान्तद्वितीयान्त-पदैरर्थाप्तगौरवैः ।
स्तोष्ये **दादा**भिधं **पार्श्वं,** क्लेशप्रशमकारिणम् ॥१॥
कृपावतारं शुभसम्प्रचारं, भवाब्धिपारं शिवसौख्यकारम् ।
कृतोपचारं विबुधैरमारं, कुबोधवारं जगदेकसारम् ॥२॥
कृतोपदेशं जगतामधीशं, जराहिवीशं मुखमित्रभेशम् ।
प्रभासिताशं द्युतिजालकीशं, अलोभपाशं कृतशान्तिवेशम् ॥३॥
छिन्नप्ररोषं कृतकर्मशोषं, दयाप्रपोषं हतबुद्धिदोषम् ।
यशःप्रभूषं सुखवारिवर्षं, कृतप्रतोषं शुभमार्गघोषम् ॥४॥
गतप्रशोकं शुभवल्लिसेकं, चन्द्रप्रभाकं मुखमुज्झिताङ्कम् ।
बिभ्राणमेकं गतमोहरेकं, गतारिभीकं महनीयभाकम् ॥५॥
अवद्यभेदं सकलार्थवेदं, विमुक्तखेदं परिबोधनादम् ।
भवामयोदन्तविभेदिवादं, कल्याणकादम्बपयोदनादम् ॥६॥
अतुल्यदेहं गुणराशिगेहं, धर्मप्ररोहं सततन्निरीहम् ।
ज्ञानैः सुधाहंकृतिसम्प्रदाहं, कृपाप्रवाहं दधतं विदाहम् ॥७॥
सर्वैकगेयं गुणतो ह्यमेयं, दत्तप्रदेयं परिमुक्तहेयम् ।
कामाद्यजेयं परिचिन्त्य कायं, विमुक्तमायं ह्युपदेशवायम् ॥८॥
ज्ञानप्रदानं कलुषावदानं, लोकत्रयव्यापियशोवितानम् ।
संखण्डितोद्यन्मदकाममानं, दादाभिधं पार्श्वजिनं स्तवीमि ॥९॥ (अष्टभिः कुलकम्)

(स्तुत्यनामगर्भौ बीजपूरकप्रबन्धौ)

अतुल्य**दा**नं गुणिलोकसार-मर्च्यं वि**दा**हङ्कृतकर्मपारम् ।
अघौघभेदं स्मरदाहहारं, अब्जास्य**पार्श्वं** प्रणमाम्युदारम् ॥१०॥

जय **दा**रिद्र्यसम्पात ! जय **दा**नवपूजित ! ।
जय **पा**र्थिवशंव्रात !, जय **श्वः**श्रेयसा तत ! ॥११॥

य: श्रीसौख्यनिमग्नचित्तकलित: सम्प्राप्तपापव्यय:,
शोभाधाननिधानकायललितो लीलागृहं ब्रह्मण: ।
विख्यात: सकलावदातचरितैर्धर्मद्रुमारामको,
जन्तुक्लेशतृणौघदावदहनो दादाख्यपार्श्वोऽवतात् ॥१२॥
श्री**नेमी**श्वरसूरिराज्यसमये तस्य प्रभावप्रथा-
ध्यानोन्मूलितमोहसन्तमससन्दोहेन पार्श्वस्तुति: ।
प्रज्ञानन्ददा **यशोविजय** इत्याख्यावता साधुना,
चैषा निर्मितिमाप्य भव्यजनतापापं भिनत्तु द्रुतम् ॥१३॥
श्रीपार्श्वस्तवनं भणन्ति हृदये सन्ध्याय दादाभिधं,
पार्श्वं ये शिववल्लिरोहजलदं ते प्राप्तपुण्योत्करा: ।
भव्या वैभवचक्रवालकलिता धर्मालवालोत्थित-
ब्रह्मश्रीलतिकामहोदयफलप्राप्त्या कृतार्था भुवि ॥१४॥
प्राज्ञस्तोमसुकर्णमोदजननी भव्यावलीकन्धरा,
मुक्तालीव मनोहरा विजयिनी लोके चमत्कारिणी ।
भव्यैर्वैभववृन्दवाञ्छनपरै: सम्भण्यमानाऽनिशं,
यावच्चन्द्रदिवाकरं वितनुतात् संस्फीतिमेषा स्तुति: ॥१५॥
इति प्रसंस्तुत: पार्श्वो, नेमिसूरिप्रसादत: ।
शिवाय भव्यजीवानां, भूयात् सम्भूतिवारक: ॥१६॥

॥ इति श्रीमन्निखिलविद्यासङ्केतसदननर्त्तितकविताक-श्रीमद्विजय**नेमिसूरीश्वर**पादाम्बुनिर्यन्मकरन्द-बिन्दुतुन्दिलचित्तभृङ्गक**यशोविजय**विरचितमकारान्तद्वितीयान्तपदकदम्बमयं दादापार्श्वाष्टकं श्रीमद्विजयनेमिसूरीश्वरप्रसादात् समाप्तम् ॥

## ॥ ५. इकारादिरहिताकारान्तद्वितीयान्तपदैर्विरचितं श्रीभाभापार्श्वनाथस्तोत्रम् ॥

अकारान्त-द्वितीयान्त-पदैरर्थप्रगुम्फितैः ।
सुरासुरनरस्तुत्यं, हतकर्मव्रजं विभुम् ॥१॥
न विद्यन्ते स्वरा यत्र, इकाराद्या बुधेश्वर ! ।
पदैरेवंविधैः स्तोष्ये, **पार्श्वं भाभा**भिधानकम् ॥२॥ युग्मम् ॥
सारं भयापारपयःप्रतार-यानं जगज्जन्मजराप्रणाशम् ।
आनन्दकन्दप्रभवप्रवार्दं, भाभाख्यकं पार्श्वमहं प्रपन्नः ॥३॥
माङ्गल्यकारं हतमानसारं, पापापहारं गतकर्मभारम् ।
सन्त्रासवारं मदपाशहारं, भाभाख्यकं पार्श्वमहं प्रपन्नः ॥४॥
ज्ञातार्थजालं जनवारपालं, सर्वाक्षदान्तं सकलप्रकान्तम् ।
मायानलव्रातजलप्रपातं, भाभाख्यकं पार्श्वमहं प्रपन्नः ॥५॥
आमप्रणाशं वरदानदक्षं, दग्धामयव्रातबलापकक्षम् ।
नष्टान्तरङ्गासहनप्रपक्षं, भाभाख्यकं पार्श्वमहं प्रपन्नः ॥६॥
शश्वत्प्रजप्यं सततं प्रकाम्यं, ब्रह्मप्रदानं पुरुषप्रधानम् ।
परान्नशक्रं गतपाशचक्रं, भाभाख्यकं पार्श्वमहं प्रपन्नः ॥७॥
माङ्गल्यमालं सकलप्रपालं, प्रकान्तभालं गतगर्ह्यकालम् ।
अस्तप्रपञ्चं प्रवराग्र्यवाचं, भाभाख्यकं पार्श्वमहं प्रपन्नः ॥८॥
अज्ञानकाननधनञ्जयमाप्तमह्यं, मारान्धकारशमनप्रबलार्ककल्पम् ।
संसारचण्डगददस्त्रसमप्रभावं, भाभाख्यपार्श्वमहमामहरं प्रपन्नः ॥९॥
सत्पादपङ्कजपरागकपावनक्ष्मं, स्फारापपाशवचनव्रजराजवक्त्रम् ।
कर्माशयक्षपणलब्धवरापवर्गं, भाभाख्यपार्श्वमहमामहरं प्रपन्नः ॥१०॥

(अथ स्तुत्यनामगर्भो बीजपूरकप्रबन्धः)

जग**द्भा**स ! तमोहार !, जन**भा**नकरेश्वर ! ॥
जय मारमदोद्धार !, जय देव ! शमाकर ! ॥११॥

(कविनामगर्भश्चक्रबन्धः)

**यः** स्वैरं रमते गुणैर्हतमदः पार्श्वः प्रभावोदयः,
**शोषः** कर्मचयस्य बोधितजनः कल्याणकेलीगृहम् ।
**विश्व**श्रेष्ठगुणः प्रकाशितमहत्सिद्धान्तसारागमो,
**जन्**तूद्धारकरो वरः कृतपदो निर्वाणगेहेऽवतात् ॥१२॥
श्री**नेमिसूरि**साम्राज्ये, **यशोविजय**साधुना ।
रचिता स्तुतिराकल्पं, पठ्यतां सर्वकामदा ॥१३॥
भणन्ति सुधियः स्तोत्र-मेतत् पार्श्वस्य ये भुवि ।
ते वैभवभरा यान्ति, महोदयफलं परम् ॥१४॥
प्राज्ञानन्दपदं स्तोत्र-मेतद् भव्यसुखावहम् ।
पठ्यमानं जनैः सर्वै-र्वृद्धिं प्राप्नोतु सर्वदा ॥१५॥

॥ इति श्रीकविपण्डितकुलहृदयसरसीरुहभृङ्गायमाण-प्रबलकलिकलुषप्रकम्पननिरोधसुसाधुजनशिखरिश्रृङ्गायमाण-श्रीमद्विजय**नेमिसूरी**श्वरचरणशरण**यशोविजय**विरचितमिकारादि-स्वररहिताकारान्तपदकदम्बमयं भाभापार्श्वस्तोत्रं श्रीमद्विजयनेमिसूरीश्वरप्रसादात् समाप्तम् ॥

ဢ✦ဣ

## ॥ ६. श्रीस्तम्भनपार्श्वनाथस्तोत्रम् ॥

यद्दर्शनं भवगदप्रशमामृतौघं, यस्य स्मृतिर्हृदयमोहतमोऽपहन्त्री ।
वन्दारुकल्पतरुशाखिवरं तमीशं, श्री**स्तम्भना**धिपति**पार्श्व**महं स्तवीमि ॥१॥ [वसन्त०]
पार्श्वं भवार्त्तिशमनं तमनन्तबोधं, रोधं समग्रदुरितस्य धियः प्रबोधम् ।
धर्म्योपदेशवचनैरनिशं ददानं, भूयो नमामि कृतकर्मकुलावदानम् ॥२॥
धन्योऽस्मि सुन्दरपदामृतमास्रवन्ती, यत् कर्णसन्निधिमवाप्य तवोक्तिदेवी ।
पापापहा विमलबोधविधानदक्षा, मातेव याऽवति कुबुद्धिविपत्प्रसङ्गात् ॥३॥
धन्योऽस्मि दुःसहविपत्पतितस्य मेऽद्य, वाणी त्वदीयचरणस्तुतिरागिणी यत् ।
उक्त्वा सकृत् तव कृपामय ! नाम लोकः, कल्याणराशिमनुविन्दति वागगम्यम् ॥४॥
धन्योऽस्मि मोहतमसाऽन्धदृशोऽपि यस्य, बुद्धिस्तव क्रमयुगं यदुपाश्रयन्ती ।
कल्याणसम्पदमवाप्य भवापवर्ग-योग्या भविष्यति कृपावरुणालयेयम् ॥५॥
धन्योऽस्मि यत् तव पदाम्बुजभक्तिरक्ता, न्विन्दिन्दिरेन्द्ररमणीव पयोजसक्ता ।
सन्मुक्तिमार्गमकरन्दरसाभितृप्ता, मन्ये भविष्यति मतिर्मम नाऽतिदृप्ता ॥६॥
मन्ये कषायवडवानलतापतप्ता-दस्मन्मनःसरणितः स्खलितप्रचारा ।
निर्गत्य गौः समभिवेक्ष्यति पार्श्वनाथ-चेतः कृपामृतरसौघनितान्तशीतम् ॥७॥
यच्चाटुचापलमहं प्रलपामि मोह-ग्रस्तोऽप्यलङ्घ्यभव एष शिवाय नाथ ! ।
तत्राऽपराध्यति कृपामय ! तावकीन-शान्त्यादिरेव न किमिच्छति मानवोऽयम् ॥८॥
चित्रं त्वतीव मम भाति कृपावतार !, निष्किञ्चनोऽपि फणिना परिषेवितोऽपि ।
सर्वोपसर्प्यपदवीं न जहासि नाथ, श्रीपार्श्वदेव ! नरकिन्नरवन्द्यपाद ! ॥९॥
दग्धोऽस्मि शोकहुतभोजनहेतिजालै-रन्तस्थितैर्विगलितप्रतिभोऽतिभीतः ।
एवंविधस्य कथमीश ! ममाऽऽविरस्तु, वाणी तृणीकृतमनोभवदर्प्प ! पार्श्व ! ॥१०॥
क्रन्दाम्यथो किमपि देव ! पुरस्तवेश !, घोरापदुद्धरणकारण ! कातरात्मा ।
कामानलज्वलितमोहवनस्थितं मां, श्रीपार्श्वनाथ ! विनिभालय माविलम्बम् ॥११॥
आक्रन्दमार्त्तमवधारय कर्णदेशे, कोऽन्योऽस्ति घोरभववारिधिकर्णधारः ।
त्वत्तोऽनुकम्पितजगत्त्रय ! पार्श्वनाथ !, पुण्यौघवर्षणपयोधरदर्शनेह ॥१२॥

अस्मादृशैरशुचिभिः परिकल्पितानि, किं चाटुचापलवचांसि विनोदयन्ति ।
चित्तं तवाऽमरवधूललितेऽप्यनीहैः, किं सारमेयलडितानि समाद्रियन्ते ॥१३॥
यद्वा विमूढवचनान्यपि न प्रसाद-मुत्पादयन्ति किमु ते करुणामृताब्धेः ।
ग्रस्ताक्षरं शिशुवचः किमु नो करोति, प्रीतिं पितुर्भुवननाथनतांघ्रिपद्म ! ॥१४॥
अर्थप्रथाविरहितैरपि मुग्धदीन-वाक्यैर्यथा द्रवति मानसमुद्घृणस्य ।
तद्वन्न भूरिगुणसत्कविवाक्प्रबन्धैः, प्रव्यज्यमानरसभावविलासरम्यैः ॥१५॥
पूर्वं मयाऽशुभमचायि यदीश ! कर्म, त्वत्पादभक्तिदृढरक्तमनाः किमस्मि ।
यद्वा कृतं सुबहुपुण्यचयं यदाऽन्तः, किं दह्यते विपुलशोकधनञ्जयेन ॥१६॥
आराधनां तव विधाय मनो ममाऽभूत्, कुत्रापि जन्मनि दृढानुशयालु देव ! ।
सर्वं कुलोज्ज्वलगुणादिपवित्रनृत्वं, जातं कथं त्वपरथा मम वन्ध्यमेव ॥१७॥
मानुष्यपोतमधिगम्य चिरेण नाथं, सन्तारकं दृढकृपाभरणं भवन्तम् ।
प्राप्य प्रतीतिरभवन्मम यस्य बाढं, तत्तुं ब्रुडे यदि तदाऽपयशस्तु कस्य ॥१८॥
सेवापरेषु विभवो ह्युपकारकेषु, कुर्युः प्रसादमिति नैव विचित्रमत्र ।
सन्तस्त्वपात्रमनुजेष्वपि निर्निदानं, चेतः कृपामृतभरार्द्रमुदावहन्ति ॥१९॥
तस्मान्निरस्तनिखिलोदयसाधनं मां, खिन्नात्मकं विहतवृत्तमनात्मवश्यम् ।
सीदन्तमीश्वर ! कृतान्तभयादभीति-दानेन सत्त्वरमिहाऽनुगृहाण देव ! ॥२०॥
त्वां नीतिमान् भजति यः स भवत्यनीति-र्मुक्तस्स येन हृदयात् स भवान्न मुक्तः ।
रक्तस्स तेऽपचितयेऽपचितिं न धत्ते, कृत्वा नतिं जिन ! किमुन्नतिमानहं नो ॥२१॥
स्वापो विदूनमनसो निशि मे दुरापो, निर्दाह आप्त ! गमयामि कदा सदाऽहः ।
त्रायस्व मां तव वशं जिन ! शान्तिसिक्त !, कस्माद् विभोऽस्यपरुषो मयि कर्कशस्त्वम् ॥२२॥
किं पालनेन सुधियो गतभीतिकस्य, पापः शठोऽयमिति मामधिगम्य हातुम् ।
त्वं नाऽर्हसि त्रिभुवनेश ! यतोऽस्म्यसाधु-र्निष्पुण्यकोऽहमनुकम्प्यतरोऽस्मि तस्मात् ॥२३॥
स्वीयातिदुष्कृतभरैः परिपीडितोऽपि, नोपेक्ष्य एव भवता करुणार्णवेन ।
अन्धौ पतन्तमपि दृप्तपशुं कृपार्द्रो, लोको न नाथ ! समुपेक्षत एव पुण्यः ॥२४॥
वक्रप्रचारमिह मां विजहास्यकर्णं, एतद्द्विजिह्वमुचितं न च ते कृपालो ! ।
यस्माद् भुजङ्गमवरं शिरसा बिभर्षि, मत्तुल्यमेव करुणामृतवारिनाथ ! ॥२५॥
पीयूषभानुत इव स्वरुसम्प्रपातः, स्याद् भास्करादिव तमःप्रभवोऽयमेव ।
स्वामिन् ! कृपाजलनिधेः शरणागतेषु, अस्मादृशेषु भवतः समुपेक्षणं यत् ॥२६॥
स्वामिन्नभीतिददनस्त्वमहं सुभीरुः, त्वं बोधिदोऽहमथ बोधिमृतेऽतिदुःखी ।
ख्यातो जिनस्त्वमसि रोषमनोजबद्धो-ऽहं तत् त्वया किमु भवामि न चाऽनुकम्प्यः ॥२७॥
सर्वज्ञ ! सर्वमवबोधसि भूतभावि, भाग्यक्षयो मम जिनाऽविदिता यदार्त्तिः ।
ईश ! त्वया तु करुणावरुणालयेन, ज्ञाताऽथवाऽपि समुपेक्षित एव हाऽस्मि ॥२८॥
त्वं त्वेक एव भविनामनिदानबन्धुः, स्वाभाविकी तव दया तरणेः प्रभेव ।
वक्रा पुनर्न्नियतिरीश ! ममैव यस्य, न्वाक्रन्दनानि वनरोदनसोदराणि ॥२९॥

दौर्भाग्यशेखरमकल्पमपुण्यभाज-माजन्मनर्मरहितं कटुकोग्रवाचम् ।
दिष्टादवाप्य निखिलाधममीश! नित्यं, मां दुर्गतिः कुलजनीव जहाति नैव ॥३०॥
त्यक्त्वा समाधिमसमाधिहरं वरं तु, प्रोद्यत्प्रभावपटलं शिवसौख्यशालम् ।
तेनाऽभ्रमं जलजपत्रविलोलवारि-तुल्यानि शीघ्रनिधनानि धनानि लब्धुम् ॥३१॥
आराधिता धनलवान्धितदृष्टयोऽति-गर्ह्येश्वरा न गुरवो भववार्द्धितारा: ।
घस्राणि हानिमधिप! प्रगतानि तानि, मे हा! प्रपीडितमना अधुनाऽस्मि नाथ! ॥३२॥
तृष्णा दिवाद्दिवमवर्द्धत योगिनाथ!, हेमन्तरात्रिरिव मे हृदये दयेश! ।
नाथ! प्रसह्य मम देह्यवबोधभानु-मन्तं नयाऽन्धतमसं कुविपर्ययोत्थम् ॥३३॥
स्तम्भं तनोति वितनोति विपर्ययं च, मोहं प्रपञ्चयति वाक्प्रसरं रुणद्धि ।
कं नाथ! नाऽऽमयमयं बहुलीकरोति, दर्प्पज्वरज्वलनदु:सहसन्निपात: ॥३४॥
तत् साम्प्रतं जगति विश्रुतहस्तसिद्धिं, त्वां पार्श्वदेव! सततं विभुमाश्रयामि ।
तस्माद् विमुद्रय वच:प्रसरावरोधं, द्रागिन्द्रियप्रबलतान्तिमपानुद त्वम् ॥३५॥
विश्वासमेव च भजामि भवेऽप्यगाधे, बाधे रिपूत्करकृतेऽपि च निद्रयामि ।
सामीप्यमेव परिगच्छति कालपाशे, जागर्मि नो यदि न रक्षसि किन्नु मे स्यात् ॥३६॥
यस्ते यजस्त्वमिह तस्य जयप्रदोऽसि, यस्ते प्रयच्छति रवं वरदोऽसि तस्य ।
एवं त्वमक्षरविपर्ययकेलिशीली, किन्नाथ! यच्छति नमो न मनो ददासि ॥३७॥
सर्वेऽपि नाथ! भवता परिबोधितास्तु, पुण्यं गताश्शिवसुखं च गतास्त एव ।
त्वां प्राप्य देव! करुणावरुणालयाऽहं, नो पुण्य एव यदि चेन्मम दुर्विधिस्तत् ॥३८॥
केचित् सुखस्य भगवन्नभयस्य केचित्, केचित् कृपामयमहोदयमार्गमापु: ।
नाथे त्वयि स्मृतिपथं सहसागतेऽपि, स्तुन्वन्नहं किमु भवामि विदूनचेता: ॥३९॥
जानानि शान्तिरसपूर्णमन:सरोऽहं, नो ते प्रवेष्टुमरितप्तशरीरकोऽहम् ।
धर्त्तुं स्वचेतसि कृपामृतनिर्झर! त्वां, शीतातिशीतमपि न प्रभवामि धिङ्माम् ॥४०॥
मोहान्धकारविधुरं बहुदु:खताप-तप्तं विपद्धिमसमूहहतं प्रभो! माम् ।
त्वं चेज्जिन! त्यजसि को भवतापहारी, मे संहरिष्यति परोऽसमवेदनौघम् ॥४१॥
यस्य स्मृतिर्न्न च मतिर्न्न गतिर्न्न शक्ति-रापद्रुजाऽतिपरिपीडितविग्रहस्य ।
तस्यौषधीपतिसमप्रभकेवलं त्वां, त्यक्त्वा विधास्यति परो मम कश्चिकित्साम् ॥४२॥
त्वं रुग्वहोऽहमपि देव! तथैव विश्वे, यद्वत् प्रभो! शिरसि ते प्रविभाति नाग: ।
तद्वन्ममाऽपि तवसेवनतत्परस्य, चित्रं जिनस्त्वमहमस्मि जितो विकारै: ॥४३॥
यद्वत् स्वधर्मकुशलस्त्वमहं तथैव, कामस्त्वयीव मयि नाथ! वृथोपजात: ।
कालस्त्वयीव मयि निष्फलतामवाप, चित्रं जिनस्त्वमहमस्मि जितो विकारै: ॥४४॥
पापप्रदोऽस्मि भुवने त्वमिव प्रधान-स्त्वं भीतिकृज्जिन! तथाऽहमपि प्रसिद्ध: ।
यद्वत् प्रपीडनकरोऽसि तथैव चाऽहं, चित्रं जिनस्त्वमहमस्मि जितो विकारै: ॥४५॥
ग्रस्तं विधुन्तुदमुखेन कलासमग्रं, शीतांशुबिम्बमिव घोररुजा विरुग्णम् ।
मुग्धाङ्गनाङ्गमिव नागघनोपगूढं, श्रीखण्डचन्दनमिवाऽमलसौरभाढ्यम् ॥४६॥

दुग्धाब्धितोयमिव मिश्रितकालकूटं, गङ्गातटं मकररुद्धमिवाऽतिहृद्यम् ।
दारिद्र्यदग्धमिव सद्गृहिलोकवृत्तं, मात्सर्यविप्लुतमिव श्रुतशालि चित्तम् ॥४७॥
रूपं कुलीनमनुजस्य सुधांशुकान्तं, विद्यावियुक्तमिव दुष्टजनोपभोग्यम् ।
मूढस्य वित्तमिव दानदयाविहीन-मृद्धस्य भूपतिवरस्य यथा शरीरम् ॥४८॥
क्रोधादिदुष्टमिव लिङ्गिजनस्य वृत्तं, पुण्यं तपोवनमिवाऽजगरेण रुद्धम् ।
मानुष्यमुज्ज्वलगुणश्रुतशीलशालि, जातं विपत्पटलशोच्यदशम्मदीयम् ॥४९॥ [चतुर्भिः कलापकम्]
पश्यन् भयानककृतान्तहतं मुनीश !, पादाम्बुजे परिपतामि लपामि दीनम् ।
किं वा लुठामि धरणौ किमु पूत्करोमि, नाऽस्तीह देव ! शरणं चरणं विना ते ॥५०॥
हा ! किं न नाथ ! परिरक्षसि मां कृतान्तः, क्रूरो नयत्ययमनन्यपरायणं नो ।
देवेश ! ते करुणया हृदयस्य पीडा, व्रीडाऽथवाऽपि शरणागतमुज्झतस्ते ॥५१॥
क्वाऽऽस्ते तवाऽद्य करुणा क्व नु वा बलं तत्, क्वाऽस्तेऽथवा तव मतिः क्व निराकुलत्वम् ।
कुत्र क्षमत्वमपि ते क्व निरालसत्वं, क्रन्दन्तमन्तकभयात् समुपेक्षसे यत् ॥५२॥
क्रोधस्तवाऽस्ति मयि किं किमु वा तवेर्ष्या, किं निर्दयत्वमथवा मयि भाग्यदोषात् ।
हुङ्कारमात्रविनिवर्त्तनगर्वसारे, काले तवाऽस्ति समुपेक्षणमद्य यस्मात् ॥५३॥
इत्यादिनिष्ठुरविलापकरो हताशो, यत्किञ्चिदद्य परिपीडितविग्रहोऽहम् ।
देव ! ब्रवीमि मुहुरार्त्तिभरादयुक्तं, तत्रापि मौननियमो न निरुध्यते ते ॥५४॥
भीते भवाब्धिपतिते चरणाब्जलग्ने, भग्नप्रकामितभरेऽन्यगतिप्रहीणे ।
कस्माद् विभो ! मयि पराङ्मुखचित्तवृत्तिः, कारुण्यपुण्यहृदयो दयसे न च त्वम् ॥५५॥
स्वामिन् ! स्वभावमलिनः कुटिलोऽनवस्थः, सोऽहं तथैव च रिपुर्म्मम कालपाशः ।
तस्याऽपि तद्वदिह ते भ्रुकुटिर्म्मुनीश !, शान्त्यै गरस्य गरमेव भवेद्धि पथ्यम् ॥५६॥
किंकृत्यमेभिरपि मे पुनरुक्तशुक्तैः, खेदप्रकारिभिरसाध्यफलैर्विलापैः ।
जानन्नपीति विलपामि मुहुर्म्मुहुर्य-दीक्षे न देव ! शरणं भवतोऽन्यमेव ॥५७॥
त्वं चेत् प्रसन्नहृदयः किमु चाटुजालै-स्त्वं चेदुपेक्षणपरः किमु चाटुजालैः ।
पुण्योदये सति गुणेषु वृथैव यत्न-स्तस्मिन्नसत्यपि गुणेषु वृथैव यत्नः ॥५८॥
एवं विदन्नुपरमामि न यत् प्रलापाद्, दुःखान्मुनीश ! महिमैष तवैव दृष्टेः ।
या दन्दशूकमपि दुष्टमपि स्वभावात्, सन्त्यक्तवैरपरिशान्तमतिं करोति ॥५९॥
अप्राप्तधर्मविभवैर्मनुजैरलभ्यं, त्वन्नाम देव ! सकलार्थकरं वदन्ति ।
लब्धं मया तदपि दुर्गतिमग्न एव, नाथाऽहमस्मि परिपश्यसि भाग्यदोषम् ॥६०॥
सत्यं वदन्ति कवयोऽसदुपाश्रयेण, गुण्योऽपि याति सहसा खलु दोषभाक्त्वम् ।
या त्वत्स्मृतिः सकलपापतमोऽपहन्त्री, मां प्राप्य साऽद्य न करोति विपत्प्रणाशम् ॥६१॥
दीनाच्छ्रुतैव करुणां तव वेदनाऽन्त-रुल्लासयत्यनलहेतिमिवेश शिम्बा ।
जातैव सन्दहति तामियमित्यमुत्र, किं प्रब्रवीम्यननुरोधमधीश्वरत्वम् ॥६२॥
यन्नाथ ! पामरनरोचितमभ्यधायि, भूयोऽसमञ्जसवचोऽनुचितार्थभावम् ।
तत्रापि तेऽतिरुचिरा रुचिरीश ! युक्ता, किं कीशचापलमपि प्रभुमोददं न ॥६३॥

स्तेनैः प्रपीडितमपि श्वसनाशदष्टं, दस्युप्रबाधितमपि ग्रसितं ग्रहैश्च ।
शार्दूलभीतमपि रोषभरैः समेतैः, क्षोणीशपुरुषचयैः परिपीड्यमानम् ॥६४॥
भूतैरुपद्रुतमपि द्रुतमम्भसां च, पूरैः प्रभीतमपि मग्नमपि प्रघोरे ।
सङ्ग्रामकेऽपि पतितं वनपावकेऽपि, प्राकृष्यमाणमपि कालभटेन दीनम् ॥६५॥
वज्रप्रभीतमपि हालहलाकुलं को, माद्यद्गजाकुलमनाथमहो त्वदन्यः ।
त्रातुं प्रभो ! प्रभुरिहाऽस्ति नरोऽसुरो वा, देवोऽथवा घनकृपामृतवारिनाथ ! ॥६६॥ [त्रिभिर्विशेषकम्]
यद्दर्शनं दुरितदुःखतृणानलं स्याद्, यस्य स्मृतिर्भवसमुद्रतरिर्ज्जनानाम् ।
तं देवदैत्यमहितं रहितं च दोषै-र्जन्तोर्हितं प्रभुमहं शरणं श्रयामि ॥६७॥
ये त्वत्पदाम्बुजयुगं परिहाय देव !, धावन्ति देवमपरं शरणं विमूढाः ।
ते जाह्नवीं परिविहाय तृषाऽभिभूता, धावन्ति नाथ सततं मृगतृष्णिकायाम् ॥६८॥
नाथाऽतिशुद्धचरितस्य तव प्रशस्ति-गीतामृतेषु दृढरागवती मदीया ।
वाणी मृगीव न पदात् पदमप्यहो सा, गन्तुं क्षमा दृढतरप्रतिबध्यमाना ॥६९॥
संसारघोरदवपावकपीड्यमान-वाक्कायशान्तिकरणैकमहौषधानि ।
भोगापवर्गवशकारणकार्मणानि, पार्श्वस्य पूजननमस्करणान्यवन्ति ॥७०॥
त्वत्पादपङ्कजनकद्युतिवारिधारा, ध्यानेन मे मनसि नाथ मुहुः प्रदत्ता ।
किं कारणं दुरितपङ्ककलङ्कमेषा, न क्षालयत्यमरपूज्यपदारविन्द ! ॥७१॥
दुष्कालसङ्कटकटाहविभृज्यमान-जन्तुव्रजस्य मदर्दविविघट्टितस्य ।
विश्वत्रयाभ्युदयजन्म वपुस्तवेश, त्वेका गतिर्भवति शान्तिविधानदक्षा ॥७२॥
संसारमारवपथप्रथमानताप-व्यापद्धतिप्रथितचारुमहीरुहस्य ।
भोगापवर्गफलदानसमुद्यतस्य, पादं श्रयामि तव कामनिदाघतप्तः ॥७३॥
अम्भोजगर्भसुकुमारतरोऽपि देव !, पादस्तवाऽयमतिचित्रचरित्रशाली ।
यत् पापशैलमनुचिन्तित एव सद्यः, प्रस्फोटयत्यलमनन्तदृढं महोच्चम् ॥७४॥
त्वां ते विना त्रिभुवनैकपतिं परेशं, मर्त्त्याः कुबोधकुटिलाः शरणप्रहीणाः ।
पारं प्रयान्ति न च भीतिभरा मुनीश !, तृष्णातिघोरजलधेः प्रविभिन्नमार्गाः ॥७५॥
त्वन्नाममन्त्रवर एष विनोपचारं, सद्यः स्मृतो विषयरागगरापहारी ।
किञ्च प्रमोहकगणक्षपणाऽभिचारो, मुक्त्यङ्गनावशकरो जयतान्मुनीश ! ॥७६॥
तृष्णे ! हताऽसि मदन ! क्षपितो बलस्ते, हा मान ! मानवसमाश्रयणं गतं ते ।
यद् भूतले प्रसरति प्रचुरं जिनेश-प्रोक्तागमोऽतिबलवानरिसङ्घहन्ता ॥७७॥
किं क्रोध ! दृप्यसि जगद् विनिहन्तुमेव, किं चेष्टसे न परिपश्यसि जैनवाचम् ।
या त्वादृशां शतमपि श्रममन्तरेण, हन्तुं प्रभुः प्रसरति क्षितिमण्डले सा ॥७८॥
किं मित्र ! मन्मथपटच्चरभीतभीत-स्त्वं दूयसे न परिपश्यसि जैनवक्त्रात् ।
निर्गत्य तत्त्वविनिवेदनघोरशस्त्रो, राजाऽयमेति सहसा ह्युपदेशनामा ॥७९॥
किं मान ! मानमुपयासि न पश्यसि त्वं, स्याद्वादयोधवरमुद्यतयुक्तिशस्त्रम् ।
यो जैनवक्त्रशिशिरांशुसुधाप्रपातात्, तत्त्वं प्रवेद्य विनिहन्ति विपक्षपक्षम् ॥८०॥

पाखण्डखण्डनविधावशनिप्रकाशा, सिद्धान्तदेशनकरी तव नाथ! वाणी ।
जीयात् समस्तजनिभाजनवाक्यजात-रूपेण पर्ययवती भुवनत्रयेऽपि ॥८१॥
प्राप्तं चिरात् सुकृतराशिबलेन नृत्वं, नैव स्थिरं न सुलभं पुनरित्यवैमि ।
कर्त्तुं निजस्य हितमीश! न चाऽपि चेष्टे, देवाऽहमस्मि करुणामय! यद्भविष्यः ॥८२॥
तस्मात् त्वमेव परिरक्ष न यावदेवा-ऽस्मान् धीवरीव नियतिः स्ववशान् करोति ।
मत्स्यानिवेश! परिजग्धुमियं कराला, मोहोग्रजालपरिवर्त्तननिःशरण्यान् ॥८३॥
त्रस्तः समस्तभयरोगदवानलेन, पार्श्वं शरण्यमिह विश्वपतिं श्रयामि ।
संसारमारवपथभ्रमणातिखिन्नो, दीनोद्धृतिप्रविततिप्रभुमद्य शान्त्यै ॥८४॥
नाथ! ब्रवीमि पुरतस्तव किं जडोऽहं, कामैकघोरवनपावकपीड्यमानः ।
शान्तिं प्रयामि न च भीत्यतिविह्वलस्त-न्मामुद्धरस्व शरणं प्रतिपद्यमानम् ॥८५॥
कान्ता न कान्तिभरनिर्ज्जितचन्द्रवक्त्राः, सौधाः सुधाधवलिता मणिकुट्टिमा मे ।
आनन्दनाय जिन यादृगयं त्वदीय-वक्त्रोद्भवो भवहरो वचनप्रकर्षः ॥८६॥
माकन्द! गच्छ भवता न ममाऽस्ति मोदो, द्राक्षे नु काऽद्य भवती विरसा सुधाऽपि ।
यज्जैनवक्त्रशिशिरांशुसुधापवित्र-स्याद्वादपानसुहितौ श्रवणौ किमन्यैः ॥८७॥
येऽन्ये जिन! त्वदुपदेशसुधां विहाय, संसाररोगभरनाशमिहेहमानाः ।
अन्यागमेषु विहरन्ति विहाय मन्दा-स्ते गांखरं समुपयान्ति पयोऽर्थिनस्तु ॥८८॥
कालः कदा स भविता करुणापयोधे!, यत्राऽन्यवस्तुविमुखस्तव पादमूले ।
चेतो निवेश्य भवभीतिहरे वियुक्तः, पापैर्विमुक्तिपदवीं सहसा प्रपद्ये ॥८९॥
स्वर्गापवर्गपदवी न दवीयसी ते, पापो न पापविधये तव मित्र! शक्तः ।
यत् त्वं जिनेन्द्रपदमाश्रयसे विहाय, सर्वाणि मोहविषयाणि न तेऽद्य दुःखम् ॥९०॥
ज्ञानप्रदीपमतुलं यदि चेन्न देव!, त्वं भिन्नभिन्ननयसङ्ग्रहकारि हृद्यम् ।
स्याद्वादसंज्ञमकरिष्य इहाऽन्धकारो, मोहोद्भवो न विरतिं सहसाऽगमिष्यत् ॥९१॥
भिद्यद् विचित्रगतिदुर्न्नयहेतिजालैः, सिद्धान्ततत्त्वमुरुलोकदयाप्रधान! ।
संवर्म्य युक्तिमयसर्वनयानुगामि-स्याद्वादवर्मपटलेन दृढं त्वरक्षः ॥९२॥

किमन्यदथ ते ब्रुवे विदितविश्व! दीनस्य मे, स्फुरन्तमतिभीषणं यमभटं प्रलीनस्मृतेः ।
स्थितिश्श्लति पश्यतो गतिरपि स्खलन्ती मुहु-र्धृतिं न परिषेवते गलति चेतना कायतः ॥९३॥ [पृथिवी]

जात्यन्धोऽध्वनि सङ्कटे प्रविचलन् दीनः करालम्बनं, हित्वा चेद् विपदं भजेद् यदि तदा कोऽस्याऽपराधो भवेत् ।
धिग् धिङ् मां बत शास्त्रचक्षुषि सति प्रज्ञाप्रदीपे सति, सन्मार्गप्रतिपादके सति गुरावप्यन्धुपातोन्मुखः ॥९४॥
[शार्दूल०]

त्राता नाऽस्ति पथे तु यत्र विषमे तत्र प्रहारोन्मुखा, द्वेष्टारो यदि वर्म्मिता भवति कस्तत्राऽतिशक्यक्रियः ।
यत्र त्वं करुणार्णवस्त्रिभुवनत्राणप्रवीणः प्रभुः, कामाद्याः प्रहरन्ति मां यदि तदा कस्यैष गर्हावहः ॥९५॥
यावद् दर्प्पविसर्प्पवामकरणस्तोमाभिरामाकृति-स्तावन्मोहतमोभरेण न मया गर्त्तः समालोकितः ।
आसन्ने पतने प्रभो! त्वदपरं कं प्रार्थये कं श्रय, आत्मद्रोहपरायणं करुणया त्रायस्व मां त्वद्वशम् ॥९६॥

बाल्यं मोहहतेन मूढचरितैर्नीतं मुधा यौवनं, वित्तोपार्ज्जनवादजल्पललितैर्व्यर्थं व्यतीतं मम ।
स्वामिन्नद्य जराकुलस्य भयदुर्द्दावानलार्त्तस्य च, मृत्युर्द्धावति यावदेन ! न विभो ! मां पाहि तावद् द्रुतम् ॥९७॥
नाथ ! त्वच्चरणाम्बुजं नहि मया सम्यक् समाराधितं, संसारार्णवलङ्घनप्रवहणं धर्म्मार्ज्जनं नो कृतम् ।
स्वर्ग्गद्वारकपाटमुद्घटयितुं नोपायमासादयं, कीदृक् स्यां परजन्मनीति सततं चिन्ता समुज्जृम्भते ॥९८॥

परमपुरुष ! न स्मृतो मया त्वं, यदिह भवामि विपत्प्रलीनबुद्धिः ।
भवजलनिधिपोतमद्य युष्मत्-स्मरणमवाप्य भवामि लुप्तदुःखः ॥९९॥ [पुष्पिताग्रा]

कदा नाथ ! ध्यानामृतरसदृढास्वादसुहितः, समुत्सृज्य क्रूराहितभयमविक्षिप्तहृदयः ।
असारं संसारं तृणमिव विचिन्त्य क्षयि सुखं, प्रसादात् ते भूयासमिह करुणाम्भोऽधिप ! विभो ! ॥१००॥
[शिखरिणी]

विना पुण्यं नाथ ! त्वदुदितवचोभक्तिरतुला, न लोकानां त्यक्त्वा तव वचनभक्तिं जिन ! न तत् ।
इति प्राप्तेऽन्योन्याश्रयविषमदोषव्यतिकरे, भवानेको वेत्ता भवति परिहारेऽत्र शरणम् ॥१०१॥

संसारापारवारान्निधितरिचरणः पापसङ्घातशैल-
ध्वंसप्रौढौपदेशाशनिरमरगणक्लृप्तपूजोपचारः ।
कारुण्याम्भःप्रवाहैः कृतसकलमनोदुःखजम्बालनाशै-
र्भूयो दृष्टिप्रपातैः सुखयतु जनतां **स्तम्भनः पार्श्वनाथः** ॥१०२॥ [स्रग्धरा]

(कविनामगर्भश्चक्रबन्धः)

**य**स्याऽतुल्यचरित्रकस्य महिमा निश्शेषसातोदयः,
**शो**कं हन्ति च यस्य सर्वमनिशं दृष्टिः सुधाजित्वरी ।
**वि**घ्नं हन्ति च संस्मृतिः सुमनसां पूज्यस्य यस्याऽनिशं,
**ज**न्मार्त्तिं प्रणिहन्तु सोऽयममलः पार्श्वो मम स्तम्भनः ॥१०१॥ [शार्दूल०]

(स्तुत्यनामगर्भो बीजपूरप्रबन्धः)

य**स्त**म्भयत्यघव्रातं, य**द्भ**जनं तु विश्रुतम् ।
य**न्न**मनं मुदे ख्यातं, यत्नात् **पार्श्वं** स्तवीमि तम् ॥१०२॥ [अनुष्टुब्]

भव्यान्तःकरणप्रचारचतुरैकान्तोक्तिरात्र्युत्थिता-ऽभ्रान्तज्ञानविरोधिविभ्रमतमोनिर्मूलैनकक्रियः ।
स्याद्वादोक्तिसहस्रपादघटनानेकान्तपद्मासमो-ल्लासः पार्श्वपरो नवो विजयते श्री**सिद्धसेनो** रविः ॥१०३॥
येन स्तम्भनपार्श्वसंस्तुतिलतादिव्यौषधी निर्मिता, स्वात्मत्राणकरी महोग्रकुरुजामाभीलतोऽथो भुवाम् ।
अन्तस्तः प्रकटीकृता भगवतो मूर्त्तिस्सुमूर्त्तिस्तथा, श्रीमान् सो**ऽभयदेव**सूरिरवतान्नित्यं सतां संस्तुतः ॥१०४॥
नव्यव्याकरणाम्बुधेर्यदुदयः संवर्द्धकः सोऽनिशं, वादीशोडुसहस्रभोपशमिता वाग्ंशुजालैर्नवः ।
भव्यान्तःकुमुदप्रमोदकुशलस्तैस्तैश्चरित्रांशुभि-र्ज्जीयात् पार्श्वपदाम्बुजैकशरणः श्री**हेमचन्द्रः** शशी ॥१०५॥
स्फीतं यस्य निरन्तरं हृदि महत् पार्श्वोक्तिनिष्ठास्पदे, साम्राज्यं किमपीह नूतनमलं वाग्देवताऽकण्टकम् ।
कृत्वाऽत्यन्तसमुन्नतिं गतवती नाऽद्याऽपि वासं परं, तादृक् प्राप्तवती **यशोविजय** इत्याख्यो गणी सोऽवतात् ॥१०६॥
श्रोत्रन्यस्तलवैव शुद्धभणितिः पीयूषवृष्टेस्समा, येषामस्ति सदा चमत्कृतिकरी ते पार्श्वभक्ता भुवि ।

तत्त्वातत्त्वविवेचनैकचतुराश्चारूक्तिबन्धादरा, धीरास्सद्धिषणाधनाः कविवरा विश्वेऽतिजिग्युर्वरम् ॥१०७॥
नव्यस्तोत्रसुपोत्रकर्षितमनोभूमीमलाग्ग्रोक्तयो, येषां ते खलरीतिपीतिदमनाः कीर्त्तिश्रिया सञ्जिताः ।
उन्निद्रोक्तिरसाभिरामरचना धन्याः क्षमामण्डनाः, श्रीपार्श्वैकपरायणास्समजयन् स्वातुल्यशक्तिश्रियः ॥१०८॥
विद्वद्वृन्दमनःप्रबोधदिवसे श्री**नेमिसूरीश्वरे**, साम्राज्यं भजति प्रभूतकरुणे विद्याविलासास्पदे ।
तच्छिष्येण **यशो**ऽभिधानमुनिना क्लृप्तेयमानन्ददा, भूयाद् भव्यजनस्य जैनचरणाम्भोजेऽर्पिता संस्तुतिः ॥१०९॥
श्रीपार्श्वस्य भणन्ति संस्तुतिमिमां ये भक्तितो भूतले, ते श्रीपुण्यसुरद्रुमारश्शमदमध्यानादिशाखाश्रिताः ।
कर्मात्यन्तविमोक्षमिष्टफलसम्प्राप्तप्रकर्षानराः, सिद्धस्थानमुपागतास्सुखरसास्वादैकमग्नाशयाः ॥११०॥
श्रीपार्श्वस्तवनिर्मितिश्रमसुखैकान्तात्मभानूदया-त्यन्ताश्लेषविकाशितासममनोराजीवपुष्पार्च्चितः ।
आनन्दात्मफलैकभूमिरमितानन्तप्रतापो मया, सोऽस्तु स्तम्भनपार्श्वनाथशरणः श्रीनेमिसूरीश्वरः ॥१११॥

॥ इति श्रीनानाजीवसंरक्षणजनितनानाशीर्वादनित्यवर्द्धिष्णुतरानिन्दितगुणगणकल्पकोट्यवधिभ्राजिष्णुजिष्णुयशः-
पूरकर्प्पूरशिशिरितदशदिशां निरवद्यहृद्यगद्यपद्यरचनाचातुरीचमत्कृतकृतिचित्तचञ्चरीकाणां
विज्ञानवैभवविद्रावितदुर्वादिविविधविवादोपद्रवनिर्बाधशुद्धसद्धर्मसद्मपद्मविबोधनैक-
समुदितदिनकरकराणां श्रीमद्विजय**नेमिसूरीश्वरा**णां पादपद्मेन्दिन्दिर-
विनेय**यशोविजय**विरचितं स्तम्भनपुरपतिपार्श्वनाथस्तवनं
पूज्यपादारविन्दानां श्रीमद्विजयनेमिसूरीश्वराणां
कृपावृष्टिसुधावृष्टिप्रभावात्
समाप्तम् ॥

## ॥ ७. श्रीगौडीपार्श्वनाथस्तोत्रम् ॥

लोकालोकप्रसारोद्धवभवनलयाक्रान्तकान्तार्थपुञ्जा-
नेकान्तत्वप्रबोधाङ्कुरजननपटुस्फीतवाग्बीजहेतुम् ।
स्तोष्ये सेन्द्रामरालिप्रथितमधुरिमोद्गारवाग्दोषमुक्ता-
मुक्तार्थस्तोत्रसार्थानुगतगुणगणं **पार्श्वगौडीश**माप्तम् ॥१॥ (स्रग्धराच्छन्दः)

वाचा निर्मलया सुधामधुरया शिक्षाक्रमप्राप्तया,
शुद्धान्तःकरणेन शुद्धवपुषा मूर्ध्नाऽवनम्रेण च ।
भक्त्या पापशिलाशनिप्रतिमया स्तोत्रैः पवित्रैस्तथा,
श्री**गौडीपतिपार्श्वनाथ**मनिशं मुक्तिश्रियेऽहं स्तुवे ॥२॥ (शार्दूलविक्रीडितम्)

कीलाभिर्भुवनं प्रताप्य सहसा कामानलो जृम्भते,
मोहाहिर्ग्रसितुं जगन्ति बहुधा रूपाणि धत्ते मुहुः ।
किङ्कर्त्तव्यमिहेति यावदिति मे चिन्ता समुन्मीलति,
तावत् सर्वविपन्निवारणकरी गौडीशभक्तिः श्रुता ॥३॥

तन्नेत्रं वदनं तदेव चरणौ तावेव हस्तौ च तौ,
यत् त्वद्वक्त्रनिरीक्षणेन भवतः स्तुत्या कृतार्थं भवेत् ।
पार्श्व ! त्वत्प्रतिबिम्बदर्शनकृते कण्डूयमानौ च यौ,
यौ त्वत्स्तोत्रसुमाञ्जलीविरचनाबद्धादरौ सर्वदा ॥४॥

त्वामिन्दुप्रतिमद्विजावलिविभास्फीतोपदेशामृता-
सेकोज्जीवितधर्मकल्पलतिकं ये नाऽऽश्रयन्ते जनाः ।
मूढा आपदुदन्वतः कथमहो पारं गमिष्यन्ति ते,
घोरं मोहविषं निपीय हृदयप्रोद्दामदाहातुराः ॥५॥

मा विज्ञानमुपास्व मा च बहुधा घोरं तपः सञ्चिनु,
कष्टं मा बहुतीर्थपर्यटनतः स्वात्मानमायासय ।
किन्त्वेकं सकलापदुद्धृतिकरं गौडीशपार्श्वप्रभोः,
पादाम्भोजयुगं विचिन्तय सकृत् सर्वं सखे ! प्राप्स्यसि ॥६॥
यस्य ध्यानपरायणे जिनजने तिष्ठन्ति षट् शत्रवो,
नाऽऽधिव्याधिमुखास्तदा परिणतास्तैर्नेति किं ब्रूमहे ।
नित्यानन्दघने सुधर्मविपिनेऽजस्रं रमन्ते जना-
स्तं वृन्दारकवृन्दवन्दितपदं गौडीशपार्श्वं स्तुवे ॥७॥
त्वत्सौन्दर्यनिरूपणेषु निपुणे नेत्रे मम स्तां प्रभो !,
श्रोत्रे स्तां श्रवणानुरागसिके युष्मद्गुणाकर्णने ।
त्वद्ध्यानामृतसिन्धुमज्जनरतिश्चेतश्चमत्कारिणी,
श्रीपार्श्वार्च्चनचातुरी चरणयोरास्तां च ते हस्तयोः ॥८॥
यन्नित्यं समुपासते सुमनसस्तन्वन्ति दिव्यस्तवैः,
कुर्वन्त्यर्च्चनकर्म नन्दनवनोद्भूतप्रसूनैरपि ।
ध्यानव्यापृतिपूरितेन मनसा पश्यन्ति यं योगिन-
स्तं गौडीश्वरपार्श्वदेवमनिशं वन्दे विमुक्तिश्रिये ॥९॥

मनोतु मम मानसं सकलसारशून्यं जगद्, दुनोतु न रिपुव्रजः प्रशमसेकशुद्धं मनः ।
तनोतु मम मङ्गलं सकलकर्ममर्मोद्भिदः, करोतु मम चेतसि प्रबलशान्तिसौख्यं जिनः ॥१०॥

(पृथ्वीच्छन्दः)

भवेदनुपमा मतिर्निखिलतत्त्वविद्योतिका, रुचिर्भवति तत्त्वतस्त्वदुपदर्शिते सत्पथे ।
किमन्यदिह ते ब्रुवे शुभमयं जगज्जायते, प्रमोचन ! विलोचने तव कृपास्पदे देहिनाम् ॥११॥
अमन्दमणिमण्डलीविमलहेमसिंहासने, स्थितं तव वपुः स्फुटं स्फुटितहाटकश्रीहरम् ।
समस्तसुरसंहिते सुरपतौ स्तुते सुन्दरं, त्रिलोककुशलं मम प्रणिकरोतु पुण्योदयम् ॥१२॥
अपारपरितापकृद्भवतपातपान्धा वयं, प्रपामिव सुशीतलां तव कृपामुपासीमहि ।
यया समवदेशिता श्रयति तां सदा सम्पदा, दयामृतविवर्षिणीं मयि जिनेन्द्र ! दृष्टिं कुरु ॥१३॥
सुभव्यजनतोदधेः समदिनेषु संवर्द्धके, सदैव सकलाकले द्विविधपक्षसत्पक्षके ।
प्रतिक्षणसुलक्षणेऽललितलक्ष्मणालक्षिते, तवाऽऽस्यनवचन्दिरे मम मनश्चकोरायताम् ॥१४॥
समस्तजनमोददा जलजसर्वगर्वच्छिदा, ज्वलज्ज्वलनजित्वरज्वरभरत्वराभञ्जिकाः ।
जगत्त्रितयरञ्जिकास्त्रिविधदुःखबम्भञ्जिका, दिशन्तु मम काङ्क्षितं तव दृशः सुधासोदराः ॥१५॥
रमा कृतपदा सदा भवति तस्य गेहे सुखं, सुरास्सततमेव तं प्रणिभजन्ति पुण्योदयात् ।
रिपुर्भवति मित्रवद् भवति शारदाऽन्तःस्थिता, न्वपारभवसागरप्रवहणं तु यस्त्वां भजेत् ॥१६॥

व्रजन्ति विपदस्ततो झटिति सम्पदस्तं श्रय-न्त्यनन्तसुखभुक् तदा स इति किं वृथाऽन्यद् ब्रुवे ।
सुरासुरसुवन्दिते सकलशर्मसम्पादके, त्वदीयचरणाम्बुजे भवति यस्य भक्तिर्दृढम् ॥१७॥
ज्वलन्नानाकष्टे कलिकलुषतो दुर्दिनतमे, परिभ्रष्टे मार्गे सततवसता मोहतमसा ।
जराव्याघ्रीभीमे विषयविषकुञ्जैः परिवृते, स मे पार्श्वो भूयाच्छरणमिह संसारविपिने ॥१८॥ (शिखरिणी)
अघव्रातोद्भूतप्रबलतरदुःखानलभर-प्रदग्धान्तर्वृत्तेर्गतगुणततेर्भव्यभविनः ।
असारे संसारे भवति शरणं यस्य चरणं, स्तुवे पार्श्वं गौडीपुरपतिमहं तं प्रतिदिनम् ॥१९॥
अबुद्धिर्मन्दात्मा शमदमदयाद्यैर्विरहितो, गुणैर्नित्यं पार्श्वस्तवनविमुखस्तेऽन्यजनुषि ।
तथाऽपि त्वं बाले मयि जिन कृपां चेत् तु तनुषे, मदन्यो धन्यः को भुवि दिवि तदाऽनन्यशरणे ॥२०॥
त्रिलोकीसंराजे समवसरणे स्वर्णरचिते, यथौचित्यं स्थाने निविशति गणे सद्विविषताम् ।
सुखश्रेण्या वाण्या शिवसुखमनन्तं दिशति यः, स मे पार्श्वो दत्तात् स्मृतिपथमुपेतः शमसुखम् ॥२१॥
तपोभिः किं किं तैरसमसमयाभ्यासकलितैः, क्रियाणां कष्टैः किं किमिति विरसाहारकरणैः ।
विवेकैरेकैः किं किममरसुखैर्दुःखकलितै-स्तवैकं मे भूयाच्चरणमिह शश्वत् तु शरणम् ॥२२॥
जगन्मायामूढं भवभयविभीतं समवितुं, त्वदन्यो धन्यः को भवति भुवने पूर्णविभवः ।
त्वमेवाऽतस्त्रातस्त्रिभुवनपते ! मामपि परं, सदा दक्षो रक्षोद्गतभयमनीशं त्वशरणम् ॥२३॥
अनाथानां नाथो गतिरगतिकानां जिनपते !, विबन्धूनां बन्धुर्मतिरमतिकानां शुभमते ! ।
असातानां सातं त्वमसि च गुणो निर्गुणनृणा-मविद्यानां विद्या त्वमसि च धनं निर्द्धननृणाम् ॥२४॥
भवानेको बन्धुर्भवति च भवानेव पितरौ, भवानेको भ्राता भवति च भवानेव सुगुरुः ।
भवानेको देवो भवति च भवानेव भवनं, भवानेको धर्मो निधिरपि भवानेव भुवने ॥२५॥
विविधधनसुसाध्यं वस्तुजातं जनानां, न हि निजपरितृप्तः प्रेक्षसे भक्तिभाजाम् ।
इति धननिरपेक्षोऽप्यर्थयुक्तैरमीभी, रुचिरवचनपुष्पैरर्चनं ते तनोमि ॥२६॥ (मालिनी)
श्लथयति भवबन्धान् जन्मजालप्रबद्धान्, स्मृतिरनुभवभाजां यस्य चित्तोपनद्धा ।
अनुपमसुखसिद्धिर्यत्प्रसादात् स एको, जयति जगति गौडीपार्श्वनाथो जिनेन्द्रः ॥२७॥
मुखसितकरमध्ये दीप्यमानप्रकाशं, विकसितमनिशं तल्लीनताराद्विरेफम् ।
कमलकुमुदधर्माद्वैतसाम्राज्यराजं, दिशतु मम शिवं ते नेत्रपद्मं नवीनम् ॥२८॥
दिनकरकरयोगायोगतोऽमुक्तशोभं, नयनयुगलचन्द्राद्वैतमैत्रीप्रबोधम् ।
कचनिकरतमोन्तर्द्दीप्यमानं नवीनं, जयतु तव मुखाब्जं दत्तहर्षप्रकर्षम् ॥२९॥
विविधजनसुवाञ्छापूरणे पारिजातं, निजशरणमुपेतू रक्षणेष्वाशु दक्षम् ।
भयभरभवकूपोद्धारणे रज्जुमेकं, त्रिभुवनजनवन्द्यं हस्तयुग्मं स्तवीमि ॥३०॥
नखनिकरनिशेशज्योतिरुद्योतिताशं, त्रिभुवनजनपुञ्जक्षान्तिसान्द्रार्द्रदृष्ट्या ।
तलमपि मृदुरक्तं यस्य नित्यं तदीज्यं, सविनयमथ वन्दे पादयुग्मं तवेश ! ॥३१॥
प्रतिपलमिह मानं त्वायुषो नाशमेति, शिथिलयति जरान्ते मन्दिरं चेन्द्रियाणाम् ।
इति बत शतकृत्वश्चिन्तयित्वा त्वरस्व, भज भज परभक्त्या मित्र! गौडीशपार्श्वम् ॥३२॥

जयति जयति गौडीपार्श्वनाथो जिनेन्द्रो, जयति जयति बिम्बं तस्य देवस्य नित्यम् ।
जयति जयति धन्यस्सोऽपि भक्तस्तयोर्य, इह जगति किमन्यद् धन्यमावर्ण्णनीयम् ॥३३॥

प्रोद्यत्कर्मानिलौघप्रबलतरदुरावेगसद्योनिरोधे,
स्थूलाद्रीयन् प्रकृत्या जगति निजजनान् सान्त्वयन् शान्तिवृष्ट्या ।
सर्वत्राऽऽपातरम्ये विषयसुखरसे दापयन् प्रीतिरीर्तिं,
नित्यं पायादपायात् पुरुषपरफलप्रापकः पार्श्वनाथः ॥३४॥ (स्रग्धरा)

त्वं चित्त ! ब्रूहि सत्यं मधुरमधुदधिस्वच्छपानीयदुग्ध-
द्राक्षापीयूषपानं कृतमिह बहुधा कर्मबन्धप्रसादात् ।
कर्म्मोच्छेदैकहेतोः कथय मधुरिमा यस्त्वयाऽऽप्तोंऽशमात्रं,
गौडीशस्य स्तुतौ स भ्रमणरसिक! किं दृष्टपूर्वोऽपि तेषु ॥३५॥

दैवाद् गौडीशनाथं भवरटनपटो ! स्वीयवृत्त्योपलब्धं,
किं निःशङ्कं यथेष्टस्मृतिपथमनिशं नो करोष्यज्ञ ! चित्त ! ॥
क्रोधाद्यास्त्वाममित्रं निजविमुखतया चेद् विजानीयुरेते,
कुर्युः किं त्वां तदा नो जिनपतिविमुखं स्वीयदुष्टप्रचारैः ॥३६॥

(कविनामगर्भश्चक्रबन्धः)

**य**स्सत्त्वैकहितः सतां वितनुते पार्श्वस्स सौख्योदयं,
**शो**भां भास्करसोदरां सुतनुते भव्याब्जकोशोद्भिदि ।
**वि**ज्ञानप्रविदानपण्डितवरो रागोरुनागोद्धरि-
**र्ज**न्मार्त्तिप्रविभेदकोऽग्र्यतनुको निर्वेदको रक्षतु ॥३७॥ (शार्दूलविक्रीडितम्)

(स्तुत्यनामगर्भो बीजपूरप्रबन्धः)

यस्य **गौः** पाति संसारं, यस्यो**ड्डी**नं यशो वरम् ।
यस्य **श**क्तिरवेन्नारं, यत्नात् सोऽस्तु श्रिये परम् ॥३८॥ (अनुष्टुप्)

श्रीगौडीपतिपार्श्वसंस्तुतिमिमां गायन्ति शृण्वन्ति ये,
ते पार्श्वैकपरायणा भुवि नरास्त्राणप्रवीणा वराः ।
आर्त्तिं शल्यनिभां निहत्य सकलां शान्तिश्रियाऽऽलिङ्गिताः,
ख्यातिं निश्चितमश्नुवन्ति भुवने सिद्धिं च ते विन्दते ॥३९॥ (शार्दूल०)

श्रीमन्**नेमीश्वर**गुरुवरोत्कृष्टपादप्रसादा-देवं **गौडीपुर**पतिवरस्संस्तुतः **पार्श्वनाथः** ।
मोहध्वान्तप्रमथनपटुः पण्डितः पुण्यदाने, दोषप्लोषं विकिरतु सतां सत्यमार्गप्रदाता ॥४०॥
(मन्दाक्रान्ता)

मायामोहतमोविमोहितदृशामाशापिपासाकुल-
स्वान्तानां परितो गवेषितशमानन्दामृतानां नृणाम् ।

श्री**नेमीश्वरसूरि**राज्यसमये **पार्श्व**स्तुतिस्संस्तुता,
भूयाच्छान्तिकरी प्रपूर्णमनसां नित्यं तु पार्श्वस्तुतौ ॥४१॥ (शार्दूल०)

गौडीशस्तुतितो न किञ्चिदपरं याचे फलं लौकिकं,
नो वाऽलौकिकमिष्टदेव ! भवतः किन्त्वेकमेवाऽस्तु मे ।
तत्त्वातत्त्वविवेचनैकचतुरस्याऽऽत्यन्तिकं भावतः,
श्रीनेमीश्वरसद्गुरोः शमनिधेरानन्दपूर्णं मनः ॥४२॥

॥ इति श्रीदुर्ललितसकलदुरितोद्वेगदुर्व्वेगसरित्पयोऽपारपूरविप्रोषभीष्मग्रीष्मायमाण-संसारमारवपथप्रथमाना-नल्पकुविकल्पोद्गच्छदतुच्छदुःखदावानलप्रशमनैकधाराधरायमाण-संसर्प्पत्सपत्नषड्वर्गदर्प्पज्वरभर-विदारणागदङ्कारायमाण-जिनवरवरचरणस्मरणप्रसादसन्दर्भनिर्भरगभीरगीर्भ्रमन्मन्थक्ष्माभृद्-धुमधुमितसिन्धुप्रतिभटायमान-श्रीम**द्विजयनेमिसूरीश्वरा**णां चरणचञ्चरीकायमाणविनेय**यशोविजय**विरचितं **श्रीगौडीपुरपतिपार्श्वनाथस्तवनं** पूज्यपादारविन्दानां गुरुवराणां श्रीमद्विजयनेमिसूरीश्वराणां प्रसादात् समाप्तम् ॥

## ॥ ८. पादिबन्धाख्येन चित्रकाव्यभेदेन श्रीपार्श्वनाथस्तोत्रम् ॥

पुण्यपुञ्जपरिपूरितैः परैः, पूरुषैः प्रपरिपूजितः परम् ।
पापपुञ्जपरिपेषणे पटुः, पावनः परमपूरुषः परः ॥१॥ [रथोद्धता]
पूज्यपादपरमप्रियः प्रभुः, प्रेमपाशपरिपन्थिपेषणः ।
पद्मपङ्क्तिपरिपेलवः परं, पीडितप्लवपिषः प्रपाटवः ॥२॥
पादपांशुपविता प्रतिश्रयः, प्राणिनां प्रशमपेटकप्रदः ।
पार्थिवप्रणतपादपद्मकः, प्रार्थितप्रददपारिजातकः ॥३॥
पातु पापपटलात् परिग्रहं, प्रत्यजन् परिहरन् प्रपीडनम् ।
प्राणिनां प्रमदपूरणः पतिः, पारगः प्रभवपाथसः प्रभुः ॥४॥
प्राणिनां प्रियपदप्ररोपकः, पारिजातपरताप्रणोदकः ।
पूज्यपङ्क्तिपरिपूजितः प्रियः, पार्श्वपारगतपूरुषः परः ॥५॥ पञ्चभिः कुलकम् ॥
पार्श्वनाथपदपङ्कजं परं, प्राणिनां परपथप्रकाशकम् ।
पावनं परमपूरुषप्रियं, पातु पापपटलप्रमोचकम् ॥६॥
पिष्टपेषणपटुत्वपूरितः, पेषयेत् प्रथमतः प्रपिष्टकम् ।
पूर्वदेवपुरुहूतपार्थिवैः, पूजितं प्रभुपदं प्रपूजये ॥७॥
पूज्यः पण्डितपर्षदां परपथप्राभासकः पालकः,
पीयूषप्रविपातपावनपदः पूर्णप्रभः प्राणिनाम् ।
पाद्यैः पूजितपादकः परपथः प्राप्तप्रकर्षः प्रभुः,
पार्श्वः पातु परप्रभावपरमः पापात् परं प्राणिनाम् ॥८॥ [शार्दूल०]

(कविनामगर्भश्चक्रबन्धः)

**य**स्मात् प्रापुरशेषशोककलहक्रोधव्रजा अत्ययं,
**शो**भाभासितभूघनप्रकलितो विश्वप्रपूज्यो मुनिः ।

**वि**घ्नैर्वन्दितपूज्यपादकमलः पार्श्वः सतां वल्लभो,
**जन्**तुक्षेमकरो वरस्सकनकाभासः श्रिये स्तान्मम ॥९॥

सर्वेऽखर्वकुगर्वपर्वरहिताः प्राज्ञाः प्रियं प्राणिनां,
सर्प्पद्दर्पहरं वरं शिवकरं सारं सदा सादरम् ।
श्रीपार्श्वस्य नवं नवं नवनरा भक्त्या भवच्छेदनं,
कण्ठाग्रे कलयन्तु कौतुककरं कौटिल्यकुण्ठा इदम् ॥१०॥

पादिप्रबन्धकलिता वचनावलीयं, पार्श्वस्य पादकमले भ्रमरावलीव ।
भूयात् सदा सुखमधुक्षरणा निविष्टा, स्वाराधनैकनिपुणस्य बुधस्य चित्ते ॥११॥

॥ इति श्रीविततपाण्डित्यताण्डवताण्डवितकीर्त्तिकौमोदीकश्रीमद्विजय**नेमिसूरीश्वर**-
पादपद्मनिर्यन्मकरन्दबिन्दुतुन्दिलचित्तभ्रमर**यशोविजय**विरचितं
पादिपदकदम्बमयं पार्श्वाष्टकं स्तोत्रं समाप्तम् ॥

## ॥ ९. निर्दन्त्यबन्धाख्येन चित्रकाव्यभेदेन श्रीपार्श्वेश्वरस्तोत्रम् ॥

श्रीपार्श्वं प्रणमामि पापहरणं मायाविघट्टं परं,
गाम्भीर्येऽपरमर्णवं प्रभुमहं गीर्वाणपूज्यक्रमम् ।
श्रीशुभ्रांशुमुखं परं गुणकरीं जीवे घृणां शेमुषीं,
कुर्वाणं जडभावचूर्णकवरं चञ्चूर्यमाणागमम् ॥१॥ [शार्दूल०]

आचारेशमहं कृपापरिणमज्जीवोपकारक्षमै-
र्वाक्यैः पापघटाविघट्टकमहावेगप्रभावाकरैः ।
जीवेषूरुगुणप्रवाहचयमाचक्राणमिष्टं भुवि,
विश्वव्यापियशोभरं च महये श्रीपार्श्वमीड्यं प्रभुम् ॥२॥

गीर्वाणेशकिरीटकोटिकषणाचेक्रीयमाणारुणं,
विश्वश्रेष्ठगुणं क्रमप्रभवकं बिभ्राणमाढ्यं रुचा ।
श्री**शङ्खेश्वर**मण्डकं भविभरप्रेमैकगेहं परं,
श्रीयोगीश्वरशक्रभूपरिवृढैः पूज्यं महर्षिं श्रये ॥३॥

विश्वेऽपारभवार्णवप्रवहण ! श्रीशूकवारीश्वर !,
विश्वे मोहमहीरुहोरुपरशो ! रोषाचरे शम्बक ! ।
प्रौढश्रीगुणराजिपङ्कजगणेऽवश्यायराशिं विभो !,
मायां मे हर विज्ञ ! पूरुषवर ! प्राणप्रियेश ! प्रभो ! ॥४॥

श्रीमोहापहरं परं प्रभुमहं पुण्येशमीशं श्रियां,
वाग्पीयूषविवर्षकं परशिवप्रायं परं प्राणिनाम् ।
श्रीमारप्रविणाशमेव वपुषा श्रीहाटकश्रीहर-
मीडे पार्श्वविभुं च पूरुषवरं श्रीपूरुषेड्यश्रियम् ॥५॥

श्रीकाम्यं शशिभाभमीशममरैः पूज्यक्रमाम्भोरुहं,
कार्याकार्यविवेचकागमवरं पुण्यप्रवाहार्णवम् ।
गेयं मेघगभीरघोषमपरं भव्याम्बुजाहर्मणिं,
श्रीपार्श्वं प्रणमामि भीभरहरं वाचंयमेशं परम् ॥६॥

मां मायापरिमोहरोहभयकं कम्प्रं रुजारौरवैः,
कष्टव्यूहविशारणैकपटुकश्रेयोभरभ्राजक ! ।
वामामव्रजपङ्कशोषकरणप्रौढार्कबिम्बोपम !,
प्रज्ञापाटवमीश ! यच्छ परमब्रह्मैकरूप ! प्रभो ! ॥७॥

ज्ञेयाज्ञेयविवेचकं प्रभुमहं पाद्यप्रपूज्यं परं,
बिभ्राणं गुणराजिगौरववरं क्षीणाष्टकर्मव्रजम् ।
श्रीपार्श्वं परिबृंहणं शमयमश्रेण्याश्च वाण्याश्चयै-
रीडे विश्वविभुं विवेकिशरणं कर्मव्रजाच्छोटकम् ॥८॥

श्री**नेमीश्वरसूरि**राज्यसमये प्रौढप्रभावाकरे,
तेषां पूर्णपरप्रसादमहिमाभ्राजिष्णुना जिष्णुना ।
तच्छिष्येण नुतो **यशोविजय** इत्याख्याभृता साधुना,
निर्दन्त्यार्णपदैः स्तुतः प्रभुरिति श्रेयो विधत्तात् सताम् ॥९॥

(कविनामगर्भश्चक्रबन्धः)

**य**स्मान्मोहमहीरुहोरुपरशोः सञ्जायतेऽघात्ययः,
**शो**रीर्येण सुशोभितश्च परितः पापौघशैलाशनिः ।
**वि**द्यावैभववर्द्धकः प्रपवनः पार्श्वः श्रियां दायको,
**ज**न्माद्यार्तिमिमां प्रभिद्य परमं स्थानं विधत्तान्मम ॥१०॥
निर्दन्त्यार्णपदप्रबन्धपरमानन्दप्रदानोद्यतां,
पार्श्वाशेषगुणैकरत्नरचनाचित्रीकृतान्तर्मतिम् ।
श्रीपार्श्वस्य पठन्तु संस्तुतिमिमां भव्याम्बुजाहःप्रभां,
निःशेषव्यसनौघनाशनकृते मात्सर्यमुक्ता बुधाः ॥११॥

॥ इति श्रीशकलितसकलकलहकोलाहलकपटकुलकलङ्कशैलकूटप्रविघट्टनप्रकटकौशल-कुलिशायमान-निःशेषशेमुषीसमुन्मेषपराजितापरापराजितनिर्जराचार्यवर्या-ऽऽचार्यवर्य-श्रीमद्विजय**नेमिसूरीश्वर**पादपद्मेन्दिन्दिरायमाणविनेय**यशोविजय**विरचितं निर्दन्त्यपदकदम्बमयं पार्श्वाष्टकं स्तोत्रं समाप्तम् ॥

## ॥ १०. शरणगतोद्धरणाख्यं श्रीपार्श्वेश्वरस्तोत्रम् ॥

(कविजगद्धररचित-हरस्तोत्रानुकारि)

(हरिगीतं छन्दः)

भववनभ्रमजनितदिग्भ्रमसततमानससंभ्रमं, विगतचेतनमसमचेतनगुणनिकेतन ! **पार्श्व** ! माम् ।
विशदशारदकुमुदबान्धववदन ! मन्दिरमापदां, सदयमुद्धर जिन ! **यशो**ऽभिधमशरणं शरणागतम् ॥१॥
दुरितभेदन ! विविधवेदनमसमखेदनवापदं, मदनमर्द्दन ! मदविमर्द्दन ! दुरिततर्द्दन ! निर्द्दयम् ।
लसदुपासन ! विततशासन ! विततवासनमानसं, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥२॥
भुवनभूषण ! विहतदूषण ! कुमतिसंहतिपूषणं, भुवनपावन ! विगतभावनविषयधावनलोलुभम् ।
भयविभञ्जन ! भविकरञ्जन ! वरनिरञ्जनपूजन !, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥३॥
भविकबोधक ! विषयरोधक ! विगतबोधकचित्तकं, समयबोधन ! सकलशोधन ! विविधबाधनसाधनम् ।
भवविमोचन ! विगतशोचन ! विमललोचन ! चञ्चलं, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥४॥
गुणसमुद्र ! महत्त्वमुद्र ! विनिद्रसम्पदमुद्रण !, सकलसज्जनजननतारणचरणचारणकारण ! ।
असमसंवर ! भविजनम्भर ! विजितशम्बरशातन !, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥५॥
ज्वलदनर्गलभवदवानलविकलकल्मषभाजनं, कपटकौशलकलितपाकलफलितकर्म्मविपाककम् ।
लसितलालसललितलाघवदलितबोधबलोदयं, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥६॥
गुणविवर्जितविबुधतर्जितशमविसर्जितमानसं, भयहुताशनशमितशासनमसदुपासनलालसम् ।
कुगतिसङ्गतिलसदसन्मतिसततसद्गतिवर्जितं, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥७॥
अरिपटच्चरहठविलुण्ठितचटुलचेतनविह्वलं, मतिविवर्जितचिरतरार्जितनियतितर्जितसत्क्रियम् ।
कृतकराञ्जलिमघदवावलिविकलितालसचेतसं, सदयमुद्धर जिन ! यशोऽभिधमशरणं शरणागतम् ॥८॥

॥ इति श्रीशकलितसकलकलहकोलाहलकपटकुलकलङ्कशैलकूटप्रविघट्टनप्रकटकौशलकुलिशायमान-
निःशेषशेमुषीसमुन्मेषपराजितापरापराजितनिर्जराचार्यवर्या-ऽऽचार्यवर्यश्रीमद्विजय**नेमिसूरीश्वर**-
पादपद्मेन्दिन्दिरायमाणविनेय**यशोविजय**विरचितं
**शरणगतोद्धरणा**ख्यं स्तोत्रं समाप्तम् ॥

## ॥ ११. स्तुतिफलप्रशंसाख्यं श्रीपार्श्वनाथस्तोत्रम् ॥

ते सर्वदैव भुवने न च शोचयन्ति, क्लेशापदं सपदि ते प्रविमोचयन्ति ।
तान् वैरिणोऽपि वचनैर्न च वञ्चयन्ति, ये त्वां सुपुष्परचनैररमर्चयन्ति ॥१॥
ते कर्मरज्जुनिगडं त्वतिखण्डयन्ति, सूक्तैर्विदग्धसमितिं सुविमण्डयन्ति ।
ते वैरिचक्रमपि चाऽत्र न चण्डयन्ति, ये त्वत्स्तवेन दुरितं त्वतितुण्डयन्ति ॥२॥
विघ्नव्रजं सततमेव निवारयन्ति, बुद्ध्या त एव सदसच्च विचारयन्ति ।
आपत्तितिं जिनवर! प्रविदारयन्ति, त्वद्भक्तिमेव हृदि ये प्रविधारयन्ति ॥३॥
ते सिद्धिसौधगमने परितूरयन्ति, संसारघोरविपिनं परिचूरयन्ति ।
ते लोभमित्रनिवहं परिशूरयन्ति, ये त्वन्नवस्तवभरं परिपूरयन्ति ॥४॥
पापप्रवाहमिह ते परिपीलयन्ति, पुण्यव्रजं प्रतिदिनं परिकीलयन्ति ।
कामाममार्गमनिशं परिमीलयन्ति, ये त्वन्नवस्तवभरैः परिशीलयन्ति ॥५॥
श्रोतॄन् सुधर्मवचनैर्भुवि पावयन्ति, मायालतां च विकटां परिलावयन्ति ।
तेऽल्पं जनानपि कदापि न दावयन्ति, ये त्वां सुधारसमयं हृदि भावयन्ति ॥६॥
ते तोषपोषवचनैः परितूषयन्ति, ध्यानामृतं धृतिगताः परिचूषयन्ति ।
सज्ज्ञानदानमनिशं परिपूषयन्ति, ये स्वं मनस्तव नवैः परिभूषयन्ति ॥७॥
ते पापपङ्कमनिशं परिशोषयन्ति, क्रूरान् विरोधविततानपि तोषयन्ति ।
चारित्रकन्दमतुलं परिपोषयन्ति, त्वां पार्श्व! पार्श्व इति ये परिघोषयन्ति ॥८॥
ते ज्ञानदानमनिशं प्रविदासयन्ति, शान्तिं त एव हृदये त्वधिवासयन्ति ।
दुष्कर्मकर्दममलं प्रविहासयन्ति, ये भक्तितस्तव मनः प्रविकासयन्ति ॥९॥
ते दुःखाग्निं शमदमजलैर्देव ! निर्वापयन्ति, स्वीयानेहः क्षणमपि वृथा नैव ते यापयन्ति!
संत्रस्तानामभयमनिशं सर्वतो दापयन्ति, ये त्वद्भक्तिप्रवणहृदयं सद्गणे ख्यापयन्ति ॥१०॥
ते भव्यानां भववनमहोदन्वतस्तारयन्ति, स्वं शान्ताद्यैः सकलसुरसैर्भाषितं धारयन्ति ।
विद्राव्यान्तर्भवकुविषयान् सर्वदोत्सारयन्ति, ये त्वत्स्तुत्या स्वहृदमनिशं भक्तितः पारयन्ति ॥११॥

तेऽद्रिप्रायानपि रिपुगणान् स्थानतश्चालयन्ति, स्फीतं गीतं त्वतिशययशःपूरमास्फालयन्ति ।
अंहःपङ्कं सततमिलितं स्वात्मनः क्षालयन्ति, त्वद्भक्तौ ये सततमलसं चित्तमुत्तालयन्ति ॥१२॥
ते रागादीनतिरयरिपून् सर्वतो ध्वंसयन्ति, स्वान्तं शान्तं दमयमगुणैः सर्वदोत्तंसयन्ति ।
कर्मव्रातांश्चिरतरचितानाशु विस्रंसयन्ति, ये त्वत्पादानभिनवनवैः सर्वदा शंसयन्ति ॥१३॥
ते सद्युक्तिप्रवरवचनैर्वादिनस्त्रासयन्ति, वादित्रस्तान् सदसि विमुखान् सर्वदाऽऽश्वासयन्ति ।
साधुस्वान्ताब्जवनमनिशं सर्वथोल्लासयन्ति, ये त्वत्कीर्तीः कलुषहरणीः सर्वतः कासयन्ति ॥१४॥
ते भव्यानां भवभयवतां सद्व्रतं ग्राहयन्ति, शोकाकीर्णानतिभयभरान् नित्यमुत्साहयन्ति ।
दोषारण्यं तृणमिव तपस्तेजसा दाहयन्ति, ये त्वद्भक्तिप्रगुणहृदयं कर्म निर्वाहयन्ति ॥१५॥
ते पापौघं तरुमिव परध्यानतस्तक्षयन्ति, शास्त्रव्रातान् विततगहनान् बुद्धितो लक्षयन्ति ।
सत्तृप्त्यर्थं शुभफलभरं निर्भरं भक्षयन्ति, ये त्वद्भक्तौ भविकमनुजान् सर्वदा दक्षयन्ति ॥१६॥

॥ इति श्रीविविधभयविभञ्जनसज्जनमनोऽनुरञ्जनकुजननिर्बीजगञ्जनसमस्तसहृदयशिरःश्लाघ्यसुशील-शीलितशरीरशोभस्वसौभाग्यसन्दोहसुभूषितभूतलविततगहनगम्भीरस्वपरसमयारण्यविविधविलास-पञ्चाननायमान-श्रीमद्विजय**नेमिसूरीश्वरा**णां पादपद्मेन्दिन्दिरायमाणविनेय**यशो**विरचितं **श्रीपार्श्वस्य स्तुतिफलप्रशंसास्तोत्रं** समाप्तम् ॥

## ॥ १२. महावीरस्वामिषट्त्रिंशिका ॥

अथ स्तोष्ये वीरनाथं, वावन्दितगुरुक्रमः ।
छन्दोभिर्विविधैः कैश्चि-न्मुग्धलोकप्रबोधकैः ॥१॥
गुणानसंख्याँस्तव वक्तुमीशो, मुखैः सहस्रैरपि नोरगेशः ।
किमल्पबुद्धिर्मनुजो ब्रवीतु, तथाऽपि भक्त्या मुखरीकृतोऽहम् ॥२॥

अथैकाक्षरपादमुक्तायां **श्री**वृत्तम्

**श्री**[1]श । स्याऽघम् ॥३॥

अथ त्र्यक्षरपादं मध्यायां **मृगी**वृत्तम्

नो जनाली**मृ**[2]**गी** । त्वां विना याति शम् ॥४॥

अथ त्र्यक्षरपादं मध्यायां **नारी**वृत्तम्

लोकास्ते यान्तीश ! । ध्यातारो मा**ना**[3]**री**म् ॥५॥

अथाऽष्टाक्षरपादमनुष्टुभि **समानिका**वृत्तम्

वीर ! ते **स**[4]**मानिका** च, लोष्टकाञ्चनादिकेषु ।
दृष्टिराप्त ! दुःखहार !, शान्तये ममाऽस्तु साऽथ ॥६॥

अथाऽष्टाक्षरपादमनुष्टुभि **विद्युन्माला**वृत्तम्

**विद्यु**[5]**न्माला**नाशां लक्ष्मीं, देवेच्छन्ति त्वद्ध्याशून्या ।
नो ते मर्त्या मोक्षं वीर !, मायामोहे सक्ता यान्ति ॥७॥

---

१. श्रीः स्यात् । गुश्चेत् ॥ उट्टवणिका यथा – ऽ
२. यत्र रः एव चेत् । सा मता ज्ञैर्मृगी ॥ उट्टवणिका यथा – ऽ।ऽ
३. एको मश्चेन्नारी । छन्दोज्ञैः सा ख्याता ॥ उट्टवणिका यथा – ऽऽऽ
४. पूर्वमेव रो विभाति, जस्ततो गुरुर्भवेच्च । लान्तिका समानिकेह, कीर्त्तिता बुधाग्रगण्य ! ॥ उट्टवणिका यथा – ऽ।ऽ ।ऽ। ऽ ।
५. विश्रामः स्यात्पारावारैः, सर्वे यत्र ख्याता दीर्घाः । अष्टौ वर्णाः सा शोभाढ्या, विज्ञैर्ज्ञेया विद्युन्माला ॥ उट्टवणिका यथा – ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

अथाऽष्टाक्षरपादमनुष्टुभि **चित्रपदा**वृत्तम्

**चित्र**[६]**पदा** तव वाणी, शान्तिसुखाय ममाऽस्तु ।
आप्तजनाः कविलोका, यामनिशं तु नुवन्ति ॥८॥

अथ नवाक्षरपादं बृहत्यां **भुजगशिशुभृता**वृत्तम्

तव जिनवर! भक्ता ये, न भवति किल तेषां तु ।
शमसुखदद! भीत्यै सा, **भुजँ**[७]**गशिशुभृता** भूमिः ॥९॥

अथ दशाक्षरपादं पङ्क्त्यां **मत्ता**वृत्तम्

**मत्ता**[८] लोका तव न भजन्ति, पादाम्भोजं विषयमसारम् ।
मन्वाना ये शुभफलहेतुं, ते यान्तीशाऽसुखमिह भूयः ॥१०॥

अथैकादशाक्षरपादं त्रिष्टुभि **स्वागता**वृत्तम्

नाथ! ते पदसरोजमिलिन्दा, ये जना भुवि वरा विभयास्ते ।
लब्धपुण्यभरदेव! सुरेभ्यः, **स्वाग**[९]**ता**नि सुरपूज्य! लभन्ते ॥११॥

अथैकादशाक्षरपादं त्रिष्टुभि **इन्द्रवज्रा**च्छन्दः

स्तौतीश्वरं वीरविभुं जनोऽथ, देवेन्द्रपूज्यक्रमपद्मरागम् ।
यो मानवस्तस्य तु पुण्यभाजो, नो **इन्द्र**[१०]**वज्रा**दपि भीतिरस्ति ॥१२॥

अथ द्वादशाक्षरपादं जगत्यां **वंशस्थ**वृत्तम्

सदा सु**वंश**[११]**स्थ**भवैर्जनोत्तमैः, प्रपूज्यपादाब्जयुगं मुनीश्वरम् ।
सदा महावीरजिनं जिनेश्वरं, स्तवीमि भक्तिप्रसरद्वचोभरैः ॥१३॥

---

६. या भगणेन पिनद्धा, भेन पुनः प्रविबद्धा । गद्वयतो रमणीया, चित्रपदा कथिता सा ॥
उट्टवणिका यथा – ऽ।। ऽ।। ऽ ऽ

७. नगणयुगलसन्नद्धा, मगणविततसौन्दर्या । कविकुलकथिता त्वेषा, भुजगशिशुभृता ज्ञेया ॥
उट्टवणिका यथा – ।।। ।।। ऽऽऽ

८. यस्यां पूर्वं मगणविलासः, पश्चात्तस्माद् भगणनिबन्धः । मध्ये सेन प्रविगदिता सा, विज्ञैर्मत्ता गुरुरचितान्त्या ॥
उट्टवणिका यथा – ऽऽऽ ऽ।। ।।ऽ ऽ

९. कीर्त्तितेह विबुधै रमणीया, स्वागतेति मधुराक्षरबद्धा । रेण नेन सुभगा भगणेन, सा गुरुद्वयमनोहरबन्धा ॥
उट्टवणिका यथा – ऽ।ऽ ।।। ऽ।। ऽ ऽ

१०. आदौ तयुग्मेन विराजमाना, मध्ये जकारेण विभूषिता या । अन्ते गकारद्वयमण्डिता सा, स्यादिन्द्रवज्रा विबुधप्रसिद्धा ॥ उट्टवणिका यथा – ऽऽ। ऽऽ। ।ऽ। ऽ ऽ

११. गणो जसंज्ञः प्रविभासते पुर-स्तकारनामा च परस्ततो भवेत् । ततो जकारो रगणश्च भासते, प्रतीहि वंशस्थमिदं महामते! ॥ उट्टवणिका यथा – ।ऽ। ऽऽ। ।ऽ। ऽ।ऽ

अथ द्वादशाक्षरपादं जगत्यां **प्रियंवदा**वृत्तम्

शिवसुखप्रदविभो ! **प्रियंवदाः**[१२], दिविषदो मधुररावकलिताः ।
अथ भजन्ति तमहर्निशमरं, भजति यस्तव पदाम्बुजवरम् ॥१४॥

अथ द्वादशाक्षरपादं जगत्यां **प्रमिताक्षरा**वृत्तम्

**प्रमिताक्षरां**[१३] तव वचोलहरी, बहुभक्तितो हृदयतोषकरीम् ।
बहुलप्रबोधकरवाक्यवरां, प्रभजामि तां भवभयापहराम् ॥१५॥

अथ द्वादशाक्षरपादं जगत्यां **प्रभा**वृत्तम्

द्युतिपतिशतभासमानद्युते !, मुनिवर ! भवभीप्रविध्वंसक ! ।
जिनवर ! तव सा प्रशस्त**प्रभा,**[१४] मम शमसुखदाऽस्तु वीतस्पृह ! ॥१६॥

अथ द्वादशाक्षरपादं जगत्यां **कुसुमविचित्रा**वृत्तम्

**कुसुमैर्विचित्रां**[१५] तव जिन ! पूजां, विदधति लोका निरुपमभक्त्या ।
अमरवरा ये पदयुगलस्य, विदधति सेवां शिवकर ! तेषाम् ॥१७॥

अथ त्रयोदशाक्षरपादमतिजगत्या**मतिरुचिरा**वृत्तम्

तवाऽनिशं तु सुरवरप्रपूजितो-त्तमक्रमप्रविलसदच्छकान्तिका ।
सुखाय मेऽ**स्त्वतिरुचिरा**[१६] नखावली, भवोदधिप्रवरतरिर्जिनेश्वर ! ॥१८॥

अथ त्रयोदशाक्षरपादमतिजगत्यां **मृगेन्द्रमुख**वृत्तम्

प्रकुपितमप्यथ भूतले कदाऽपि, भवति **मृगेन्द्रमुखं**[१७] न भीतिदानम् ।
तव चरणाम्बुजभक्तिरक्तचित्ता-समशमधामशरीरिणां यतीन्द्र ! ॥१९॥

---

१२. प्रथममेव नगणेन संयुता, भवति भेन विशदा बुधैर्मता । जगणरञ्जितनिबन्धशोभिता, रगणबद्धचरमा प्रियंवदा ॥ उट्टवणिका यथा – ।।। ऽ।। ।ऽ। ऽ।ऽ

१३. प्रथमं भवेत् सगणबन्धयुता, जगणप्रिया सयुगलेन युता ।
भुवि कस्य नैव सुखदाऽभिमता, प्रमिताक्षरा बुधगणप्रथिता ॥ उट्टवणिका यथा – ।।ऽ ।ऽ। ।।ऽ ।।ऽ

१४. भवति नगणसंयुता नेन या, पुनरपि विबुधप्रिया मण्डिता । रगणविरचिता प्रभाह्लादिका, स्वरशरविरतीरहृद्यान्तिमा ॥ उट्टवणिका यथा – ।।। ।।। ऽ।ऽ ऽ।ऽ

१५. नगणपिनद्धा यगणविनद्धा, पुनरपि या स्यान्नगणसुकाम्या । यगणपिनद्धान्तिकपदरम्या, बुधगदिता सा कुसुम-विचित्रा ॥ उट्टवणिका यथा – ।।। ।ऽऽ ।।। ।ऽऽ

१६. भवेत् पुरो जगणयुता ततः पुन-र्मता बुधैरिह भगणेन मण्डिता । ततो भवेत् सजगुरुराजिता वरा, चतुर्ग्रहैरतिरुचिरा प्रकीर्त्तिता ॥ उट्टवणिका यथा – ।ऽ। ऽ।। ।।ऽ ।ऽ। ऽ

१७. नगणविराजितपूर्वभागकं यद्, भवति ततो जगणस्य यत्र योगः । पुनरपि जेन सरेण मण्डितं तत्, सगुरु मृगेन्द्रमुखं बुधैर्विबोध्यम् ॥ उट्टवणिका यथा – ।।। ।ऽ। ।ऽ। ऽ।ऽ ऽ

अथ चतुर्दशाक्षरपादं शक्वर्यां **सिंहोद्धता**वृत्तम् (**वसन्ततिलका**)

नृणां क्रुधोद्धतशरीरविभाविभाजां, क्रोधोद्धतद्विपवरस्य विघातने सा ।
**सिंहोद्धता**[१८] भवति यस्य शरीरकान्तिः, सिद्धार्थनन्दनजिनः स सुखाय मेऽस्तु ॥२०॥

अथ चतुर्दशाक्षरपादं शक्वर्यां **लोला**वृत्तम्

भव्या यौवनलक्ष्मीर्विद्युद्विभ्रम**लोला**[१९], विश्वाश्चर्यचरित्रः श्रीवीरोऽतिदुरापः ।
तद् यूयं शमसारं संसारोदधितारं, विश्वेशं भजत द्राग् श्रीवीरं जिननागम् ॥२१॥

अथ पञ्चदशाक्षरपादमतिशक्वर्यां **मालिनी**वृत्तम्

जननमरणवीचिप्राप्तदुःखौघनृणां, पृथुदवथुभवोर्मी**मालिनी**[२०]ह भ्रमन्तः ।
भवति च शरणं नो वीरनाथं विनाऽन्य, इति विदधतु लोको वीरसेवां सुखालीम् ॥२२॥

अथ पञ्चदशाक्षरपादमतिशक्वर्यां **कामक्रीडा**वृत्तम्

**कामक्रीडा**[२१]मुक्तं शुद्धात्मानं देवैर्वन्द्यं तं, सौख्यावासं शुद्धज्ञानं लोकानन्दं नाथं च ।
वीरं धीरं दोषोन्मुक्तं शश्वच्छान्तं सर्वज्ञ-मीशं लोकत्रातारं दीनोद्धारं भक्त्या स्तौमि ॥२३॥

अथ षोडशाक्षरपादमष्ट्यां **गरुडरुत**वृत्तम्

सततमहं जिनेश्वरवरं भवत्रायकं, सकलभयानलोदकसमं सुनामेष्टदम् ।
तव परमं भजामि भुवनैकबन्धो ! विभो !, **गरुडरुतं**[२२] मदादिभुजगेन्द्रसन्त्रासने ॥२४॥

अथ षोडशाक्षरपादमष्ट्यां **चकिता**वृत्तम्

भीमभववनश्रेणीभ्रान्तिक्लान्तिसु**चकितो**[२३]!, भव्यवरभरा ! दारिद्र्यप्रोद्गूनतमहृदः ! ।
इच्छथ लघु चेद् गन्तुं मोहाब्धेरपरतटं, गच्छत शरणं श्रीवीरं भीताभयददनम् ॥२५॥

---

१८. सेयं तभौ जजगगा मुनिकाश्यपेन, सिंहोद्धतेति कथिता मुनिसैतवेन । उद्धर्षिणीति गदिता मधुमाधवीति, नागैर्वसन्ततिलका सकलप्रसिद्धा ॥ उट्टवणिका यथा – ऽऽ। ऽ।। ।ऽ। ।ऽ। ऽ ऽ

१९. पूर्वं मस्य निबन्धस्तस्मात् सो विनियोज्यो, मस्तस्मात् परतश्चेत् तस्माद् भस्य निवेशः । अन्ते गद्वययोगो यस्यां विबुधाह्लादी, द्विः सप्तच्छिदि लोला ज्ञेया विज्ञमता सा ॥ उट्टवणिका यथा – ऽऽऽ ।।ऽ ऽऽऽ ऽ।। ऽ ऽ

२०. नगणयुगलयुक्ता मेन मध्ये प्रयुक्ता, यगणयुगलनद्धा बद्धमोदप्रबन्धा । इह भवति न केषां हारिणी चित्त-वृत्तेर्मधुरपदविलासा मालिनी नागवाहैः ॥ उट्टवणिका यथा – ।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ

२१. लीलाखेलं केचित् प्राज्ञाः प्राहुस्तां नृत्यद्वर्णां, यां सारङ्गीं वृत्तत्वेन प्राहुर्विज्ञाः केचित् सा । कामक्रीडाख्या ख्याता छन्दोविद्भिश्छन्दोग्रन्थे, मैर्बाणैः सौन्दर्याढ्या कस्याऽन्तर्नो मोदं दत्ते ॥ उट्टवणिका यथा – ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ

२२. भवति पुरो नसंज्ञकगणो जसंज्ञकस्ततो, भगण इतः परं जगणशोभितः स्यात् तथा । भवति ततस्तसंज्ञकगणो गुरुस्ततः, परं गरुडरुतं तदा मनसि भाव्यतां मनोहरम् ॥ उट्टवणिका यथा – ।।। ।ऽ। ऽ।। ।ऽ। ऽऽ। ऽ

२३. भाभिधगण एव स्यात् पूर्वं साभिधगणतो, यत्र भवति रम्यत्वं तस्मात् स्याद् यदि मगणः । तस्य च रचना तस्माद् [वै] तस्माद् यदि नगणो, गो यदि गदिता सेयं प्राज्ञैस्तर्हि तु चकिता ॥ उट्टवणिका यथा – ऽ।। ।।ऽ ऽऽऽ ऽऽ। ।।। ऽ

अथ षोडशाक्षरपादमष्ट्यां **चित्र**वृत्तम्

**चित्रैं**[२४]चित्तवृत्तयो विबाधयन्ति दु:खभेद !, मां विभो ! न विश्वमेतदेव देव ! सारमस्ति ।
त्वत्पदाब्जभक्तिरस्तु चित्तधाम्नि वस्तुतस्तु, नाऽन्यदत्र भूतले लषामि सारवस्तु नाथ ! ॥२६॥

अथ सप्तदशाक्षरपादमत्यष्ट्यां **हरिणी**वृत्तम्

तव पदयुगं ज्ञानोद्रेकप्रदायि भजन्ति ये, भवति तृणवत् संसारोऽयं जिनेन्द्र ! महात्मनाम् ।
चकित**हरिणी**[२५]नेत्रा वामभ्रुवश्च मनोहरा, नहि न च धनं तेषां लोभाय वीतरजोहृदाम् ॥२७॥

अथ सप्तदशाक्षरपादमत्यष्ट्यां **पृथ्वी**[२६]वृत्तम्

महामहिमभासुरार्च्चितसमस्त**पृथ्वी**[२६]श्वरैः, सुदेशनवचोऽमृतैर्जनितचन्द्रमोन्यक्कृतिः ।
विलोचनविभाजितातिचलखञ्जरीटप्रभा, मनो हरति कस्य नो तव मुखप्रभा साऽमला ॥२८॥

अथाऽष्टादशाक्षरपादं धृत्यां **शार्दूलललित**वृत्तम्

बिभ्रन्मोहमृगादिदर्पदलने **शार्दूलललितं**[२७], कुर्वल्लोकहृदब्जबोधमनिशं त्वद्वाक्यनिकरः ।
उद्यद्भास्करवत् सुरासुरनराभिस्तव्यचरण !, जीयाद् देव ! महोपकारचतुरो द्राक्षासमरसः ॥२९॥

अथाऽष्टादशाक्षरपादं धृत्यां **चित्रलेखा**वृत्तम्

ऐन्द्रश्रेणीनतपदयुगला भव्यपापौघभैत्री, कल्याणालीव्रततिविततिवार्दायमाणा मुनीनाम् ।
स्वान्तागारे वसतिमुपगता शान्तिधारां क्षरन्ती, ते मूर्त्तिर्मे भवतु शिवकरी **चित्रलेखा**[२८] मनोज्ञा ॥३०॥

अथैकोनविंशत्यक्षरपादमतिधृत्यां **मेघविस्फूर्जिता**वृत्तम्

श्रयन्ति त्वां देवं गतभवरुजं भक्तिभावोत्तरङ्गाः, सदा मूर्च्छन्मोहव्रजतमसि ये सूर्यभासायमानम् ।
ददन्ते तेषां भीलवमपि च नो स्वप्नकालेऽपि नाथ !, मृगारातीभाद्याः प्रतिभयतमा **मेघविस्फूर्जिता**[२९]ऽस्तु ॥३१॥

---

२४. यत्र राभिधो गणः पुरस्ततो जसंज्ञकोऽथ, राभिधेन मण्डितो गणेन जस्ततः पुनस्तु । कीर्त्तितो रसंज्ञको गणश्च लान्तिमं बुधेन, चित्रसंज्ञमीरितं बुधप्रमोददायकं तत् ॥ उट्टवणिका यथा – ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ।ऽ ।

२५. नगणसुभगः प्राच्यो भागस्ततस्सगणः पुन–र्मगणसहितो राख्यस्स्याच्चेत् ततस्सगणो लघुः । गुरुविरचना यस्यामन्त्ये बुधैरिह सा मता, भवति विरतिर्यद्वेदाश्वैर्यदा हरिणी तदा ॥ उट्टवणिका यथा – ।।। ।।ऽ ऽऽऽ ऽ।ऽ ।।ऽ ।ऽ

२६. जसंज्ञकगणः पुरो भवति साभिधोऽथो गणो, जसंज्ञकगणः पुनर्भवति साभिधोऽनन्तरम् । यसञ्ज्ञकगणान्विता लघुगुरुप्रशस्ताऽन्तिमा, वसुग्रहयतिर्बुधैरिह मता तु पृथ्वी वरा ॥ उट्टवणिका यथा – ।ऽ। ।।ऽ ।ऽ। ।।ऽ ।ऽऽ ।ऽ

२७. माभिख्यः प्रथमं गणस्सगणसम्भ्राजी यदि ततो, जाख्यस्स्याच्च गणस्ततस्सगणसंराजी परमितः । ताख्यश्चेत्तदनन्तरं सगणसम्बन्धो भवति चेत्, तर्हि ज्ञैः प्रथितं दिवाकररसैः शार्दूलललितम् ॥ उट्टवणिका यथा – ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ऽऽ। ।।ऽ

२८. मोभो नश्च त्रियगणसहितश्चित्रलेखा तदा स्यात् ॥ उट्टवणिका यथा – ऽऽऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

२९. गणो याख्यः पूर्वं मगणरचना स्यात्परस्तान्मनोज्ञा, भवेन्नाख्यो हृद्यो गण इह ततो यस्य बन्धो मनोज्ञः । ररौ स्यातां तस्माद् गुरुरिह यदा तर्हि मान्या बुधेन्द्रै, रसैः षड्भिर्वाहैर्यतिरिह मता मेघविस्फूर्जिताऽसौ । उट्टवणिका यथा — ।ऽऽ ऽऽऽ ।।। ।।ऽ ऽ।ऽ ऽ।ऽ ऽ

अथैकोनविंशत्यक्षरपादमतिधृत्यां **फुल्लदाम**वृत्तम्

ये नित्यं श्रीमज्जिनवरवृषभं **फुल्लदाम**[३०]प्रकाण्डै-र्भक्त्याऽर्च्चन्तीशं विगतभयभरं तीर्थनाथं तु वीरम् ।
तेऽर्च्यन्ते भव्याः सुरवरततिभिः पूर्णकामा अकामाः, स्तुत्वा स्तूयन्ते सुरनरवृषभैर्यान्ति मोक्षं च शश्वत् ॥३२॥

अथ विंशत्यक्षरपादं कृत्यां **गीतिका**वृत्तम्

बहुलानुरागसुरासुरार्च्चितपादपङ्कजमादरात्, परिषेवते जिन ! यस्तवाऽमलभक्तितो जगतीतले ।
गुणशंसिनी किल तस्य देव ! नरेन्द्रवक्त्रविनिर्गता, भुवनत्रयेऽपि विलासमेति जनस्य नाथ ! सु[३१]**गीतिका** ॥३३॥

अथैकविंशत्यक्षरपादं प्रकृत्यां **स्रग्धरा**वृत्तम्

कैलासोद्दामकान्तिस्फुरदमलतलन्यस्तचित्रोपलाढ्ये, भव्यस्तोत्रावलीसम्मुखरितककुभि स्वान्तपद्मार्करोचिः ।
नानालङ्कारहारिण्यघदलनकरी वीर ! मूर्त्तिस्त्वदीया, प्रोद्यद्दीप्रप्रभाढ्यामलमणिनिकरै[३२]**स्रग्धरा** हन्तु पापम् ॥३४॥

अथ द्वाविंशत्यक्षरपादं कृत्यां **मदिरा**वृत्तम्

ये **मदिरा**[३३]सुहिता मनुजा न भजन्ति तवाऽङ्घ्रिसरोजयुगं, ते जिन ! निर्गतपुण्यभरा भयभारसुदुःखितमानसकाः ।
शश्वदशेषशरीरिविशारणकारणचिन्तनबद्धहृदो, नो गणयन्ति परोपकृतिं न विदन्ति गुणं न भजन्ति सुखम् ॥३५॥

अथ चतुर्विंशत्यक्षरचरणं संकृत्यां **दुर्मिल**वृत्तम्

प्रणिधाय भवत्पदपङ्कजमीश ! जिनेन्द्र ! भवामयभेदकरं,
ससुरासुरमर्त्यनतं सततं परि**दुर्म्मिल**[३४]मोक्षसुखप्रददम् ।
लभते सकलः खलु सौख्यमनन्तमिहाऽपि परत्र च किं बहुना,
प्रणतः सकृदप्यमरैः पुरुषः सततं महितो भवति प्रणयात् ॥३६॥

---

३०. स्यान्माख्यः पूर्वं तगण इह ततो नेन हृद्यः परस्तात्, तस्मात् साख्यश्चेद् रगणसुवलितो रेण नद्धं पुनश्च । तस्माद् गो यस्मिन् विबुधजनगणैः सेवितं सद्गुणाढ्यं, ज्ञेयं प्राज्ञैस्तच्छरहयतुरगैः फुल्लदामाभिरामम् ॥ उट्टवणिका यथा - ऽऽऽ ऽऽ। ।।। ।।ऽ ऽ।ऽ ऽ।ऽ ऽ

३१. सजजान्विता भरसाश्रिता लगभूषिता खलु गीतिका ॥ अन्यत्राऽप्युक्तं —
वरपाणिशोभिसुवर्णकङ्कणरत्नरज्जुविभूषिता, सुपयोधरा पदसङ्गिनूपुररूपकुण्डलमण्डिता । फणिराजपिङ्गलवर्णिता कविसार्थमानसहारिका, वरकामिनीव मनोमुदे नहि कस्य सा खलु गीतिका ॥ उट्टवणिका यथा - ।।ऽ ।ऽ। ।ऽ। ऽ।। ऽ।ऽ ।।ऽ । ऽ

३२. लोकैश्छिन्ना त्रिकृत्वो मरभनययैः सुन्दरा स्रग्धरेयम् ॥ अन्यत्राऽप्युक्तं —
कर्णं ताटङ्कयुक्तं वलयमपि सुवर्णं च मञ्जीरयुग्मं, पुष्पं गन्धं वहन्ती द्विजगणरुचिरा नूपुरद्वन्द्वयुक्ता ।
शङ्खं हारं दधाना सुललितरसना रूपवत्कुण्डलाभ्यां, मुग्धा केषां न चित्तं तरलयति बलात् स्रग्धरा कामिनीव ॥
उट्टवणिका यथा - ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

३३. सप्तभकारयुता सगुरुर्गदितेयमुदारतरा मदिरा ॥ उट्टवणिका यथा - ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ

३४. सगणौ सगणौ सगणौ सगणौ यदि दुर्म्मिलमेतदवेहि तदा । अन्यत्राऽप्युक्तम्-
विनिधाय करं गुरुरत्नमनोहरबाहुयुगं कुरु रत्नधरं, च ततः कुरु पाणितलं वरपुष्पयुगं विनिधाय गुरुम्(?) ॥
इति दुर्म्मिलका फणिनायकसंरचिता किल वर्णविलासपरा, चतुराश्रितविंशतिवर्णकृता कविता सुकृताश्रयशिल्पधरा ॥
उट्टवणिका यथा - ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ

अथ चतुर्विंशत्यक्षरचरणं संकृत्यां **किरीट**वृत्तम्

देव**किरीट**[३५]मणिप्रकरप्रतिरञ्जितपादसरोजयुगं तव,
भातु सदा मम चेतसि देवविकीर्णसरोरुहचारि सुखाकर ! ।
यत्र विभाति नखावलिरीश्वर ! पद्ममणिप्रकरप्रतिमाङ्गुलि-
मस्तकराजिसुधाकरबिम्बसमा शमनिर्ज्जितदोषरिपुव्रज ! ॥३७॥

अथ **चण्डवृष्टिप्रपात**नामा सप्तविंशत्यक्षरचरणो **दण्डकः**

जय जय सुरयक्षविद्याधराधीशमर्त्यादिभिः सङ्कुले सर्वशोभाकरे,
समवसरणभूमिभागे यथावत्समावेशितानेकलोकाकुलेऽतिप्रभे ।
मणिकनकविचित्रचञ्चत्प्रभाहारिसिंहासनाध्यासिनो देशना देव ! ते,
त्रिभुवनततकाममोहादिघोरानलोज्झासने **चण्डवृष्टिप्रपाता**[३६]यते ॥३८॥

॥ इति श्रीमज्जिनचरणसरोजचञ्चरीक-वादिमातङ्गपञ्चानन-महाव्रतपञ्चकविलासगेह-
तपश्चर्याचरणचक्रवर्त्याचार्यवर्य-श्रीमद्विजय**नेमिसूरीश्वर**शिष्य-
प्रवर्तक-**यशोविजय**विरचिता सहृदयकण्ठशोभिनी
वीरोज्ज्वलगुणगुम्फिता विविधनामगर्भच्छन्दोमयमुक्तकषट्त्रिंशिका ॥

॥ इतिश्रीचरमजिनेश्वरश्रीमहावीरस्वामिषट्त्रिंशिका समाप्ता ॥

---

३५. अष्टभकारमनोहरबन्धनवृत्तकिरीटमिदं परिभावय ॥ अन्यत्राऽप्युक्तम् —
पादयुगं कुरु नूपुरसुन्दरमत्र करं वररत्नमनोहर-वर्णयुगं कुसुमद्वयसङ्गतकुण्डलगन्धयुगं समुपाहर ।
पण्डितमण्डलिकाहृतमानसकल्पितसज्जनमौलिरसालय-पिङ्गलपन्नगराजनिवेदितवृत्तकिरीटमिदं परिभावय ॥
उट्टवणिका यथा - ऽ॥ ऽ॥ ऽ॥ ऽ॥ ऽ॥ ऽ॥ ऽ॥ ऽ॥

३६. यदि नगणयुगं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो मतो दण्डकः ॥
उट्टवणिका यथा - ||| ||| ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

## ॥ १३. अकारान्तप्रथमान्तपदैर्महावीरस्तोत्रम् ॥

देवस्स चिन्तामणिदेववृक्ष-जैत्रप्रणामश्शमवारिधारः ।
चामीकरोद्द्योतशरीरभासः, श्रीवीरनाथो भवहानिदोऽस्तु ॥१॥
प्रौढप्रभावो भुवनैकपूज्यः, कन्दर्प्पदर्प्पापहदेहभासः ।
संसारकान्तारगतिश्रमघ्नः, श्रीवीरनाथो भवहानिदोऽस्तु ॥२॥
कामोन्मदिष्णुद्विपदर्प्पघात-पञ्चाननो विश्वजनप्रपूज्यः ।
प्रौढप्रतापप्रविराजमानः, श्रीवीरनाथो भवहानिदोऽस्तु ॥३॥
मिथ्यात्वरात्रिप्रबलप्रघात-सूर्यायमाणः शिवदानशौण्डः ।
धीरत्वजेयाचलवंशनाथः, श्रीवीरनाथो भवहानिदोऽस्तु ॥४॥
दुःखान्धुमग्नाखिललोककाम्य-रज्जूयमानातुलवाग्विलासः ।
संसारनीरेश्वरपोतपादः, श्रीवीरनाथो भवहानिदोऽस्तु ॥५॥
सर्वोपसर्गग्रहदोषघातो, ध्यातोऽपि संसोढमहोपसर्गः ।
यश्चित्रचारित्रधरो जिनेन्द्रः, श्रीवीरनाथो भवहानिदोऽस्तु ॥६॥
अप्रार्थितार्थप्रदताविलास-ह्रीणामरागोऽसमपुण्यदानः ।
श्रीकेवलालोकविभातलोकः, श्रीवीरनाथो भवहानिदोऽस्तु ॥७॥
श्रोत्रामृतास्वादमहाप्रपाभ-देवासुरासेव्यवपुःप्रभावः ।
संसारतर्षापहवाग्विलासः, श्रीवीरनाथो भवहानिदोऽस्तु ॥८॥

॥ इति श्रीश्रमणजनमनश्चमत्कारकारिचरणकरणचातुरीका-ऽऽचार्यवर्यश्रीमद्विजयनेमिसूरीश्वर-
पादपद्मेन्दिन्दिरायमाण-विनेयप्रवर्त्तकयशोविजयविरचितं
प्रथमान्तपदकदम्बमयं श्रीमहावीराष्टकं समाप्तम् ॥

## ॥ १४. पञ्चवर्गविनिर्मुक्तं श्रीमहावीराष्टकम् ॥

पञ्चेन्द्रियदमं देव्यं, पञ्चज्ञानोपदेशकम् ।
पञ्चवर्गविनिर्मुक्तं, स्तोष्ये वीरजिनेश्वरम् ॥१॥

अव विश्वाश्रयो वीर!, शिवावास: सुरेश्वर! ।
श्रीषूष शिष्यशासाय, स्वास्य श्रिया विलालस ॥२॥

श्रीवर: श्रेयसे सार-रावास्य: स सुरेश्वर: ।
सर्वेषां लालसाह्रास:, शीलशाली शिवावह: ॥३॥

वरैश्वर्येव विश्वस्य, सर्वाय सहसा वर ।
श्रीवीरेशसुरार्हाव, उल्लासय शिवश्रियम् ॥४॥

सुरासुरसुसेव्याह्रिं, सूरिं शूररवं वरम् ।
सरलं सुरवं सस्यं, सुरं सेवे ऋषीश्वरम् ॥५॥

यस्येश्वरस्य सारस्य, सर्वाशाविलसं यश: ।
श्रेय: सुरसुवल्ली व:, सोऽयं वीर: शिवाय वै ॥६॥

सर्वांहससुसंहारं, सर्वावं सुरवेश्वरम् ।
अरुषं संश्रये वीरं, शशिलेश्यं वशीश्वरम् ॥७॥

सुरस: सुरवो यस्य, वीर: सेव्य: शिवाय व: ।
स्वेरीशाश्रेयलासांह्रि:, सोवार्यवीर्यशाल्ययम् ॥८॥

सर्वसारं वरं वीरं, सूर्यलासं सुरेश्वरम् ।
हेयाहेयसुशासेशं, संश्रये सावशोऽवश: ॥९॥

॥ इति श्रीसकलसुरासुरेन्द्रनरेन्द्रविवन्द्यपादारविन्दा-ऽऽचार्यवर्यश्रीमद्विजय**नेमिसूरी**श्वरशिष्य-प्रवर्त्तक**यशोविजय**विरचितं पञ्चवर्गविनिर्मुक्तं श्रीमहावीराष्टकं समाप्तम् ॥

## ॥ १५. श्रीवीरचित्रकाष्टकम् ॥

**छत्रबन्धः ( पद्मबन्धोऽपि )**

अविदितगुणमानं सर्वदा भासमान-
मकलितमहिमानं ध्वस्तमोहाभिमानम् ।
विहितमदनमानं शान्तिसंशोभमानं,
प्रकटितपटिमानं नौम्यहं वर्धमानम् ॥१॥

**धनुर्बन्धः**

वीरं नमामि विपदां दलनं दयालुं,
घोरान्धकारविधुरान् विविधोपतापान् ।
पापान् समुद्धरति यो जितभाववैरी,
दर्पोद्गमप्रशमनं जगदेकसारम् ॥२॥

**खड्गबन्धः**

धीरं वीरं वरं देव, देवमावसथं श्रियाम् ।
यद्दर्शनमघध्वंसि, सर्वदा तं जिनं स्तुवे ॥३॥

**द्वाभ्यां श्लोकाभ्यां खड्गबन्धः**

सारशौर्याप्तमोक्षश्री-र्जितकाममहारिपुः ।
पुण्यकेलिगृहं वीरः, क्रान्तविश्वः स्वतेजसा ॥४॥

सानुकम्पो भवच्छेदी, शक्रसन्दत्तवाससा ।
सारं संशोभमानो मां, पातु पापात् प्रभद्रकः ॥५॥

**शरबन्धः**

सर्वदा दारितोन्मादं, सर्वर्द्धिधिषणैर्नुतम् ।
वन्दे वीरं महाधीरं, भवसत्रत्रसन्नतम् ॥६॥

### त्रिशूलबन्धः

उद्दामतेजसाभासद्-देहसौन्दर्यभासितम् ।
तं सदाऽदासतं देवं, वन्दे तं विदितं दिवि ॥७॥

### शक्तिबन्धः

वरं तत्त्वविदामीशं, तं शंसौख्यददं वरम् ।
रवगाम्भीर्यसम्राजं, संसंध्यायामि सर्वदा ॥८॥

॥ इति श्रीनिरुपमप्रौढसाम्राज्यराजविराजमान-तपत्तपस्तेजःप्रकरप्रकीर्त्यमानकीर्त्तिनिकरस्वच्छतपगच्छगगन-नभोमणीयमान-सकलजनप्रार्थितार्थसार्थचिन्तामणीयमान-श्रीमद्**विजयनेमिसूरीश्वरा**चार्य-चरणचञ्चरीकायमाण-प्रवर्त्तक**यशोविजय**विरचितं **श्रीवीरचित्रकाष्टकं** समाप्तम् ॥

෴✦෴

### शक्तिबन्धः




वरन्तत्त्वविदामीशं तं शं-सौख्यददं वरम् ।
वरगाम्भीर्यसम्राजं संसंध्यायामि सर्वदा ॥८॥

# चित्रकाव्यानि

**धनुर्बन्धः**




**वीरं** नमामि विपदां दलनं दयालुं,
घोरान्धकारविधुरान् विविधोपतापान् ।
पापान् समुद्धरति यो जितभाववैरी,
दर्पोद्गमप्रशमनं जगदेकसारम् ॥२॥

**शरबन्धः**




सर्वदा दारितोन्मादं सर्वर्द्धिधिषणैर्नुतम् ।
वन्दे **वीरं** महाधीरं भवसत्रत्रसन्नतम् ॥६॥

**त्रिशूलबन्धः**




उद्दामतेजसा भासद्देहसौन्दर्यभासितम् ।
तं सदाऽदासतं देवं वन्दे तं विदितं दिवि ॥७॥

## ॥ १६. श्रीमहावीरचित्रकाष्टकम् ॥

**शक्तिबन्धः**

भगवान् भुवनाधीशो, धीशो धैर्यगुणे नगः ।
गभस्तिर्मोहविध्वंसे, पापाद् **वीरो**ऽवतात् स माम् ॥१॥

**हलबन्धः**

वीरं नमामि विश्वेशं, तं शंवप्रभुमीश्वरम् ।
रम्यसूक्तिजगद्बोधं, सर्वज्ञं वरकेवलम् ॥२॥

**हलबन्धः**

वीरं धर्मप्रदातारं, वारं दोषततेर्वरम् ।
रङ्कोद्धारकरं देवं, वन्देऽहं देवदेवनम् ॥३॥
जय भवभयहरणचरणकमल !, जय कनकभ ! जय वरजनशरण ! ।
जय समसहमददवदहनदक !, जय वरजनभरनतततपदक ! ॥४॥

**समासगुप्तम्**

प्रबलमदनदावं घोरमोहप्रतानं, प्रकुपितमदकालव्यालसङ्घप्रचारम् ।
भववनमधिभव्यश्रेणिसौख्याय यस्या-ऽभिभवति शरणं स त्रायतां वोऽथ वीरः ॥५॥

**गोमूत्रिकाबन्धः**

सम्पद्दानपरं वन्दे, लोकजालस्य पालिनम् ।
विपन्मानहरं मन्दे, शोकजालस्य पातिनम् ॥६॥

**पद्मबन्धः ( अयं गोमूत्रिकाबन्धेऽपि )**

जिन ! श्रीन ! घनध्यान !, च्छिन्नमान ! घनस्वन ! ।
घनदीनजनग्लान-जनसन्ततनन्दन ! ॥७॥

**प्रथमान्तबन्धः**

विश्वत्रयत्राणनिबद्धचेताः, कुबोधविध्वंसनवाग्विलासः ।
तृष्णातमस्संहरणो मुनीशः, श्रीवीरदेवः सुखदः सदाऽस्तु ॥८॥

॥ इति श्रीसहृदयहृदयारविन्दविकासनसवित्रीयमाण-सकलजनमनोऽन्तस्तापप्रशमनप्रपीयूषायमाण-भीष्मभववन-भ्रान्तिक्लान्तिमच्छान्तिदानैककल्पतरूयमाण-श्रीमद्विजय**नेमिसूरीश्वरा**चार्यवर्यचरणचञ्चरीकायमाण-प्रवर्त्तक**यशोविजय**विरचितं **श्रीमहावीरचित्रकाष्टकं** समाप्तम् ॥

**शक्तिबन्धः**



भगवान् भुवनाधीशो धीशो धैर्यगुणे नगः ।
गभस्तिर्मोहविध्वंसे पापाद्वीरोऽवतात् स माम् ॥१॥

**हलबन्धः**



वीरं नमामि विश्वेशं तं शंवप्रभुमीश्वरम् ।
रम्यसूक्तिजगद्बोधं सर्वज्ञं वरकेवलम् ॥२॥

**हलबन्धः**



वीरं धर्मप्रदातारं वारं दोषततेर्वरम् ।
रङ्कोद्धारकरं देवं वन्देऽहं देवदेवनम् ॥३॥

## ॥ १७. अकारान्तचतुर्थ्यन्तपदैः श्रीमहावीराष्टकम् ॥

सर्वावनीतलविभासकसूर्यदेव-चण्डप्रतापकलिताय जिनेश्वराय ।
देदीप्यमानशशिसौम्यमुखाम्बुजाय, वीराय वीतमदनाय नमो नमोऽस्तु ॥१॥

श्रीनन्दिवर्द्धनकृपापरिपूरिताय, सिद्धार्थनन्दनवराय गुणाकराय ।
पापापहाय शिवसौख्यकराय शश्वद्, वीराय वीतमदनाय नमो नमोऽस्तु ॥२॥

मुक्त्यङ्गनानयनदूतमहाव्रताय, वीतप्रमादरिपुकाय दमाकराय ।
भारुण्डपक्षिसदृशाय गतस्पृहाय, वीराय वीतमदनाय नमो नमोऽस्तु ॥३॥

ऐश्वर्यभासितजगत्त्रयमण्डलाय, पारङ्गताय परमाय सुरेश्वराय ।
संशुद्धचेतनमयाय शुभेश्वराय, वीराय वीतमदनाय नमो नमोऽस्तु ॥४॥

स्वर्णाभदेहविलसद्द्युतिराजिताय, निर्लोभहंसरतिमानससोदराय ।
सद्धर्ममार्गवरदेशनकारकाय, वीराय वीतमदनाय नमो नमोऽस्तु ॥५॥

सिंहाङ्किताय सरसध्वनिशोभिताय, ध्येयाय गेयगुणगुम्फितविग्रहाय ।
सर्वाविजेयबलसारविराजिताय, वीराय वीतमदनाय नमो नमोऽस्तु ॥६॥

विश्वावतंसमुकुटाय मतीश्वराय, सत्प्रातिहार्यपरिशोभिसमाश्रयाय ।
संसारसारशरणाय मुनीश्वराय, वीराय वीतमदनाय नमो नमोऽस्तु ॥७॥

लोकोपकारकरदेशनवाक्यपुष्प-सौरभ्यलुब्धससुरासुरभृङ्गकाय ।
चारित्रदीपकवराय सुरस्तुताय, वीराय वीतमदनाय नमो नमोऽस्तु ॥८॥

॥ इति श्रीसकलभविककमलदिनकरकरायमाण-श्रीमद्विजय**नेमिसूरीश्वर**चरणचञ्चरीकायमाण-विनेय**यशोविजय**विरचितमकारान्तचतुर्थ्यन्तपदकदम्बमयं श्रीमहावीराष्टकं समाप्तम् ॥

ഌ✦ഢ

## ॥ १८. श्रीमहावीराष्टकम् ॥

श्रीवीरं वैरमुक्तं प्रतिदिनमनघं मानवानां नवानां, वाञ्छापूर्त्तिं वितन्वन्तमहकममहं सद्यानां दयानाम् ।
पूरं शूरं शरीरस्थितरिपुदलने वास्तवानां स्तवानां, स्तोमैः सोमैः समस्तैः शमदमनियमैः संस्तवीमि स्तवीमि ॥१॥

ये त्वां सन्मधुराक्षरैरहरहः स्तोष्टूयमानाः स्तवै-राधिव्याधिरुपाधिराप्त ! भविनां दूरं प्रयाति क्षणात् ।
सद्म स्वर्गवदेव देव ! भवति प्रज्ञावतां प्राणिनां, दासन्त्येव सुरा वराः सुरमणिस्तेषां च हस्ते स्थितः ॥२॥

घोरक्रोधतरक्षु कामशबरं दुष्कर्मपञ्चाननं, मायाजाललताप्रतानगहनं मानोग्रमत्तद्विपम् ।
सम्फूत्कुर्वदमन्दलोभभुजगं रागोग्रशार्दूलकं, संसारं विपिनं तदस्ति भविनां कस्त्वां विनाऽत्राऽऽश्रयः ॥३॥

विख्यातो धरणिप्रकाशकुशलोऽहं सर्वलोकप्रियः, सूर्य ! त्वं किमु शूरतां प्रथयसीत्येवं क्षमामण्डले ।
श्रीवीरस्य समस्तलोकविदितं कर्मक्षयाविष्कृतं, किं नाऽऽलोकयसे त्रिलोककलनाकौशल्यमानन्ददम् ॥४॥

संसञ्चिन्तितदानकौशलकलाकेलीधराणां वर !, त्वं किं कल्पतरो ! करोषि सततं दर्प्पं विनिःशङ्ककम् ।
विश्वेषां विकटप्रकोटिकलितक्रोधादराणां नृणां, किं संपश्यसि नैव वीरचरणान् संदर्शनात् कामदान् ॥५॥

जन्तुत्राणकराय सर्वभविनामानन्ददानाय च, ज्ञानानन्दमयाय नित्यमखिलध्येयाय गेयाय च ।
भव्यानां भवनाशनाय परमज्योतिःस्वरूपाय च, श्रीवीराय जिनाय विश्वपतये नित्यं नमः स्तान्मम ॥६॥

गीर्यस्याऽस्खलितप्रचाररचना पीयूषवर्षायते, संसाराम्बुधितारणे भगवतः पादोऽतिपोतायते ।
मर्त्यानां भय(व?)भीमकूपपततां हस्तो वरत्रायते, सैष श्रीजिनकुञ्जरः परमसंशान्तिं विधत्तान्मम ॥७॥

चिन्तारत्नमतिप्रियं न भवति प्राज्यं न राज्यं तथा, चक्रित्वं न मनोरमं मम तथा देवेन्द्रता नो प्रिया ।
नो रम्याणि भवन्ति मेऽतिहृदये हर्म्याणि वीरप्रभो !, किन्त्वेकं तव पादपद्मशरणं मे सर्वदा सुप्रियम् ॥८॥

॥ इति श्रीसकलस्वपरसमयमानससरोवरवरराजहंसायमान-निःशेषान्तरङ्गवैरेभपञ्चाननायमान-सकलभविभयदुस्तरापारवार्धिप्रवहणायमान-श्रीमद्विजय**नेमिसूरीश्वरा**चार्यवर्यचरणचञ्चरीकायमाण-प्रवर्त्तक**यशोविजय**विरचितं श्रीमहावीराष्टकं समाप्तम् ॥

## ॥ १९. श्रीविजयनेमिसूरिशतकम् ॥

विपुलकीर्त्तिभरेण हिमत्विषो, विजयिनाऽमृतगर्वमुचा गिरा ।
कृतपदं सकलागमपारगं, विजयनेमिगुरुं महितं नुमः ॥१॥
स्तुवन्नहं त्वां बुधहास्यधाम, तथापि भक्त्या प्रलपामि नाथ! ।
यथेष्टमालप्य शिशुर्वचांसि, न किं प्रमोदं प्रतनोति पित्रोः ॥२॥
स्पृष्टो नमस्कारपथं प्रयातो, ध्यातो नुतः पूजितुमीहितो वा ।
त्वं सर्वलोकोपकृतेर्विधाता, पूज्योऽसि केषां न जगत्त्रयेऽस्मिन् ॥३॥
त्वद्दर्शनान्नाथ! शरीरिणां सदा, नश्यन्ति पाशा दृढकर्मणामपि ।
नद्धा न किं तार्क्ष्यविलोकनादहेः, पाशा विनाशं सहसा व्रजन्ति हि ॥४॥
अचिन्त्यसौख्याप्तिफलाफलश्च, यैर्यैस्तु दृष्टोऽसि जगद्गुरुस्त्वम् ।
पुण्यानुबन्धीनि कृतानि तैस्तै-र्महान्ति पुण्यानि महाफलानि ॥५॥
ते नामिनः शुद्धगुणा भवन्ति, निर्दोषसारा प्रकृतेर्हिताधाः ।
तस्माद् वयं नाथ! सदा नमाम, आप्तं भवन्तं जगतीहितं च ॥६॥
आसादिताशेषसुखं सुखीनं, पापप्रमुक्तं मुनिपुङ्गवं च ।
श्रीसाधुमर्त्यैरभिवन्दितं तं, श्रीनेमिसूरिं प्रणमामि भक्त्या ॥७॥
येनोदधारि किल सूरिपदं सुयोगै-र्लोकोपकारकुशलं गुणगुम्फितेन ।
श्रीवीरशासनशुभोन्नतिकारकस्तु, सूरिर्जयत्यखिलशास्त्रविचक्षणोऽयम् ॥८॥
रत्नत्रयोद्द्योतितदिग्विभागकः, समस्तसङ्घस्य च भद्रकारकः ।
परोपकाराय वपुर्धरन्नयं, चिराय भूयाद् भवभेदको नृणाम् ॥९॥
प्रसन्नकीर्त्ते! जय नाथ! सम्प्रति, दुरासदं ते शरणं क्षितौ नृणाम् ।
समस्तलोकाखिलसौख्यदायकं, चिन्तामणेरप्यतिशायि भूतले ॥१०॥
वाताभ्रविभ्रमसमक्षयसौख्यरक्ते, दुःखानलप्रकलितान्तरवृत्तिलोके ।
कालायिते कलियुगेऽथ तव प्रशस्यं, केषां न पादयुगलं वरसौख्यहेतुः ॥११॥
श्रीनेमिनाथपदपङ्कजवासिनो नो, स्कन्दन्ति दुःखलवमप्यथ मानवास्तम् ।
पापापहारकरणं चरणं नराणां, यस्य श्रयामि शरणं प्रभुनेमिसूरिम् ॥१२॥

दुःखज्वलानलदकोपममाप्तमान्यं, विस्तीर्णभूमितलराजितमन्त्रराजम् ।
प्रौढं प्रदीप्तमुनिमण्डलवार्द्धिचन्द्रं, नेमिप्रभो ! इति जपाम्यहमत्र सारम् ॥१३॥
नाथे त्वयि श्रितवति क्षितिमण्डलेऽथ, किं दुर्ज्जनो मयि करिष्यति मोहमोही ।
नृणां मयूरवरजातसमाश्रितानां, किं स्याद् भयं क्षितितले पवमानभक्षैः ॥१४॥
प्राप्तप्रधानविभवा विभवं भजन्तो, वृद्धिः समृद्धिकलिता सकलप्रशस्ता ।
ब्रह्मेन्दुतेज इव सौख्यकरा वरा ते, भूयादिति प्रमनसा वयमुश्म आप्त ! ॥१५॥
शास्त्रसन्दोहवेत्ता यः, सर्वसाधुगुणान्वितः ।
विजयनेमिसूरिः स, जयत्याप्तनुतो गुरुः ॥१६॥
चन्द्रतुल्यं महोराजं, परसौख्यकरं वरम् ।
नमामि सर्वदाभासं, निष्कलङ्कं महामुनिम् ॥१७॥
शान्तं शान्तमनोवृत्तिं, शर्मरं शर्मशालिनम् ।
मुनिं मुनिं मनोभक्त्या, वन्दे वन्देन्द्रवन्दितम् ॥१८॥
दुर्जातदुर्गदुर्गाणां, दुर्गतानां च देहिनाम् ।
दुर्गदुर्गतताभेदं, दुर्गतित्रायकं मुनिम् ॥१९॥
देहदेवनदेवं तं, दोषदोषानिवारकम् ।
वन्दे वं वन्दको वन्द्यं, द्वेषद्वेषकरं वरम् ॥२०॥
सूरिं सूरिवरं सूरं, सार्थसार्थसुसेवितम् ।
सर्वदा सर्वदाभासं, वन्देऽवन्देव देवकम् ॥२१॥
उपध्युद्धावकं सूरि-मुपतापवितापकम् ।
उपप्लवपरिप्लाव-मुपरागोपमर्द्दकम् ॥२२॥
दुर्ग्राह्यसुगुणग्राम-माधिव्याधिविनाशकम् ।
सूरिं सूरिं सदा नौमि, दुर्जेयदुर्जनोज्जयम् ॥२३॥
दुर्द्दान्तदुर्दुरूढानां, दमकं शमकं मुनिम् ।
दमनं दमनं वन्दे, सूरिं सूरिजनैर्नुतम् ॥२४॥
मूढात्ममूढताभेदं, मतिमानविवर्जितम् ।
मुहुर्मुहुरहं वन्दे, चङ्गाङ्गयोजितो मुनिम् ॥२५॥
कान्तकान्तिसुकान्तं तं, ज्वलल्ललाटपट्टकम् ।
शास्यशास्तारमीशं च, नौमि भक्तिभरात् त्रिधा ॥२६॥
आनन्दकन्दफुल्लन्तं, सौख्यवल्लीवितानकम् ।
संसारासारताबोधं, भूयो भूयः स्तवीम्यहम् ॥२७॥
त्वत्पादैर्भासिताः के न, पादैरिव रवे रुचैः ।
इति परोपकारस्त्वं, जय सर्वगुरो ! सदा ॥२८॥
राजीवराजमानास्यं, भव्याकृतिसुशोभितम् ।
मानवामानवैः पूज्यं, त्रिकालं तं नमाम्यहम् ॥२९॥

त्वन्नामगारुडं मन्त्रं, मोहाहिविषघातकम् ।
इच्छामि सर्वदा भद्रं, त्वत्स्तुत्येकपरायणः ॥३०॥
विनयं विनयाधारं, सूरिणं सूरिणं मुदा ।
विनयो विनयग्राही, विनतो विनतोऽस्मि तम् ॥३१॥
विधूतविधिकव्याधिं, विदा विदारकं विदाम् ।
विकारविक्कुविक्रान्तं, विदितं विदितं विदाम् ॥३२॥
रुजा भीतैर्यथा वैद्यो, व्याघ्रभीतैरिवाऽनलः ।
तापतान्तैर्यथा वृक्षो, वह्निभीतैर्यथा जलम् ॥३३॥
जाड्यभीतैर्यथा सूरिः, पापभीतैर्यथा जिनः ।
यथा गुहा वर्षभीतैः, शरभः सिंहभीतिभिः ॥३४॥
सिन्धुभीतैर्यथा नौका, सर्पभीतैस्तु गारुडः ।
भयभीतिसमाक्रान्तै-स्त्वमस्माभिः समाश्रितः ॥३५॥ [त्रिभिर्विशेषकम्]
समुपार्जितपुण्यौघं, पोषयितुं नयावलेः ।
वन्देऽहं परया भक्त्या, विजयनेमिसूरिणम् ॥३६॥
जय नेमिविभो ! प्रभो ! ममा-ऽमतिमोहप्रविमर्द्दक ! क्षणात् ।
तव सङ्गमृते जना मनाग्, न भवाब्धि प्रतरन्ति तेऽप्लवाः ॥३७॥
भजते तु विरक्तमानसं, मुनिमन्यो गुणधाम सादरम् ।
प्रभजाम्यहमुद्यतप्रभं, क्रमयुग्मं दृढरागमेव ते ॥३८॥
न च कैर्महनीयतां गतः, परमां त्वं नयमानतत्त्ववित् ! ।
अविवेकिजने मयि प्रभो !, त्वमथो देहि विवेकसंस्तवम् ॥३९॥
शशिसौम्यमुखाकृते ! सदा, सुखमेधस्व मुनीश्वराऽसमम् ।
तव पादमृते न च प्रभो !, शरणं यद् भवभीमपावके ॥४०॥
अयमाप्त ! तवाऽनलद्युति-स्त्रिजगत्सञ्चरणेऽप्यकुण्ठितः ।
भविमोहतृणोत्करं दहन्, सुजने शीततरः प्रतापकः ॥४१॥
त्वमसि सप्तभयोदधितारक-स्त्वमसि विश्वजनोदयकारकः ।
त्वमसि भव्यजनप्रतिपालक-स्त्वमसि बुद्धिविवृद्धिकरः परः ॥४२॥
त्वमसि शासनरक्षणतत्पर-स्त्वमसि धर्मधनः पुरुषोत्तमः ।
त्वमसि दर्शनहर्षितसज्जन-स्त्वमसि गच्छनियामकतल्लजः ॥४३॥
त्वमसि शीलविभूषणधारक-स्त्वमसि सद्व्रतभारधुरन्धरः ।
त्वमसि मर्त्त्यनतो भुवि वत्सल-स्त्वमसि नेत्रसुधारस एव च ॥४४॥
त्वमसि भद्रकरः करुणानिधि-स्त्वमसि भीतिहरः परमो मुनिः ।
त्वमसि सञ्चितपुण्यभरो वर-स्त्वमसि सूरिपदप्रविराजितः ॥४५॥
पदयुगं तव वर्णयितुं कथं, कथय सूरिवर ! प्रभवाम्यहं ।
भजति शीतकरः कमनीयता-मधिजिगांसुरमुं नखकैतवात् ॥४६॥

सुमतिधाम नरेश्वरबोधदो, विजितपञ्चशरादिभटव्रजः ।
विजयनेमिगुरुः सुगुणाकरो, भवतु हंसगतिः सुखकारकः ॥४७॥
प्रबलवस्तुविवेकतिरस्कृतो, न हृदये तव राग उदेष्यति ।
इति विचिन्त्य तवाऽधरपल्लवे, तमनयद् विधिरीड्यगुणव्रज! ॥४८॥
कमलकाम्यविलोचनविद्रुमा-धरदलं दलयन्तमघव्रजम् ।
विपुलशारदचन्द्रमुखं पुनः, प्रवरसंवरसूरिमहं स्तुवे ॥४९॥
मम समीहितकल्पतरुं गुरुं, जगति पल्लविताग्र्ययशश्चयम् ।
दधतमागमसारफलोच्चयं, विमलवाक्कुसुमप्रकराञ्चितम् ॥५०॥
दुरिततापितसंसृतिकानन-भ्रमणतान्तिहरं पदसेविनाम् ।
विततशाखमुदारविनेयकै-र्विजयनेमिमुनिं महयाम्यहम् ॥५१॥
समुचितकृतिको यः प्राज्ञलोकेषु शश्व-न्निरुपमसुखराजीहेतुरालस्यनाशी ।
सकलसुकृतिलोकासेव्यमानक्रमाब्जो, भवतु भविनराणां सोऽत्र सौख्याय सूरिः ॥५२॥
तव वचनहलीषा नैव चेन्मादृशानां, विकृतहृदयभूमेः शुद्धिसम्पादिकेयम् ।
न भवति च तदानीमीदृशानामशुद्ध्या, शुभफलसमवाप्तिः सौख्यदूतेः समाना ॥५३॥
तव वचनमतल्ली मादृशानां जनानां, त्रिभुवनजनमान्या शान्तिसौख्याभिरम्या ।
विगतदुरितभारा दोषनाशेन सारा, हृदयवरपदेऽसौ राजमाना सदाऽस्तु ॥५४॥
दिनपतिरिव नित्यं यः प्रमोहान्धकार-क्षपणकर उदेति प्राप्तपुण्यप्रकर्षः ।
जगदमरपथे स त्रायकः पापकूपाद्, भवतु भविजनानां नेमिसूरिः सुखाय ॥५५॥
कुनयविपिनभङ्गे मत्तमातङ्गकल्पा, निखिलभविकलोकानन्ददा यस्य वाणी ।
परिभवति विनिर्यन्माधुरी धैर्यसारा, तुहिनकररसौघं नेमिसूरिः स जीयात् ॥५६॥
यः स्वीयदीव्यन्निटिलच्छलान्नृणां, दुर्म्मोहरात्रिप्रभिदानिबन्धनम् ।
सूर्यं दधति प्रलसन्तमाकरः, सूरिर्गुणानां भवहानयेऽस्तु सः ॥५७॥
यः कर्मपङ्केऽस्ति निदाघकल्पो, दुर्वादिपद्मे शशिभासकल्पः ।
अक्षान्तिदोषागणभानुकल्पो, जीयात् स सूरिर्जनबोधकल्पः ॥५८॥
दुर्बोधनाशं व्यधित स्वशक्त्या, पूर्णस्तु यो जैनमतानुरक्त्या ।
तं भूषितो यः शुभकर्मपक्त्या, स्वाचार्यवर्यं प्रणमामि भक्त्या ॥५९॥
यो रक्तभासक्रमजच्छलाद् दु-र्मोहान्धकारप्रलयाय धत्ते ।
सोऽयं तु सन्ध्यारुणचन्द्रलेखां, सौख्याय भूयाद् भयनाशनो मे ॥६०॥
क्रोधोग्रदन्तावलदन्तघात-विधानदक्षातुलभाविलासाम् ।
ज्योत्स्नां क्षमेन्दोः प्रबिभर्त्ति सूरि-र्यो दन्तजातच्छलतः स जीयात् ॥६१॥
नाथं नेमिं सूरीशानं, मोहोद्भेदं क्रोधच्छेदम् ।
लोकानन्दं काव्याकन्दं, वन्दे वीरं विश्वे धीरम् ॥६२॥
लोकाश्रेयं सर्वाजेयं, सूरिं ध्येयं ज्ञातज्ञेयम् ।
भक्त्याऽऽदृत्यं सर्वस्तुत्यं, वन्दे नित्यं दत्तौन्नत्यम् ॥६३॥

सर्वत्राता विद्यादाता, प्राज्ञध्यातो विश्वख्यातः ।
सूरिर्दान्तः कीर्त्या कान्तः, शश्वज्जीयात् भव्यं देयात् ॥६४॥
साधुश्रेष्ठं संपज्ज्येष्ठं, नित्यं तुष्टं पुण्यैः पुष्टम् ।
दीनोद्धारं विश्वे सारं, वन्दे शिष्टं नष्टारिष्टम् ॥६५॥
राकाकान्तज्योत्स्नाकान्तां, बिभ्रत् कीर्त्तिं विश्वव्याप्ताम् ।
कुर्यात् सम्पद्वृद्धिं शान्तां, बिभ्राणस्तां मूर्त्तिं दान्ताम् ॥६६॥
के सद्गुणास्तव विभो ! न च वर्णनीया, प्रज्ञादयाप्रभृतयस्तदपीह नाथ ! ।
ज्ञानक्रियाद्वयहयः शिववर्त्मगामी, संशान्तियन्तृजिनधर्मरथोऽतिभाति ॥६७॥
कुन्देन्दुहारघनसारसमानकान्तिं, त्रैलोक्यविस्मृतसुधामधुरप्रचाराम् ।
कीर्तिं मनःकुमुदवृद्धिविधानदक्षां, बिभ्रत् सुखानि तनुतां मम नेमिसूरिः ॥६८॥
जीयात् सुधामधुरवाक्प्रकरामृतौघ-संसेचनैधितजिनागमभक्तिवल्लिः ।
दुर्वारमारमदवारणनाशदक्ष-प्रोद्यद्विवेकहरिचित्तवनो मुनीशः ॥६९॥
धर्मोदयप्रथनपूर्वदिगाननेन्दु-दुर्वादिकौशिकबलक्षयवाक्यभानुः ।
शास्त्राब्धिमन्दरविलासिमतिप्रकर्षः, श्रीनेमिसूरिरतुलां मुदमादधातु ॥७०॥
आपन्नदीविततनिर्झरकूलगर्ज्जत्-क्रोधोग्रपञ्चवदने दुरितप्रपाते ।
दम्भच्छलादिखनिके शतकोटिकल्पं, मानाचले विजयनेमिमहं स्तवीमि ॥७१॥
जिनागममहोदधिप्रमथनाप्तरत्नत्रयं, जगद्भविभवामयोत्क्षणचारुधन्वन्तरिम् ।
समस्तजनताज्ञतारजनिनाशभानूदय-मतुल्यगुणगुम्फितं विजयनेमिसूरिं स्तुवे ॥७२॥
सुरूपजितमन्मथं यमिह देवराजो मुनिं, निरीक्ष्य चकितान्तरो द्विनयनोऽप्यसौ सम्प्रति ।
सहस्रनयनप्रथां भजति विश्वसंव्यापिनी-मयं जगति सूरिराट् मुनिमनःप्रमोदास्पदम् ॥७३॥
कुवादिकरटिव्यथाकरणबद्धकक्षा सदा, तवाऽनुपमभारती मृगनृपाङ्गना सर्वदा ।
निजानिव मुनिव्रजान् सुतगणानवन्ती कदा-ऽप्यखण्डितपराक्रमा जयति मेदिनीकानने ॥७४॥
प्रमोदभरनर्तिता इव विकस्वरा यस्य स-त्प्रलोकनसमुद्धतास्तरुवराश्च पुष्पच्छलाद् ।
भवन्ति जनसौख्यदाः सततमेव रोमाञ्चिताः, प्रमोदयतु मानसं न विदुषामयं किं मुनिः ॥७५॥
यः स्याद्वादवचोऽमृतेन सुजनश्रोत्रं प्रहर्षायति, यो ब्रह्माद्वयतेजसा मुनिवरः पृथ्वीं समाक्रामति ।
यो गाम्भीर्यगुणेन संयमपटू रत्नाकरं क्रामति, सोऽयं धर्मपराक्रमो विजयते सूरिर्गुणानां निधिः ॥७६॥
यः सत्याध्वगतो मतो बहुजनानन्दप्रदानो मुनि-र्विद्यावैभवन्यक्कृतामरगुरुः सूरीश्वरः सर्वदा ।
यः सम्यक्त्वविभूषितः सुमनसां पूज्यश्च यः सर्वदा, सोऽयं वीरवचोऽनुसारिरचनोऽस्माकं मुदे स्तात् सुधीः ॥७७॥
श्रीसङ्घोपकृतिप्रबद्धमनसा शास्त्रोक्तरीत्या सदा, यावच्छ्रीसकलानुयोगकलितप्रज्ञप्तिसूत्रं पुरा ।
लब्धं येन मनोज्ञपण्डितपदं प्रोदूढयोगेन च, सोऽयं पूज्यतमः सदा विजयते देवेन्द्रपूज्यैरपि ॥७८॥
दुःखग्रामदुरध्वदुःखितजनाः सौख्यं दुरापं क्षणात्, संसंप्राप्तपरप्रभावविभवा यन्नामसंस्मारकाः ।
प्रापन्त्यप्रतिमक्रमप्रविणमच्छीर्षाः स नेमिप्रभु-र्भूयान्मे महते फलाय सहसा सूरीन्द्रसन्तानकः ॥७९॥
धारासार इव ध्वनत्यवितथं यस्योत्तमा भारती, धर्माधर्मपरीक्षणा धवधवा श्रीधामधार्या वरा ।
श्रीधूसीकृतधैर्यवर्यविबुधो धर्मप्रियो धर्मद-स्तारालीधवलच्छविर्विजयते सूरीश्वरोऽयं सदा ॥८०॥

यत्स्याद्वादपय:पवित्रमनसो मर्त्या अमर्त्यैरपि, भ्राम्यन्ति भ्रमबोधभावविरहाः श्रीवन्द्यपादा भुवि ।
सद्बोधांशुनिरस्तमोहतमसं पाखण्डदोषापहं, श्रीनेमिं प्रणतोऽस्मि तं मुनिवरं भक्त्या त्रिधा सूरिणम् ॥८१॥
भूमीमण्डलमौलिरत्नसदृशं प्रेमप्रवृद्धाननो, विद्वच्चित्तचमत्कृतिप्रदमरं स्वाज्ञानजालापहम् ।
भक्त्या विग्रहधारिधर्ममिव तं प्रास्तप्रपञ्चं मुनिं, सूरिं स्वीयगुरुं नमामि मतिदं श्रीनेमिकल्पद्रुमम् ॥८२॥
भिन्दानो दृढसंशयान् नयपदे सद्यः प्रमादोच्चयं, छिन्दानो भविनां क्रियासु सहसा पाखण्डवादोद्यमम् ।
कुर्वाणो विफलं मधुद्रवसखैर्वाक्यैर्जिनेन्द्रागमे, विन्दानोऽतिबुधत्वकीर्त्तिमतुलां जीयात् स नेमिप्रभुः ॥८३॥
श्रीनेमीश्वरसूरिराज! तुलनां युष्मत्प्रतापस्य सं-प्राप्तुं व्योमवने विधाय तपसं सोऽप्राप्य तां किं न्वयम् ।
सायं वाडवजातवेदसि पतत्यङ्गारकल्पो यतः, प्रातः प्रातरयं सदोदयगिरौ सूर्यो दरीदृश्यते ॥८४॥
धर्मीयोजनधर्ममर्मदिशकः श्रीधर्मवर्मा नृषु, धर्माचार्यवरो नरोदधिसुतः श्रीधर्मवृद्धो भुवि ।
निर्मायो महितो महैर्महिमहिः श्रीमारमारो मुनी, राद्धान्तोदधिरम्यरामरसिकः संराजते सम्प्रति ॥८५॥
गुणानामावासो विहितहितदृष्टिश्च भविषु, निजब्राह्मीरज्ज्वा कुगतिपतितानुद्धरति यः ।
समस्तश्रीसङ्घानतपदयुगः प्राप्तविभवो, गणाचार्यो वर्योऽयमसमसुखं नो वितरतु ॥८६॥
सदाशोका लोकास्तव चरणचार्वब्जशरणाः, सुखास्वादामादा भवविरतिशान्त्युन्मुखहृदः ।
भवक्रीडाव्रीडा भुवि भविकपूज्या नरवराः, प्रतापाद् व्यापात् ते सुखमनुभवन्ति क्षितितले ॥८७॥
अशान्त्या दुःखार्त्तान् निजशिशुसमूहाँश्च विदिशा-मनुप्राप्तान् दृष्ट्वाऽखिलभुवनदेवी द्युतिवहा ।
यशःश्रीदानार्थं सुकलितपदा यत्र किमिव, पदप्राप्त्युद्धर्षस्तव दिशतु सूरीश! स शिवम् ॥८८॥
अतुल्यामूल्यान् ते विबुधहृदयाकर्षणपरान्, गुणान् स्मारं स्मारं सकलविबुधा विस्मयपथम् ।
न गच्छन्ति स्यन्ति प्रसितबहुपापानि न च क, इति त्वं सर्वेशो जगति विजयस्व प्रतिदिनम् ॥८९॥
स्वयम्बोधाच्छोधाज्जिनवचनरागैककुशलं, पवित्रं चारित्रं जननभनभाके नभमणिम् ।
अलाय्यत्रायि द्राक् शिशुवयसि येनाऽहमधिकं, नमामि स्वामीनं विभुविजयनेमिं तमनिशम् ॥९०॥
तवाऽऽलम्बादापद्विषममतुलक्रोधदहनं, स्फुरत्तृष्णाजालाचितमविदितान्तं भववनम् ।
समापन्ना दूना विषयबहुलज्वालपटलैः, परं पारं प्राप्तुं मुनिवर! भवन्त्येव निपुणाः ॥९१॥
अहो भव्याः शोकं त्यजत घनपाखण्डतमसा, परिभ्रष्टे मार्गे शरणमिह किं स्यादिति मुहुः ।
अयं नव्यो भानुः समुदयति सर्वान्धतमसं, स्मृतोऽपि व्याकर्षन् पदनखमिषान् नेमिसुगुरोः ॥९२॥
सुधासौन्दर्याढ्यं तव वचनमास्तां मम मुदे, विशाले संसारे विषयमृगतृष्णापरिचयात् ।
मुहुर्भ्रामं भ्रामं बहुतरपिपासाकुलतनो-र्हरन् मोहग्लानिं भवपथिकखेदं प्रशमयन् ॥९३॥
अरे काम! त्वं किं विसृजसि शरान् व्यर्थमधुना, स्फुरच्छास्त्रव्राताद् घनमनभिभेद्यं सुकवचम् ।
जनाः प्राप्ताः श्रीमद्वरविजयनेम्याह्वयगुरो-र्जिनप्रोक्ताचारप्रचरणसमाह्वं दृढतरम् ॥९४॥
हतो मोह! क्रोधश्शममुपगतो लोभ! कतरो, भवान् स्थातुं मर्त्ये व्रज विषयतृष्णे! त्वमधुना ।
कले! कस्ते दर्पः प्रसरति मुनेर्देशनमहा-भटे श्रीमन्नेम्याह्वयविबुधवर्यस्य परितः ॥९५॥
स्फुरन्मोहनिदाघार्त्तिं, शमयन् स्ववचोऽमृतैः ।
श्रीनेमिसूरिमेघोऽयं, पुष्णातु शुभवल्लरीम् ॥९६॥
मद्दीक्षादायकं सूरिं, शिक्षालापकमेव च ।
प्रेमप्रकर्षकव्यक्त्या, भक्त्या तं प्रणतोऽस्म्यहम् ॥९७॥

विषयव्याधिनिर्मुक्तं, शुद्धसिद्धान्तदेशकम् ।
निस्पृहं नाथमेकं तं, स्तुवे श्रीनेमिसूरिणम् ॥९८॥
घटिकादिवसावद्य, सफलत्वमवापतुः ।
वाणी मे सफला चाऽद्य, त्वन्नुतिं यत् समाश्रिता ॥९९॥
त्वद्भक्तिलीनचित्तोऽहं, स्तवमीहे सदा तव ।
तथाऽप्यज्ञतया नाथ !, वाग्दोषाद् विरमाम्यहम् ॥१००॥
ज्वलत्तमरुषानलप्रशमवारिपूरस्य त, इतिस्तवपरस्य संकलितदोषवृत्तेर्मम ।
गुणा हृदयतोषदा भविकबुद्धिभासोदया, भवन्तु सुखदायकाः पृथुभवामयोच्छेदकाः ॥१०१॥
श्रीमच्चान्द्रकुलोदधिप्रविलसच्चन्द्रोदयस्य व्यधात्, श्रीमन्**नेमि**विभोः स्तवं निजगुरोः प्रौढप्रभावोन्नतेः ।
शिष्यस्तद्गुणरञ्जितस्त्रिभुवनप्रख्यातकीर्त्तेर्मुनि-स्तस्य प्रीतिभराद् **यशोविजय** इत्याख्यो बुधानां मुदे ॥१०२॥
त्रायं त्रायं त्रिभुवनहितं सैष चारित्रतन्त्रं, नायं नायं नयमतिमहं श्रीगुरुं स्वान्तपद्मे ।
गायं गायं गुणगणनिधिं नेमिसूरिं सदाहं, श्रायं श्रायं श्रितगुणगणं श्रीजिनं सञ्चरामि ॥१०३॥
यस्मिन् भूरिगुणाकरे पुरवरे **भावा**भिधानेऽभवद्, विद्वत्कैरवपूजितस्य सुगुरोः श्री**नेमि**नाम्नः प्रभोः ।
योग्यं सूरिपदं ममाऽपि समभूद् यत्नः फलावाप्तिमान्, श्रीनेमीश्वरसूरिराज्यसमये तत्रैव तद्भक्तितः ॥१०४॥
सूरिस्तोत्रमिदं **यशोविजय**कश्चक्रे शतश्लोककं, चातुर्मास्यनिवासमाप्य युगवह्न्यब्धिद्विसंख्यामिते(२४३५) ।
वर्षे वीरशिवाप्तितः परिगते भाद्रे सिते पञ्चमी-तिथ्यां पुण्यमहानिशीथसमयस्योद्घोद्घयोगं वहन् ॥१०५॥
अन्यूनश्रमहृद्यपद्यरचनाचाराः क्षितौ सन्ति ये, वाग्देवीं समुपास्य तत्त्वकलनाभ्यासप्रपूर्णा बुधाः ।
ते धन्याः परदोषकीर्तनविधौ मूका इवाऽहर्निशं, जानन्त्येव हि ते स्खलन्त्यपि बुधा मार्गेऽपि सञ्चारिणः ॥१०६॥
स्तोकश्लोकमुदारवृत्तरचितं सम्प्राप्य ये कुर्वते, भूताविष्टमनोभिरुज्झितभयाः भूयश्चतुष्पादिकाम् ।
तेऽनल्पा इह सन्ति मन्दमतयः प्रोदूढगर्वा भुवि, धन्यास्ते कवयो जयन्ति भुवने ये शक्तिमन्तः स्वयम् ॥१०७॥
ये मर्त्याः प्रपठन्ति सूरिनवनं कल्याणकेलीगृहं, ते विज्ञानमवाप्य धर्ममतुलं सम्प्राप्नुवन्ति स्थिरम् ।
लोके ख्यातिमुदारतां बहुधनं सम्प्राप्य भूयोभव-भ्रान्त्युच्छेदि भजन्ति चाऽन्तसमये चारित्रमत्युज्ज्वलम् ॥१०८॥

॥ इति श्रीकुन्देन्दुहारघनसारकाशकुसुमनीरक्षीरमरालमृडालादिकान्तिप्रतिपक्षक्षोणीमण्डलप्रतायमानकीर्तिपुण्डरीकस्य सहस्रकिरणसहस्रप्रभाभासमानप्रतापानलज्वालापटलपतङ्गायमानक्रोधादिगणस्य महोपदेशामृतनिर्झरसेचन-पल्लवितजिनधर्म्मामृतफलदानशौण्डीरकल्पवृक्षस्य श्रीमद्विजय**नेमिसूरी**श्वरस्य पादसरोरुहप्रचलन्मक-रन्दरसास्वादतुन्दिलमानसमिलिन्देन **यशोविजये**न प्रणीतं स्वगुरुसूरिशतकं समाप्तम् ॥

## ॥ २०. द्वितीयान्तपदमाचार्याष्टकम् ॥

श्री**नेमिसूरिं** गतदोषसङ्गं, मेघौघगम्भीरविनादचङ्गम् ।
स्फूर्ज्जत्प्रभावं गुणिलोकनन्दं, श्रेयोनिधिं स्तौमि वरं मुनीशम् ॥१॥
लावण्यगेहं सुखसस्यमेघ-मज्ञानदावानलदाहनीरम् ।
भव्यावलीसेवितपादपद्मं, श्रीनेमिसूरिं प्रणमामि धीरम् ॥२॥
सिद्धान्तशास्त्रावलिमर्मबोधं, संसारनीरेश्वरपारपोतम् ।
विश्वोपकारं गुणिलोकसारं, श्रीनेमिसूरिं प्रणमामि धीरम् ॥३॥
विश्वे प्रपूज्यं शमशान्तवृत्तिं, सद्बोधदातारमतिप्रधानम् ।
तीर्थङ्करस्तोत्रविलुब्धचित्तं, श्रीनेमिसूरिं प्रणमामि धीरम् ॥४॥
श्वेताम्बरौघाब्धिविकासचन्द्रं, दुःखानलौघप्रशमाब्दतुल्यम् ।
मायात्रियामारविभासपक्षं, श्रीनेमिसूरिं प्रणमामि धीरम् ॥५॥
श्रीमत्तपोगच्छसुराध्वसूर्यं, शुभोपदेशामृतवारिवाहम् ।
श्रीसज्जनैर्वन्दितपादपद्मं, श्रीनेमिसूरिं प्रणमामि धीरम् ॥६॥
कल्याणविध्वंसकमोहरेणु-ध्वंसप्रचण्डानिलसोदरं च ।
बिभ्राणमात्तं स्थिरतामुदारां, श्रीनेमिसूरिं प्रणमामि धीरम् ॥७॥
कल्याणवारीश्वरवृद्धिचन्द्र-माचारमार्गौघनिरूपकं तम् ।
श्रीवीरवाक्यानुविधायकं च, श्रीनेमिसूरिं प्रणमामि धीरम् ॥८॥
वीरं सदा दुर्नयपङ्कजाली-प्रालेयकल्पातुलवाग्विलासम् ।
पूज्यं **यशो**वार्धिविकासचन्द्रं, श्रीनेमिसूरिं प्रणमामि धीरम् ॥९॥

इति पदवाक्यप्रमाणपारावारपारीणा-ऽऽचार्यवर्यश्रीमद्विजय**नेमिसूरीश्वर**शिष्य-
प्रवर्तक**यशोविजय**प्रणीतं द्वितीयान्तपदमाचार्याष्टकं समाप्तम् ॥

## ॥ २१. गुप्तक्रियापदमाचार्याष्टकम् ॥

गुप्तेन्द्रियं सकलशास्त्रमहाब्धिमन्थ-बुद्धिप्रभावसमवाप्तपवित्रबोधम् ।
*गुप्तक्रियापदमयेन च मुक्तकेन, श्लोकाष्टकेन महयामि सुमेन **नेमिम्** ॥१॥

श्रीवीरनाथवरवाक्यरसानुसारिन् !, मिथ्याप्रपञ्चरचनारहितप्रचार ! ।
दुर्बोधलोकवरबोधकरप्रताप !, चारित्रपात्र ! सततं शरणं चते त्वाम् ॥२॥

श्रीदेहकान्तिकलनाविधुरेव साक्षाद्, द्राक्षाभवाक्यरसकप्रथितप्रभाव ! ।
श्रीमन्नयावलिविदाप्रतिमाकृते ! त्वं, भद्रङ्कर ! प्रतिदिनं शमशान्तवृत्ते ! ॥३॥

---

* क्रियागुप्तादिलक्षणं –
क्रियादिकं स्थितं यत्र पदसन्धानकौशलात् ।
स्फुटं न लभ्यते तच्च क्रियागुप्तादिकं यथा ॥
क्रिया इति क्रियापदं गुप्तं यस्मिन् तत् क्रियागुप्त आदिर्यस्मिन् तत् क्रियागुप्तादिकम् । आदिशब्देन ''क्रिया-कारकसम्बन्धगुप्तान्यामन्त्रितस्य च । गुप्तं तथा स्तिवाद्यस्य लिङ्गस्य वचनस्य च'', सुप्तिङ्रूपस्य द्वयस्य वचनस्य च । कारकशब्दे 'कर्त्ता कर्म च करणं सम्प्रदानं तथैव च अपादानाधिकरणमित्याहुः कारकाणि षट्' ॥
राजन्नवघनश्यामनिस्त्रिंशाकर्षदुर्जयः ।
आकल्पं वसुधामेतां विद्विषोद्यरणे बहून् ॥
पुंस्कोकिलकुलस्यैते नितान्तमधुरारवैः ।
सहकारद्रुमा रम्या वसन्ते कामपि श्रियम् ॥
राजन्नवघनश्याम इत्यत्र 'अव', विद्विषोद्यरणे इत्यत्र 'द्य', नितान्तमधुरारवैरित्यत्र 'अधुः' ॥

श्लोक-२ भ्वाद्युभयपदिन**श्चतेगृ याचन** इत्यस्य अस्मदर्थैकवचने **चते** इति रूपम् ।

श्लोक-३ भ्वादिगणपठितपरस्मैपदिनः **अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचन-क्रियेच्छादीप्त्यवाप्त्यालिङ्गनाहिंसादहनभासवृद्धिषु** इत्यस्य पञ्चमीविभक्त्याः हौ प्रत्यये परे **अव** इति रूपम्।
अथवा भ्वादिगणपठितत्वेन **डुकृंग् करणे** इत्यस्य पञ्चम्यां हौ प्रत्यये परे **कर** इत्यपि रूपमत्र गुप्तक्रियापदतया बोध्यम्।

यत्पादपङ्कजमथो विबुधाश्रयस्स्यात्, पापौघशान्तिकरणं हरणं मदस्य ।
पुण्यप्रभावपरिबोधितभिल्लवृन्दं, तं नेमिसूरिवरमाप्तवरं प्रणव्यम् ॥४॥
कस्येह दुःखभरनाशकरा यदीय-वाणी न च श्रुतिसुखा विबुधाग्रगानाम् ।
सौख्यालयं विबुधजातविवन्दितं तं, श्रेयोनिधिं समयवेदकमाप्तसूरिम् ॥५॥
यद्ध्यानभाजस्सततं मनुष्या, यस्योपदेशाच्छिवराजमार्गम् ।
प्रापन्ति सौख्यालयमाप्तदीप्तं, सूरिं तु तं सौख्यकरं महेनम् ॥६॥
श्रीनेमिसूरीश्वरराजमुख्य !, पुण्यौघराजाऽथ दिने दिने मे ।
भूमण्डलेऽवद्यविमुक्तदेह !, श्रीवीरभक्तांहसमेव पूज्य ! ॥७॥
नेमे ! बुधस्याऽऽप्तभवाब्धिपोत !, पापानि दुःखैकनिबन्धनानि ।
कल्याणवल्लीसुवितानानाब्द !, शश्वद्यशोवृद्धिवितानक ! त्वम् ॥८॥

---

श्लोक-४ भ्वादिगणपठितोभयपदिनः **श्रिग् सेवाया**मित्यस्याऽऽङ्पूर्वकस्य पञ्चमीविभक्त्यां हिप्रत्यये परे **आश्रय** इति रूपम् । श्रीमद्धेमचन्द्राचार्योक्तस्य प्रथमाध्यायस्य तृतीयपादपठितेन ''अदीर्घाद्विरामैकव्यञ्जने'' इत्यनेन असंयुक्तव्यञ्जने यकारे परे सकारस्य द्वित्वं वेदितव्यमत्र ।

श्लोक-५ भ्वादिगणपठितपरस्मैपदिनः **इं दुं द्रुं शुं स्त्रुं गतौ** इत्यस्य पञ्चमीविभक्त्यां हौ प्रत्यये परे सम्पूर्वकस्य **समय** इति रूपमत्र गुप्तक्रियापदतया वेदितव्यम् ।

श्लोक-६ भ्वादिगणपठितपरस्मैपदिनः **अर्ह मह पूजायाम्** इत्यस्य पञ्चम्यां हौ परे **मह** इति रूपम् ।

'महेन'मित्यत्र ''पतीन्द्रः स्वामिनाथार्यः प्रभुर्भर्त्तेश्वरो विभुः ईशितेनो नायकश्च'' इत्यभिधानचिन्तामणिपठितः स्वामिवाचकः इनशब्दो बोध्यः ।

श्लोक-७ दिवादिगणपठितपरस्मैपदिनः **दों छोंच् छेदने** इत्यस्य धातोरवपूर्वकस्य पञ्चम्या विभक्त्या हौ प्रत्यये परे **अवद्य** इति रूपमत्र वेदितव्यम् ।

श्लोक-८ दिवादिगणपठितपरस्मैपदिनः **षोंच् अन्तकर्मणि** इत्यस्य धातोः पञ्चम्या विभक्त्या हौ प्रत्यये परे ''ओतः श्ये'' इति औकारलोपे कृते 'स्य' इति रूपमत्र ।

॥ इति सारासारविचारचातुरीचमत्कृतसहृयहृदय-श्रीमद्विजय**नेमिसूरि**शिष्यप्रवर्त्तक**यशोविजय**प्रणीतं गुप्तक्रियापदमाचार्याष्टकं स्वगुरुस्तोत्रं समाप्तम् ॥

# नूतनस्तोत्रसङ्ग्रहः

◆

पं. श्रीप्रतापविजयगणिः

# अनुक्रमः


| | | पृष्ठम् |
|---|---|---|
| | प्रस्तावना | ६७ |
| १. | चतुर्विंशतिजिनचैत्यवन्दनानि - १ | ६८ |
| २. | चतुर्विंशतिजिनचैत्यवन्दनानि - २ | ७५ |
| ३. | विविधच्छन्दोभिर्ग्रथिता जिनचतुर्विंशिका | ८२ |
| ४. | चतुर्विंशतिजिनस्तवः - १ | ९२ |
| ५. | चतुर्विंशतिजिनस्तवः - २ | ९४ |
| ६. | चतुर्विंशतिजिनस्तवः - ३ | ९६ |
| ७. | पञ्चजिनस्तुतयः | ९८ |
| ८. | शङ्खेश्वरपार्श्व-षोडशकम् | १०० |
| ९. | वीरस्तोत्रम् | १०२ |
| १०. | परमात्म-पञ्चविंशिका | १०७ |
| ११. | शान्तिनाथ-पार्श्वनाथ-चैत्यवन्दने (प्राकृते) | १०९ |
| १२. | वृद्धिविजय-द्वात्रिंशिका | ११० |
| १३. | विजयनेमिसूरि-षोडशकम् | ११३ |
| १४. | विजयनेमिसूरि-अष्टकम् (प्राकृतम्) | ११५ |
| १५. | विजयनेमिसूरि-अष्टकम् (समसंस्कृतप्राकृतम्) | ११६ |
| १६. | दण्डकवृत्तेन गुरुस्तुतिः | ११७ |
| १७. | प्रशस्तिः | ११८ |

# प्रस्तावना

इह निःसीमानवद्यपद्यगद्यात्मककाव्यस्तुतिनाटकचम्पूसाहित्याद्यनेकाऽप्रतिमतन्त्रप्रबन्धकुशला निजहृद्यविद्याऽधरीकृतविद्याधराः स्वकीयानघातुलचटुलवाक्चातुरीकलाप्रभावपराजितामरगुरुदैत्यगुरवोऽनेके विद्वन्मणयो महान्तः कवयो बोभवांबभूवुः । यद्यपि तैः प्राचीनैर्महाकविभिरनेकशः श्रीमतां भगवतां स्तोत्ररूपाणि काव्यानि स्वान्योपकाराय चरीकृतानि नयनपथमद्यापि प्रभूतान्यायन्त्येव, तथापि तेषु कालानुभावाद्धीयमानमतीनां तथाऽलङ्काराख्यानाख्यायिकाऽक्षरच्युतकमात्राच्युतकबिन्दुमतीगूढचतुर्थपादगूढकर्तृक्रियाकर्मप्रहेलिकार्थगौरवादिपरिभूषितगीर्वाणभाषासुकुण्ठितप्रतिभानां जनानामुपकृतये त्रिभुवनजनमनःसरोरुहोल्लासनसहस्रकिरणायमानानां गाम्भीर्यधैर्यशौर्याद्यनेकप्रौढतरगुणगणालङ्कृतचेतसां यथावस्थितस्वात्मीयासाधारणज्ञानगुणप्रमुदितविश्वत्रयाखिलसहृदयहृदयानां स्वपरसमयसारमवगम्य कर्कशकुयुक्तिकलितकुमतिसमयकुयुक्तिकलापखण्डनसमर्थितयुक्तीनां प्रौढसाम्राज्यभाजां भवभयानककूपोदरपतितजन्तुजातोद्धरणरज्जुसन्निभानां त्रिभुवनाखिलभव्यजनमानसमानसकादम्बायमानानां मिथ्यात्वान्धतमसप्रचारविघटनैकभानूनां भारतभूमिवलयभूषणानां प्रौढतरप्रतापभाजां महाव्रतधारिप्रधानानां निखिलविद्याकलाऽलङ्कृतानामार्हतधर्मदेशनासुधारसस्यन्दनसन्तोषितजगद्भव्यमानसानामज्ञानतिमिरावृतविलोचनोन्मीलनजगल्लोचनायमानानां सदाचरणनलिनरसाकृष्टभव्यद्विरेफाणां जगदुपकारिणां वीतस्पृहाणां निखिलनिर्ग्रन्थनिकरशिरोमणीनां रत्नत्रयभाजां, बृहस्पतिसमशोभितवाग्विलासानां श्रीमतां गुरुवर्याणां **विजयनेमिसूरीश्वराणां** चरणकमलचञ्चरीकायमाणो मन्दमतिरपि तदनुकम्पामवाप्य **प्रतापविजया**ख्यो मुनिरयं स्वपरोपकारायाऽदुर्बोधाभिधेयैः शब्दैर्विरचय्येमां साधारणीं स्तुतिं विद्वज्जनमनोनातिचमत्कारिणीं भक्तितः श्रीगुरुचरणपूजां विधातुमुद्यतो जलजीकृतां गुरुवरचरणेभ्यः समर्पयति । तामुररीकुर्वन्तु गुरुवर्याः ॥

अस्यां कृतौ नाऽर्थगौरवं नाऽपि पद्यलालित्यं नाऽप्यलङ्कारादिचमत्कृतिः नाऽपि शब्दलालित्यं तथापि चेयं स्तुतिः सकलजिननाथगुरुपरमगुरुगुणस्तोत्रगुम्फितत्वाच्छुभे यथाशक्ति यतनीयमिति जिनोपदेशाच्च सहृदयानां हृदये प्रीतिमाधास्यति सहृदयाश्च यत्र कुत्रचित् स्खलितं चेत् प्रतिभास्यति तत् सर्वं सानुकम्पं संशोध्य बंभणिष्यन्तीति विज्ञप्तिः ॥

॥ कल्याणमस्तु जगताम् ॥

॥ गुरुवर्या विजयन्तेतराम् ॥

# ॥ १. श्रीचतुर्विंशतिजिनचैत्यवन्दनानि - १ ॥

## ( १ )
## ॥ श्रीआदिनाथ-चैत्यवन्दनम् ॥

ऐन्द्रावलिप्रणतपादपयोजयुग्मं, वाचांपतिं वृजिनवृन्दहरं जनानाम् ।
आह्लादनं भुवनलोकविलोचनानां, श्री**नाभिराजसुत**माप्तमहं नमामि ॥१॥
श्रीनाभिपार्थिवकुलार्णवशीतभानुं, दुष्कर्ममाथकमपापमपारिजातम् ।
सद्धर्मवाचकमजं गतकामतापं, कल्याणवृक्षवनपल्लवनाम्बुवाहम् ॥२॥
प्रौढप्रतापभवनं भुवनैकबन्धुं, सम्मोहतामसवितानविनाशहंसम् ।
गीर्वाणमौलिमणिचर्चितपादपीठं, कुन्दावदातयशसं जिनमाद्यमीडे ॥३॥ युग्मम् ॥

## ( २ )
## ॥ श्रीअजितनाथ-चैत्यवन्दनम् ॥

बाह्यान्तरारिनिकरक्षतिधूमकेतु-श्चामीकरोज्ज्वलरुचिर्जनितप्रमोदः ।
चन्द्रः प्रहर्षजलधौ शमयूषलीनः, कन्दर्पजिद् विजयता**मजितो** जिनेन्द्रः ॥१॥
निर्दूषणं निखिलविष्टपरक्षितारं, त्रैलोक्यलोकगणबान्धवमाप्तमुख्यम् ।
निःशेषलोकनरनेत्रचकोरचन्द्रं, वन्दे मुदा प्रतिदिनं जितशत्रुपुत्रम् ॥२॥
पापं विधूय पदमव्ययमाप योऽत्रा-ऽत्रासोद्धुतातिशयसंहतिभूरिशोभः ।
**तारङ्ग**तीर्थतिलकः करटीन्द्रलक्ष्मा, देवोऽजितो दिशतु वाञ्छितसर्वसिद्धिम् ॥३॥

## ( ३ )
## ॥ श्रीसम्भवनाथ-चैत्यवन्दनम् ॥

सौवर्णवर्णपरिशोभितदिव्यदेहं, वाजीन्द्रलक्ष्मपरिभूषितपादयुग्मम् ।
पापाद्रिपेटकविदारणदीप्रवज्रं, संस्तौमि सम्भवजिनं सुरसङ्घसेव्यम् ॥१॥

भव्यात्मनां परमबोधविधानदक्षः, सद्देशनाम्बुविशदीकृतभव्यचेताः ।
भव्यात्मभृङ्गपरिसेवितपादपद्मः, श्री**सम्भवो** जयति वाञ्छितकामधेनुः ॥२॥
स्फूर्जन्मनोवचनविग्रहदुष्टयोग-व्यापारवन्ध्यहृदयो जितशत्रुवर्गः ।
संछिन्नभव्यहृदयान्तरमोहवल्लिः, सेनोद्भवोऽर्पयतु मङ्गलमालिकां मे ॥३॥

## ( ४ )
## ॥ श्रीअभिनन्दनजिन-चैत्यवन्दनम् ॥

भावारिसिन्धुरसमूहमृगाधिराजः, कैवल्यदर्पणविलोकितसर्वभावः ।
शाखामृगाङ्कललिताङ्घ्रिसरोजयुग्मो, देवो**ऽभिनन्दन**जिनो वितनोतु सौख्यम् ॥१॥
नीरागनिष्कलहनिष्कलुषाऽक्षमुख्या-ऽनीनप्रमादपरिवर्जितचित्तवृत्ते ! ।
त्वद्दर्शनेन जिन ! संवरभूपसूनो !, पापं ममाऽखिलमधोमुखतां प्रपन्नम् ॥२॥
भावावभासकमतीतसमस्तदोषं, निःश्रेयसाचलशिलासु सुशोभमानम् ।
सूक्त्या पराभवितसर्वकुवादिमानं, वन्देऽभिनन्दनजिनं नितरां निरीशम् ॥३॥

## ( ५ )
## ॥ श्रीसुमतिनाथ-चैत्यवन्दनम् ॥

यस्याऽन्तिके वसति भक्तिपरामराणां, कोटिर्जरामरणशोकरुजादिशून्यः ।
विज्ञो विकारपरिवर्जितचित्तनेत्रो, वीतस्पृहो जयति मेघनरेन्द्रसूनुः ॥१॥
रागादिशत्रुगिरिभेदनवज्रकल्पो, दानाभिनन्दितसमस्तजगत्त्रयार्थी ।
क्रौञ्चाख्यविष्किरकलङ्कितपादयुग्मो, भूयाच्छ्रिये स **सुमति**र्भगवाञ्जिनेन्द्रः ॥२॥
जैनेन्द्रशासनपयोधिविवर्द्धनेन्दुं, कारुण्यसागरमपास्तसमस्तदोषम् ।
निर्मायमिन्द्रमहितं भगवन्तमाप्तं, कल्याणकेलिसदनं सुमतिं नमामि ॥३॥

## ( ६ )
## ॥ श्रीपद्मप्रभजिन-चैत्यवन्दनम् ॥

अज्ञानतामसवितानविघातसूर्यः, पुण्यात्मसन्ततिसमीहितपारिजातः ।
बुद्ध्या विमानितमहेन्द्रगुरुर्जिनेन्द्रः, **पद्मप्रभो** विजयतां शिवदानशौण्डः ॥१॥
दुर्दम्यदुर्जयशिवाध्वसुविघ्नभूत-रागाद्यनेकपरिपन्थिगणप्रणाशम् ।
हृच्छल्यवृक्षपरिशातनपुण्डरीकं, पद्मप्रभं प्रतिदिनं प्रणमामि भक्त्या ॥२॥
देवेन्द्रपङ्क्तिपरिचुम्बितपादपद्मः, कल्याणकृन्मनितसर्वपदार्थसार्थः ।
अर्त्तिं निवर्त्तयतु नो जिनमौलिमौलिः, संसारभिन्मदनजिद् धरराजपुत्रः ॥३॥

## ( ७ )
## ॥ श्रीसुपार्श्वजिन-चैत्यवन्दनम् ॥

भक्त्या महेन्द्रमहितो गतरोगशोकः, संसारभीतशरणं कनकाद्रिधीरम् ।
श्रीस्वस्तिकाङ्कविलसच्चरणारविन्द-श्छिन्दन्तु विघ्ननिवहान् भविनां **सुपार्श्वः** ॥१॥
शान्त्याद्यनन्तगुणगौरवमास्रवन्तं, संसारसिन्धुपततोऽसुमतस्तरण्डम् ।
सूक्तिच्छटाविहितसर्वजनप्रमोदं, वन्दे सुपार्श्वभगवन्तममेयवीर्यम् ॥२॥
पुण्याघकर्मनरकामरलोकजीवा-द्यस्तीतितत्त्वपरिबोधकरम्यवाचा ।
प्रोक्तापलापकसमस्तकुवादिवृन्द-दर्पोद्भिदं प्रणिदधेऽमदनं सुपार्श्वम् ॥३॥

## ( ८ )
## ॥ श्रीचन्द्रप्रभस्वामि-चैत्यवन्दनम् ॥

सिंहासनस्थभगवान् निजदेशनाभि-र्भव्यात्महृन्मलविशोधनजीवनीयैः ।
निर्मथ्यमानजलधिध्वनितुल्यगाढैः, सम्बोधिताखिलसुभव्यगणोऽवताद् वः ॥१॥
सद्ध्यानजीवननिमज्जनशुद्धकायः, पाथोधिजाङ्कपरिशोभितपादपद्मः ।
**चन्द्रप्रभो** दलयतूत्तमभक्तिभाजां, विघ्नानि वाञ्छितफलानि च यच्छतान्नः ॥२॥
श्रोतस्समूहदमिनं भुवनाभिवन्द्यं, मिथ्यात्वनीरनिधिशोषणकुम्भजातम् ।
भव्यासुमद्व्रजसमीहितकल्पवृक्षं, चन्द्रप्रभं जिनवरं प्रणमामि नित्यम् ॥३॥

## ( ९ )
## ॥ श्रीसुविधिनाथ-चैत्यवन्दनम् ॥

सुग्रीवराजकुलविष्णुपदोग्रभानुं, निष्पङ्कपङ्कजमुखं वृजिनौघमुक्तम् ।
कारुण्यवारिधिमवाप्तशिवोरुलक्ष्मीं, देवाधिदेवमनिशं **सुविधिं** नमामि ॥१॥
पीयूषदीधितिरुचिर्भुवनावतंसो, मोहादिवर्गविजयी भववार्धिसेतुः ।
सूत्रामपङ्क्तिपरिपूजितदिव्यबिम्बो, भव्यां मतिं दिशतु मे सुविधिर्जिनेशः ॥२॥
विश्वाधिपः सुचरितोऽमलधर्मबोधः, स्फूर्ज्जद्धृषीकचलवाजिजयप्रदक्षः ।
निःशेषकर्मतृणदाहनचित्रभानुः, शान्तः शिवाय भवतान्नवमो जिनेशः ॥३॥

## ( १० )
## ॥ श्रीशीतलनाथ-चैत्यवन्दनम् ॥

सद्धर्ममर्मकथनाद्भुवनप्रसर्पत्-कीर्त्तिः प्रतापपरिपूरितदिग्विभागः ।
श्रीवत्सलक्षणयुतो गतसर्वकामः, श्री**शीतलो** विजयतां मतिमान् कृतार्थः ॥१॥
वीताभिलाषमचलं नतदेवराजं, कायप्रभाशमितमोहमहान्धकारम् ।
श्रीशीतलं सकलजन्तुकृपाविधानं, नित्यं नमामि परितोषितसर्वलोकम् ॥२॥

सङ्ख्यावतां हृदयपद्मविलासहंसं, यन्नामतोऽखिलभयानि प्रयान्ति दूरम् ।
तं वीतरागममलं शिवसौख्यभाजं, श्रीशीतलं जिनपतिं सुगुणं श्रयेऽहम् ॥३॥

## ( ११ )
## ॥ श्रीश्रेयांसनाथ-चैत्यवन्दनम् ॥

सत्प्रातिहार्यललितोऽतिशयर्द्धिपात्रं, सत्खड्गिलक्षणयुतः परमेष्ठिमुख्यः ।
श्रेयोऽर्थिनां परममार्गप्रकाशदीपः, श्यामोद्भवो भवतु भूरिविभूतये वः ॥१॥
यस्योपदेशवचनं परिपीय कर्णै-र्दक्षा भवन्त्यमृतपानविधौ सलज्जाः ।
पुण्याशयं परमपुण्यवतां प्रबोधं, **श्रेयांस**नाथमनिशं तमहं प्रणौमि ॥२॥
संसारवार्ध्युदरपीडितजन्तुजात-संरक्षणैकतरणिप्रतिमाङ्घ्रियुग्म ! ।
देवाधिदेव ! मम वाञ्छितसिद्धिहेतुं, नैव प्रभो ! त्वदपरं कमपीह जाने ॥३॥

## ( १२ )
## ॥ श्रीवासुपूज्यस्वामि-चैत्यवन्दनम् ॥

त्रैलोक्यकीर्त्तितगुणं **वसुपूज्यपुत्रं,** संसारबन्धरहितं महनीयवाचम् ।
देवं सदा महिषलाञ्छनयुक्तपादं, वन्दे जयातनुभवं नवसूर्यकान्तिम् ॥१॥
पूज्यः सदा स भगवान् सदयो जिताक्षो, गाम्भीर्यधैर्यविनयादिगुणैः प्रधानः ।
श्रीराडशेषजनकामितकल्पवृक्षो, दद्याद् विभुः शिवसुखं वसुपूज्यसूनुः ॥२॥
श्रीमन्दराद्रिशिखरे किल यस्य भक्त्या, जन्माभिषेकमनघं प्रणितेनुरिन्द्राः ।
यस्यांऽह्रिपद्मनिकटे शुशुभे च चण्डा, देयात् स नोऽव्यवहितां वरमुक्तिमालाम् ॥३॥

## ( १३ )
## ॥ श्रीविमलनाथ-चैत्यवन्दनम् ॥

शम्भो ! भवार्णवपरिभ्रमता मयेह, त्वच्छासनप्रवचनप्रतिमप्रकाशम् ।
न प्रापि कुत्रचिदपि प्रतिबोधदक्षं, प्रामाण्यमत्र शरणं **विमल**प्रभो ! त्वम् ॥१॥
यस्याऽवलोक्य च मिथो गुरुवैरिणोऽपि, निष्पङ्कवक्त्रमभजन् हृदि मित्रभावम् ।
प्रोद्दाममारकरटीन्द्रमृगाधिराजं, त्वां नौमि सौख्यजननं विमलाऽस्तरोषम् ॥२॥
कल्याणकेषु जनितेषु जिनस्य यस्य, सौख्यं क्षणं निरयवासवतां बभूव ।
स्याद्वादवादिनमनङ्कममर्त्यपूज्यं, तं भावतो विमलनाथमहं भजामि ॥३॥

## ( १४ )
## ॥ श्रीअनन्तनाथ-चैत्यवन्दनम् ॥

विश्वारविन्दतरणिं भुवनार्त्तिनाशं, दुष्कर्मवल्लिवनतीक्ष्णकुठारकल्पम् ।
संस्तौम्यनन्तगुणभाजनमिद्धतीर्थं, तीर्थेश्वरं मुनिपतिं त**मनन्त**नाथम् ॥१॥

निःशेषनाकिनरनाथनताङ्घ्रिपीठः, कामेभपञ्चवदनः सुयशस्तनूजः ।
गोक्षीरकुन्दधवलामिषरक्तरूपो, देवश्चिरं विजयतां गलिताखिलेच्छः ॥२॥
उत्पाटिताखिलमदादिविरोधिवर्ग्गं, मोक्षाध्वदर्शनदशेन्धनभावमाप्तम् ।
दर्पातिपातिनमहं परतीर्थिकानां, तन्नौम्यनन्तभगवन्तमचिन्त्यशक्तिम् ॥३॥

## ( १५ )
## ॥ श्रीधर्मनाथ-चैत्यवन्दनम् ॥

हन्तुं समस्तघनकर्मततीस्त्वमेव, मातङ्गमण्डलततीर्व मृगाधिराजः ।
श्री**धर्म**नाथ ! परमार्थविधानदक्ष !, दक्षोऽस्यतस्त्वयि वयं गुरुभक्तिभाजः ॥१॥
विज्ञं गिरां गुरुमगाधभवाब्धिपारं, प्राप्तं निरावरणकेवलभासमानम् ।
ज्योतिर्मयं कुलिशलाञ्छनलक्षितांह्रिं, देवं स्तुमो गुरुगुणं प्रभुधर्मनाथम् ॥२॥
सिद्धः प्रतीतमहिमा भुवनाब्जभानु-र्भव्यात्मबोधकुशलः करुणावतारः ।
देयाज्जगत्त्रयपतिर्जिनधर्मनाथो-ऽव्याबाधसौख्यपदवीमनघामलोलाम् ॥३॥

## ( १६ )
## ॥ श्रीशान्तिनाथ-चैत्यवन्दनम् ॥

स्फूर्जत्कषायदनुजान्वयवज्रपाणिं, श्रेयस्करं परमबोधकरं जिनेन्द्रम् ।
श्रीविश्वसेनकुलसिन्धुसुधामरीचिं, श्री**शान्ति**नाथमनिशं नितरां नमामः ॥१॥
पूज्यः कुरङ्गवरलक्षणलक्षितांह्रि-र्योऽपालयत् प्रथमजन्मनि लोहितांह्रिम् ।
यस्य त्रिलोकवलये महिमा प्रसिद्धः, शान्तिः सदा स दिशतात् पदवीमपङ्काम् ॥२॥
एनस्तमोभरहरं भवरोगवैद्यं, सज्ज्ञानपूर्णहृदयं जगदान्ध्यनाशम् ।
जाड्यापहारनिपुणं जिनभक्तिभाजां, शान्तिं नुमो वयमिमं वरधर्मदेशम् ॥३॥

## ( १७ )
## ॥ श्रीकुन्थुनाथ-चैत्यवन्दनम् ॥

अज्ञानपांसुपिहिताक्षजगज्जनानां, सद्धर्म्मपद्धतिगवेषणविह्वलानाम् ।
सन्मार्गप्रापणरथिप्रतिमं जिनेन्द्रं, दीप्रां द्युतिं कनककान्तिनिभां दधानम् ॥१॥
पूज्यं विनिर्जितमहामदनारिबाणं, वीतस्पृहं विगतसङ्गमभङ्गरङ्गम् ।
लोकाग्रभागविलसच्चरणारविन्दं, कल्याणकोटिजननं निजभावमग्नम् ॥२॥
क्षान्त्यालयं त्रिभुवनाञ्चितपादपद्मं, छागोपलक्षितपदं भवतापतोयम् ।
चन्द्राननं क्षपितकर्मविपाककूटं, **कुन्थुं** जिनं प्रतिदिनं हृदये वहामि ॥३॥ त्रिभिर्विशेषकम् ॥

## ( १८ )
## ॥ श्रीअरनाथ-चैत्यवन्दनम् ॥

दक्षो जगन्निखिलकष्टरजोऽहिकान्तो, हावैर्जितो न भुवनाधिपती रमाणाम् ।
विभ्राजमानचलचामरभूरिभूति-स्तीर्थेश्वरः कनकपर्वतसारधैर्यः ॥१॥
संसारतोयनिधितारणकर्णधारो, निर्दोषशान्तचरितश्चपलाक्षजेता ।
देवीति नाम जननी किल यस्य गीता, निर्दम्भधीः प्रवितरत्वभिवाञ्छितं नः ॥२॥ द्वाभ्यां युग्मम् ॥
ज्ञानादिरत्नपरिपूर्णहृदं विमानं, स्फूर्जद्‌गिरा परमपावितभव्यचित्तम् ।
मुक्त्येकबन्धुररमावरणाभिलाषाः !, सिद्धिप्रदं प्रणमताऽरजिनं पवित्रम् ॥३॥

## ( १९ )
## ॥ श्रीमल्लिनाथ-चैत्यवन्दनम् ॥

भव्यौघचिन्तितपदार्थसुधाशिवृक्षो, देवेन्द्रमौलिमुकुटार्चितपादपीठः ।
कल्याणकृत्कनककुम्भकलङ्कयुक्तः, श्री**मल्लि**तीर्थपतिरन्तयताद् विपत्तिम् ॥१॥
दानं विधाय किल वार्षिकमत्र योऽसौ, भेजे व्रतं परममोक्षपथप्रदीपम् ।
सेहे परीषहगणं स मुदाऽऽत्मशुद्ध्यै, मल्लिः सदा भवतु कामितसिद्धये वः ॥२॥
जन्मादिकष्टविरहात् समवाप्तसिद्धे-र्वाचां गुरोः सकलनिर्जरपूजितांह्रेः ।
सज्ज्ञानरत्नजलधेः करुणाकरस्य, मल्लेर्नुमोऽङ्घ्रिकमलं भवसिन्धुनावम् ॥३॥

## ( २० )
## ॥ श्रीमुनिसुव्रतस्वामि-चैत्यवन्दनम् ॥

विश्वावतंसमशुभव्रजनाशदक्षं, निष्कामनिर्मदचरित्रममर्त्यपूज्यम् ।
दानाद्यसन्निभचतुर्विधधर्मदेशं, वन्दे **सुमित्रतनयं** नवमेघकान्तिम् ॥१॥
येनोपमर्दितमशेषशरीरिजाड्यं, रागाद्यरातिततयो निहताश्च येन ।
तं तीर्थनाथमनघं भवपारलब्ध्यै, वन्दे सुमित्रतनयं नवमेघकान्तिम् ॥२॥
संप्राप्तशाश्वतपदं विपदां विनाशं, दौलेयलाञ्छनविभूषितपादपीठम् ।
कैवल्यलोकजननीद्रवरम्यसद्म, वन्दे सुमित्रतनयं नवमेघकान्तिम् ॥३॥

## ( २१ )
## ॥ श्रीनमिनाथ-चैत्यवन्दनम् ॥

दृप्यत्कुवादिसमयावनिसारसीरं, मोहान्धकारदलनार्यमणं मुनीशम् ।
सत्कामनाकलितभक्तिमदेकलभ्यं, भक्त्या नमामि सततं **नमि**नाथदेवम् ॥१॥
छत्रत्रयं शिरसि यस्य विभाति नित्यं, श्वासोऽब्जगन्धसदृशोऽद्भुतमस्ति रूपम् ।
विध्वस्तमोहमदशोकमुखाद्युपाधिं, भक्त्या नमामि सततं नमिनाथदेवम् ॥२॥

भामण्डलं गुरुमहश्च यदुत्तमाङ्ग-पृष्ठे विभाति हि विडम्बितसूर्यशोभम् ।
तं पूज्यपादकमलं कनकाद्रिकान्तिं, भक्त्या नमामि सततं नमिनाथदेवम् ॥३॥

## ( २२ )
## ॥ श्रीनेमिनाथ-चैत्यवन्दनम् ॥

निःशेषभव्यजनसंशयशङ्कुभेदं, शङ्खाङ्कितांह्रिकमलं जितकाममल्लम् ।
राजीमतीनयनबर्हिपयोदकल्पं, श्री**नेमि**माप्तमहितं शिवदं स्तवीमि ॥१॥
संशोषिताखिलकुवादिकलासमुद्रं, प्रोद्दामनूत्नजलदासितकान्तिशोभम् ।
श्रीयादुगोत्रगगनाम्बररत्नकल्पं, श्रीनेमिमाप्तमहितं शिवदं स्तवीमि ॥२॥
स्याद्वादमञ्जुलसमुद्रविकाशचन्द्रं, प्रक्षीणसर्वकलुषं विजिताक्षवृन्दम् ।
संसारदीप्रशिखितापविनाशनीरं, श्रीनेमिमाप्तमहितं शिवदं स्तवीमि ॥३॥

## ( २३ )
## ॥ श्रीपार्श्वनाथ-चैत्यवन्दनम् ॥

ख्यातातिशायिमहिमानमनन्तसौख्यं, धीरं शताब्दपरमायुषमिन्द्रपूज्यम् ।
भोगीन्द्रलक्ष्मकलितं नवहस्तकायं, **पार्श्वं** नमामि सततं शुकवर्णकायम् ॥१॥
सेहे श्रियेऽतिनिबिडान् कमठोपसर्गान्, छत्रत्रयं त्रिभुवनाधिपतित्वसूचम् ।
मौलौ बिभर्त्ति सततं जितसूर्यतेज-स्तं पार्श्वदेवमनिशं सुतरां नमामि ॥२॥
ब्राह्म्या निरुद्धसुरसूरिमहाप्रभावं, कोधादिमल्लजयिनं परमर्षिमुख्यम् ।
शान्तं प्रमादमदनज्वरशान्तिवैद्यं, पार्श्वं सदा प्रणिदधे नतपार्श्वयक्षम् ॥३॥

## ( २४ )
## ॥ श्रीवीरजिन-चैत्यवन्दनम् ॥

सिद्धार्थपार्थिवकुलाम्बरसप्तसप्तिं, स्याद्वादधर्मनिलयं त्रिजगत्प्रधानम् ।
सारङ्गराजललितक्रमपद्मयुग्मं, **वीरं** नमामि भववारिधियानपात्रम् ॥१॥
यस्याऽभिषेकसमये सुरराजचेतः-सन्देहशङ्कुशमनाय नगश्चकम्पे ।
वामांह्रितः सकलदूषणवर्जितस्तं, भक्त्या स्तुवेऽन्तिमजिनं सुकृतैकहेतुम् ॥२॥
**ने**ता महोदयपदं समसङ्घनेता, **मि**थ्यात्वबुद्धितिमिरावलिचण्डरश्मिः ।
**सू**त्रार्थदाननिपुणः कृतिवृन्दवन्द्यो-ऽ**रि**ष्टानि नो दलयतु प्रभुवीरनाथः ॥३॥

[सर्वेऽपि श्लोका वसन्ततिलकावृत्तनिबद्धाः]

## ॥ २. श्रीचतुर्विंशतिजिनचैत्यवन्दनानि - २ ॥

### ( १ )
### ॥ श्रीआदिजिन-चैत्यवन्दनम् ॥

सदा ज्योतीरूपं दलितयुगधर्मोरुतमसं, गतेच्छं देवेन्द्रैर्विहितवरिवस्यं शिवमयम् ।
मुदाऽऽद्यं देवेन्द्रं विततमहिमानं गुणनिधिं, नमामस्तं दीर्णाखिलकुमतियूथं ततकृपम् ॥१॥
स्वयम्बुद्धं सिद्धं स्वबलजितमोहक्षितिपतिं, त्रिलोकीजन्तूनामभिलषितचिन्तामणिसमम् ।
अपास्तैनःपुञ्जं विदितनिखिलाण्वर्थमभयं, स्तुवे श्री**नाभेयं** जगति कृतधर्मोन्नतिमजम् ॥२॥
अनन्तज्ञानाढ्यं प्रशमरससिन्धुं भयभिदं, बुधैर्ध्येयं नाकीश्वरमुकुटघृष्टाङ्घ्रिकमलम् ।
परैर्विश्वे यस्य प्रवचनमबाध्यं विजयते, स्तुमस्तं निर्व्याजं प्रथमजिनमापद्विरहितम् ॥३॥

### ( २ )
### ॥ श्रीअजितनाथ-चैत्यवन्दनम् ॥

शुभध्यानारूढं विहितजनहर्षं शिवगतं, निरीशं **तारङ्गाधिप**मतिशयर्द्धीशमतुलम् ।
मुदा देवाः सेन्द्रा यमभिनिनुवन्ति प्रतिदिनं, द्वितीयं तं देवं करिवरकलङ्कं प्रणिदधे ॥१॥
निरातङ्कं संसारजलनिधिनावं भुवनपं, गतन्यक्षोपाधिं शमयमनिशान्तं शुभकरम् ।
कृतार्थं पुण्यार्थं सुकृतफलदाराममभयं, द्वितीयं तं देवं करिवरकलङ्कं प्रणिदधे ॥२॥
अभूद् यत्कल्याणेषु नरकगतानामपि सुखं, पतिं साकेतस्य प्रणतविबुधेन्द्रावलिमहम् ।
विभुं विश्वाधीशं कनकसमकायं स्थिरतरं, द्वितीयं तं देवं करिवरकलङ्कं प्रणिदधे ॥३॥

### ( ३ )
### ॥ श्रीसम्भवनाथ-चैत्यवन्दनम् ॥

हतक्रूरक्रोधादिरिपुसमवायं सदधिपं, वराश्वाभिज्ञानं त्रिभुवनसरोजैकतरणिम् ।
कृपापारावारं त्रिदशमहिताङ्घ्र्यम्बुजयुगं, नुमस्तं भक्त्या **सम्भव**जिनवरं वीततमसम् ॥१॥

सुतः सेनाराज्ञ्याः कुगतिलतिकोन्मूलनकरी, जगन्मायामुक्तो भुवनसविता सातसवनः ।
स्तुतः श्रीनागेन्द्रैरतिविशदविज्ञानजलधि-र्जगद्बन्धुर्धीरो भुवि विजयतां सम्भवजिनः ॥२॥
नयानामम्भोधिः प्रविततयशा विश्ववलये, गताऽज्ञानावस्थोऽशुभशलभदग्धेन्दुवदनः ।
भवाम्भोधिं तीर्णो जगदसुमतां तारणपरः, प्रदद्यादिष्टं नोऽकविघटयिता सम्भवपतिः ॥३॥

## ( ४ )
## ॥ श्रीअभिनन्दनस्वामि-चैत्यवन्दनम् ॥

क्षमावासोऽधीशः कृतसमुपकारः सुकृतिनां, विदर्पः कन्दर्पद्विपमदविनाशैककुशलः ।
महीख्यातैश्वर्यो दितसकलकर्मा सुतपसा, जिनेन्द्रस्तुर्योऽसौ जगति जयति स्फारमहिमा ॥१॥
प्रदाताऽभीष्टानां भुवनजनपाता करुणया, परात्माऽकोपी **संवरनृपसुतो**ऽज्ञेयगतिकः ।
जयी षड्वर्गाणां प्लवगवरलक्ष्माङ्कितपद-श्चतुर्थो देवेन्द्रो दिशतु परमानन्दपदवीम् ॥२॥
गतापत्सन्दोहोऽक्षयपदनिवासो निखिलवि-ज्जितस्फाराक्षाश्वो निखिलवृजिनानामपहरः ।
महद्राज्यं त्यक्त्वा व्रतमुपययौ यो हितकरं, स जीयाल्लोकेऽसौ विपुलमतिमान् संवरसुतः ॥३॥

## ( ५ )
## ॥ श्रीसुमतिनाथ-चैत्यवन्दनम् ॥

जनानन्दाधात्रे विगतविततक्लेशततये, कषायाऽऽभीलघ्ने दशविधवृषाणामुपदिशे ।
भवागाधाऽऽबाधानिवहविरहानन्दसुयुजे, नमस्तस्मै भक्त्या **सुमति**जिननाथाय सततम् ॥१॥
यदीयं माहात्म्यं त्रिभुवनजनैर्गीतमतुलं, सदा देवैः सेव्यं मदनदमनोड्डीशसदृशम् ।
प्रभुं पुण्यात्मानं शिवसुखकरं सिद्धसमयं, स्फुरद्धामानं तं सुमतिजिनमानौमि नितराम् ॥२॥
कृपाब्धिं योगीन्द्रं सहृदयमलक्षालनजलं, निराधाराधारं गिरिवरसुधीरं शमनिधिम् ।
प्रशान्तं क्रौञ्चाङ्कं विहितरमणीत्यागमनिशं, स्तुवे भक्त्या मेघक्षितिपतितनूजं जिनपतिम् ॥३॥

## ( ६ )
## ॥ श्रीपद्मप्रभजिन-चैत्यवन्दनम् ॥

कृतान्तःशत्र्वन्तः प्रविहितभवान्तोऽशिवहरो, महौजा दुर्वादिप्रवचनकलापाटनपटुः ।
क्षताङ्कः पद्माङ्को विपुलभविकौको गतरति-र्ममाऽनिष्टं कष्टं धरनृपतिसूनुर्दलयतात् ॥१॥
गुणावासाघासोदयसमयहंसद्युतितनो !, व्यपास्ताशेषार्ते ! धरकुलविहायोऽम्बरमणे ! ।
ममाऽगाधाऽऽबाधां प्रविदलय **पद्मप्रभ**विभो !, सुसीमाङ्गोद्भूताऽसुरसुरनरेन्द्रैः स्तुतगुण ! ॥२॥
विसङ्कल्पं सार्धद्विशतनलिकोच्छ्रायवपुषं, स्तुतं विश्वैर्भक्त्याऽप्रतिहतवरज्ञानमनघम् ।
गवीशं सम्मेते कृतमनशनं येन शिवदं, नमामस्तं पद्मप्रभजिनमनीशं वयमिमम् ॥३॥

## ( ७ )
## ॥ श्रीसुपार्श्वजिन-चैत्यवन्दनम् ॥

भवस्फूर्जद्वह्निप्रशमनजलं नाकिमहितं, निरन्तं निर्व्याजं महिमभवनं वीतविकृतिम् ।
अकामं जात्याष्टापदनिभशरीरं सुखकरं, **सुपार्श्वं** देवेन्द्रं प्रणमत सुभव्या! हितकृते ॥१॥
विभिन्ना रागाद्या विकटरिपवो येन सहसा, यदीया संशोभा भुवनवलयौपम्यरहिता ।
यदीया श्रीवाणी स्मररिपुकृपाणी नवरसा, स सातं सर्वं नो वितरतु सुपार्श्वो विपुलधीः ॥२॥
विशाखानक्षत्रे प्रवरतुलराशावजनि यो, व्रतं वाराणस्यां सुखकरमुपादत्त विशदम् ।
सदानन्दी सङ्गी शिववररमायाः स भगवान्, सुपार्श्वः सन्दद्यादभिलषितमस्माकमखिलम् ॥३॥

## ( ८ )
## ॥ श्रीचन्द्रप्रभस्वामि-चैत्यवन्दनम् ॥

सनाथं सुश्रीभिः सकलविपदस्त्राणनिपुणं, स्तुतं लेखाधीशैर्जगति विदितं यत्प्रवचनम् ।
**मृगाङ्काङ्कं** कन्दं निखिलभविकानां भवभृतां, प्रकामं तं सूनुं भजत महसेनावनिपतेः ॥१॥
गृहं कल्याणानामनुपमसुखावाप्तिजननो, जनाः श्लाघन्ते यद्विधुसितयशो हृष्टमनसा ।
जपो नाम्नो यस्याऽखिलभवभयानामपहरो, विलीनाशेषैना भुवि विजयतामष्टमजिनः ॥२॥
विजेतारं बाह्यान्तरगतरिपूनुग्रतपसा, चरित्रं जन्तूनां समनुभवितारं त्रिसमयम् ।
सदा स्वस्थस्वान्तं निखिलमहनीयाग्रगमहं, प्रकामं तं भक्त्याऽष्टमजिनवरं नौमि सततम् ॥३॥

## ( ९ )
## ॥ श्रीसुविधिनाथ-चैत्यवन्दनम् ॥

महिम्ना प्रख्यातोऽखिलकुशलवल्लीसलिलदो, जितोत्तानानङ्गो वरमकरलक्ष्मा जिनवरः ।
सितच्छायो मह्यं गतनिखिलमायः सुचरितः, **सुविध्या**ख्यो देवो दिशतु परमानन्दलहरीम् ॥१॥
सदा तृप्तात्मानं प्रशमरसमास्वाद्य मनसा, क्षमावन्तं दान्तं भवविषयतृष्णाविरहितम् ।
पुनानं सज्जन्तूनहितनिवहध्वंसनिपुणं, सदा भक्त्या देवं भुवनशरणं नौमि नवमम् ॥२॥
प्रसू रामा यस्य त्रिदशनतपादस्य शमिन-श्चतुर्थं काकन्द्यामजनि पुरि कल्याणमनघम् ।
यदीयः सिद्धान्तः कुमतिभिरधृष्यः सुमहिमा, प्रणौम्यर्हन्तं तं सुविधिमनिशं शान्तिसदनम् ॥३॥

## ( १० )
## ॥ श्रीशीतलनाथ-चैत्यवन्दनम् ॥

यदाख्यासन्मन्त्रः प्रबलविषयव्यालदमनो, हतोऽपायो यस्य स्मरणशरणानां क्षितितले ।
अविच्छिन्ना लक्ष्मीः स्वयमुपगता यस्य सविधं, नमस्कुर्वेऽहं तं प्रमितिविषयं **शीतल**जिनम् ॥१॥
प्रवेकानेकान्तामृतरससमुद्रं शुभमतिं, विरागं सर्वज्ञं निखिलजगदावं नयगृहम् ।
मनोवाक्कायेनाऽखिलविषयिणां संविजयिनं, स्तुमः श्रीवत्साङ्कं दशमजिनमाह्लादजननम् ॥२॥

विभुं चार्वाचारं भुवनमनुजाम्भोजमिहिरं, सवित्री श्रीनन्दा दृढरथनृपो यस्य जनक: ।
धियामम्भोनाथो निहतनिखिलोपद्रवगणो, नितान्तं धीरं श्रीदशमजिननाथं प्रणिदधे ॥३॥

## ( ११ )
## ॥ श्रीश्रेयांसनाथ-चैत्यवन्दनम् ॥

कृपार्द्रान्तर्वृत्तिं निखिलभुवनप्राणिनिवहे, त्रिकालज्ञातारं त्रिभुवनविपत्पुञ्जहननम् ।
गुणैर्गाम्भीर्याद्यैर्विदितयशसं भूमिवलये, श्रये श्री**श्रेयांसं** शिवपदकृते शुद्धमनसा ॥१॥
प्रदानेऽभीष्टानां सुरतरुसमो लुप्तकलुष:, पटिष्ठ: सद्बुद्ध्याऽतुलगुणगरीयानममत: ।
शमी तीर्थाधीशो विततसमतामन्दिरमयं, जिनेन्द्र: श्रेयांसो भवतु शिवसौख्याय सततम् ॥२॥
भवाम्भोधौ यानप्रतिमचरणाम्भोजयुगल:, प्रतप्तस्वर्णाभो गतजनिजरामृत्युभयक: ।
जिनो दुर्वादीभप्रविदलनपञ्चास्यसदृश:, स दद्याच्छ्रेयांसोऽक्षयपदमनाबाधमनघम् ॥३॥

## ( १२ )
## ॥ श्रीवासुपूज्यस्वामि-चैत्यवन्दनम् ॥

महेन्द्रालीवन्द्यं प्रकटितसमग्रार्थनिवहं, शिवाधीनं धीनं विघटितसमस्तावरणकम् ।
हतावद्यं सद्योऽप्रमितगुणरत्नैकजलधिं, त्रिकालज्ञं देवं श्रयत **वसुपूज्याङ्गज**मरम् ॥१॥
नवीनांश्वाभासं परमपदसंप्रापणपटुं, समाधिं संप्राप्तं भवभुवननाथप्रवहणम् ।
विलीनार्त्तध्यानं कलिमलरजश्चण्डपवनं, विभुं चम्पाधीशं प्रणमत मुदा द्वादशजिनम् ॥२॥
अखण्डानन्दौकस्त्रिभुवनसुसत्त्वैकशरणं, प्रचण्डं पाखण्डं व्यपगतमरं यत्प्रवचनात् ।
कुकर्मागप्रोन्मूलनविकटदन्तावलसमं, श्रयामि श्रीदेवं नृपतिवसुपूज्योद्भवमहम् ॥३॥

## ( १३ )
## ॥ श्रीविमलनाथ-चैत्यवन्दनम् ॥

जगद्द्रष्टा नष्टाऽखिलविषयवाञ्छो मुनिपति:, प्रपन्नो निर्वाणं प्रविततकृपाणां जलपति: ।
प्रपञ्चेभ्यो मुक्तो विकृतिपरिहीणाम्बकयुग:, सुत: श्यामादेव्या भुवि **विमल**नाथो विजयताम् ॥१॥
मदोन्मत्तादृष्टोसमशमसुधाजीवनपति-र्निहन्ता विघ्नानां कुसमयमदक्ष्मारुहगज: ।
स्मरोन्मादोच्छेदी सकलभयभेद्यार्तिविकल:, कलानां गेहं नो भवतु भवनाशाय विमल: ॥२॥
अनिन्द्यं सावद्योपरतमनिमेषाधिपनतं, तमोध्वंसादित्यं समकितनिदानं भवभृताम् ।
श्रियोपेतं श्रेयस्तरुवनसमुल्लासजलदं, नतोऽस्मि प्रीत्याऽहं विमलजिनपस्यांऽह्रिकमलम् ॥३॥

## ( १४ )
## ॥ श्रीअनन्तनाथ-चैत्यवन्दनम् ॥

कृपाम्भोधिं स्वास्थ्यं समुपगतमक्षौघदमिनं, विजेतारं देवाधिपगुरुगिरां शुभ्रयशसम् ।
विटानां राद्धान्तक्षपणनिपुणं ज्ञानकलया, स्तुवे**ऽनन्तं** देवं प्रकृतिसुभगं छद्मरहितम् ॥१॥

पिपर्त्यग्र्या यस्य स्मृतिरभिमतानि श्रुतवता-मरौ मित्रे हेम्न्यश्मनि मृदि मणौ सन्निभमतिः ।
कृशानुव्यालाम्भोद्विरदमृगराजाद्यतिभयं, समूलं यात्यन्तं स्मरणवशतो यस्य भविनाम् ॥२॥
त्रिलोक्याकीर्णाख्यः प्रविदलितमोहान्धतमसः, स्फुरद्व्याधामाङ्काङ्कित*चरणपाथोजयुगलः ।
निरिच्छः सद्वीर्यो भुवनमहितः सङ्गरहितः, स्थिरः सोऽनन्तो मामखिलजिनमुख्योऽवतु भवात् ॥३॥
युग्मम् ॥

## ( १५ )
## ॥ श्रीधर्मनाथ-चैत्यवन्दनम् ॥

स्पृहातीतं मेघध्वनिनिभगिरं कर्मरहितं, नितान्तं भक्तानां जनितशिवशर्माणममदम् ।
सहस्राक्षध्येयं भुवननिधिगम्भीरमनकं, जिनं **धर्मं** वन्दे तममितगुणाम्भोधिमनिशम् ॥१॥
विदीर्णव्यामोहः कलुषतिमिरध्वंसतरणि-र्महाऽज्ञानाब्ध्यालोडनसुरमहीध्रोऽशनिपदः ।
हतद्वन्द्वस्तोमो विभवभवनं योगमहितः, स जीयाद्धर्मेशस्त्रिभुवनतले व्याप्तमहिमा ॥२॥
प्रसिद्धं सद्वाचा विकचजलजास्यं जिनवृषं, वचो यस्याऽबाध्यं कुसमयसुरोन्मादिभिरपि ।
प्रबुद्धं पापानामविषयमकष्टप्रणयिनं, नुमस्तं श्रीधर्मं त्रिदशकृतसेवं वृषपतिम् ॥३॥

## ( १६ )
## ॥ श्रीशान्तिनाथ-चैत्यवन्दनम् ॥

प्रदायाऽऽब्दं दानं जगदसुमतां दैन्यदमनं, प्रपेदे प्रव्रज्यां परमपदवीप्रापणपराम् ।
कपोतं योऽरक्षत् प्रथमजनुषि स्वीयपलतो, विभूत्यै भूयाद् वः सुगुणसदनं षोडशजिनः ॥१॥
चतुर्धासद्धर्मप्रकटनपराऽपापपटुतं, जगन्मिथ्याज्ञानान्धतमससहस्रांशुसदृशम् ।
व्यपास्ताशेषाऽऽपत्कटकमचिरानन्दनमहं, स्तवीमि श्री**शान्तिं** त्रिभुवनजनीनोक्तिनिवहम् ॥२॥
निशान्तं शान्तीनां प्रशमितसमस्ताशिवततिं, यदीयं हस्ताब्जं भयजननशस्त्रैर्विरहितम् ।
वधूसङ्गोन्मुक्तं विकृतिरहिते यस्य नयने, नितान्तं तं भव्याः श्रयत शमिनं षोडशजिनम् ॥३॥

## ( १७ )
## ॥ श्रीकुन्थुनाथ-चैत्यवन्दनम् ॥

यदीयामास्वाद्य प्रविततगवीं वीतकलुषां, महामोहस्वापप्रविघटनकल्यक्षणनिभाम् ।
स्पृहा न प्राज्ञानां प्रसरति सुधायां कथमपि, प्रभुः स श्री**कुन्थु**र्निखिलमभिकुन्थ्यादघवनम् ॥१॥
प्रशान्तद्वेषाग्निः शमदमतितिक्षादिसुगुणैः, प्रतप्तस्वर्णाभो नतगरुडयक्षोंऽह्रिकमले ।
नमच्चक्रश्रेणीमुकुटमणिरत्नद्युतिजयी, स पायाच्छ्रीकुन्थुः सकलभुवनं भद्रभवनम् ॥२॥
अनायासापास्तस्मरकरिमदोऽतुल्यमहिमा, भवोद्यानक्रीडाव्युपरमविधानैककुशलः ।
मनोवाक्कायैर्वै विविधजनुषा यान्यचिनुम, प्रभुः कुन्थुः पापान्यपहरतु तान्येककृपया ॥३॥

---
* स्फुरच्छ्येनाभिज्ञाङ्कित० इति स्यात् ।

## ( १८ )
## ॥ श्रीअरनाथ-चैत्यवन्दनम् ॥

पटीयांसं श्रोतोबलजयविधानेऽसमगुणं, नतामर्त्याधीशं विशदयशसं शूकजलधिम् ।
गतक्लेशोद्रेकं गजपुरपतिं निर्वृतिगतं, मुदाऽ**रं** देवेन्द्रं नमत जितमारं प्रतिदिनम् ॥१॥
न कामः कालुष्यं कलयति भवत्पादसुजुषां, प्रबन्धाः पापानां झटिति विलयं यान्ति भविनाम् ।
त्वदाख्याजापानामरजिनपते! मोहविजयिन्!, कदाचिन्नो बाधोद्भवति भवजन्या मतिमताम् ॥२॥
त्वदासेवाऽराऽर्हन्! विघटयति विघ्नान् भवभृतां, विधत्ते सम्पत्तिं जनयति समन्ताच्छिवसुखम् ।
भवासन्तापाग्निं प्रशमयति शीघ्रं जलमिव, विभिन्ते दौर्भाग्यं कलयति च सौभाग्यमतुलम् ॥३॥

## ( १९ )
## ॥ श्रीमल्लिनाथ-चैत्यवन्दनम् ॥

नयानां स्रष्टारं त्रिभुवनजनद्वन्द्वदमिनं, शमौको नीरागं क्षपितनिखिलोन्मत्तकुमतिम् ।
प्रभावत्याः पुत्रं सकलबुधसंसेवितपदं, नमामो **मल्लीशं** शुकसदृशवर्णं वितमसम् ॥१॥
जनुर्दीक्षाज्ञानान्यजनिषत यस्योत्तमदिने, तिथावेकादश्यां मृगशिरसि मासे सितदले ।
कृतार्थः कन्दर्पज्वरशमनवैद्योऽनघमनाः, स पायाद् वो मल्लिः कृतनिखिलकर्मव्यपहृतिः ॥२॥
लसद्विद्यासिन्धो! सदतिशयकल्लोलजलधे!, स्फुरद्वाचोयुक्त्या भुवनजनसम्बोधनिपुण! ।
प्रभो! बाल्याद्ब्रह्मव्रतचरणदक्षाऽवनिपते!, भवात् क्रूरान्मल्लेऽप्रमितकलहात् पाहि लघु माम् ॥३॥

## ( २० )
## ॥ श्रीमुनिसुव्रतस्वामि-चैत्यवन्दनम् ॥

दधानं धीराणामतिमहितकं विंशतिधनुः-समुच्छ्रायं देहं शुभसकललोकोत्तरकलम् ।
सहस्रं यस्याऽऽयुस्त्रिगुणितदशानां च शरदां, श्रये तं **सौमित्रिं** निबिडकुमतिध्वान्ततपनम् ॥१॥
नवीनाम्भोवाहप्रतिमतनुमानम्रविबुध-स्फुरन्मौलिप्रेङ्खन्मणिगणविभोद्द्योतजननम् ।
वृता पूता येनाऽनुपमशमकैवल्यकमला, स्तुमस्तं सौमित्रेयममदनमादित्यमहसम् ॥२॥
समाप ज्येष्ठे योऽसितदलनवम्यां शिवपदं, विटानां पन्थानं व्रजति नहि दृष्टेः क्वचिदपि ।
वसन्मुक्तिस्थाने भविजनहृदि ध्यानविषय-स्त्रिकालं तं भव्याः स्मृतिपथमुपाधत्त सुमुनिम् ॥३॥

## ( २१ )
## ॥ श्रीनमिनाथ-चैत्यवन्दनम् ॥

यदीयं पादाब्जं स्मृतिपथमवाप्तं सुभविनां, तमोध्वान्तं हार्दं हरति तनुते सातमखिलम् ।
अवत् प्रत्यूहेभ्यो विशदयति सम्मोदपटलीं, समस्तान् सज्जन्तून् स **नमि**रवतात् संसृतिभयात् ॥१॥
निजौजोभिर्भानोः जितसकलशोभं क्षितितले, बुधैः सूक्ताम्भोजैर्विहितचरणाब्जार्चनमजम् ।
विभुं नीलाब्जाङ्कं कपटपटसम्पाटनपटुं, नमिं देवं नित्यं भजत भविनो निर्वृतिकरम् ॥२॥

महारागाद्यारातिनिकरकुलच्छेदचतुरं, विशालाम्भोजाक्षं विजितनिखिलाक्षं क्षतरुजम् ।
रमाजानाधीनं विविधभवनृत्तक्षपणकं, स्तुवे भावेनाऽहं नमिजिनपतिं पापरहितम् ॥३॥

## ( २२ )
## ॥ श्रीनेमिनाथ-चैत्यवन्दनम् ॥

समुद्रक्ष्मापाङ्गोद्भवमचलधीरं जिनवरं, रमेशाहङ्काराम्बुधिमथनमन्थावनिधरम् ।
सहस्राब्दायुष्कं यदुकुलसरोजाम्बरमणिं, स्तुमः श्रीशैवेयं सुरनरमयूराम्बुदसमम् ॥१॥
चलं राज्यं त्यक्त्वा क्षणसुखकरं रैवतगिरिं, सलीलं गत्वा यो व्रतमपमलं शुद्धमनसा ।
प्रणम्य श्रीसिद्धान् भवजलसमुत्तारणतरिं, प्रपेदे तं **नेमिं** त्रिभुवनप्रदीपं प्रणिदधे ॥२॥
भवोद्वेगं शीघ्रं विदलयति यद्दर्शनवशाद्*, वसन्ति स्वर्गादीनि सुखनिकुरम्बाणि निकटम् ।
यदर्चाया वेगात् कुगतिततयो यान्त्यनिकटं, प्रपद्ये श्रीनेमिं तमभयदमाखण्डलनतम् ॥३॥

## ( २३ )
## ॥ श्रीगोडीपार्श्वनाथ-चैत्यवन्दनम् ॥

समुद्रं शूकार्द्रं शुभनयसमुद्रं सुमतिदं, नतेन्द्रं निस्तन्द्रं स्मरदमनरुद्रं च्युतमदम् ।
कलावन्तं क्विन्द्रं कृतनिखिलभद्रं फणिपदं, स्तुमस्तं गोडीन्द्रं सकलजिनचन्द्रं प्रतिपदम् ॥१॥
विलासं कुर्वाणं शिववनितया सार्द्धमतुलं, विपत्तिं भिन्दन्तं सकलभुवनानामविकलाम् ।
महामिथ्यादृष्ट्युत्फणविषसमुत्तारणमणिं, विराजन्तं **गोडी**पुरि भजत **पार्श्वं** प्रतिकलम् ॥२॥
यथेष्टं सङ्क्लिष्टं विदधति कनिष्ठेऽपि कमठे, यदीयं दृग्द्वन्द्वं कथमपि गतं नो विकृतिताम् ।
तथा कान्ताकान्ताभिनववचनाक्षुब्धमनसं, श्रये गोडीपार्श्वं प्रणतसुरराजिं तमनिशम् ॥३॥

## ( २४ )
## ॥ श्रीवीरजिन-चैत्यवन्दनम् ॥

फणीन्द्रे देवेन्द्रे क्रमकमलयुग्मस्पृशि मनो-ऽविशेषं कुर्वाणं मृगपतिलसत्पादयुगलम् ।
प्रमादं छिन्दन्तं सकलकमलापेटकनिधिं, तमाप्तं श्रीवीरं स्मरगजशृणिं नौम्यभयदम् ॥१॥
उपास्य श्रीतीर्थं शिवमभिययुर्यस्य भविनः, शिवाकाङ्क्षाभाजामपि यदभिपूज्यं दिविषदाम् ।
कराले कालेऽपि प्रवचनमिदं यस्य जयति, स जीयाद् देवार्यो जगति विजयी मोहनृपतेः ॥२॥
विशीर्णान्तःशत्रुं कुमतिमृगसन्त्रासनहरिं, कृपौकः सिद्धार्थान्वयवरवनेशामृतकरम् ।
भवे भूयो भ्रष्टं समवतरणं यस्य शिवतः, **प्रताप**प्रौढश्रीसदनमभिनौम्यन्तिमजिनम् ॥३॥

[सर्वेऽपि श्लोकाः शिखरिणीवृत्तनिबद्धाः ।]

---

* 'यद्दर्शनमल'मिति स्यात् ।

# ॥ ३. विविधच्छन्दोभिर्ग्रथिता श्रीजिनचतुर्विंशिका ॥

## ( १ )
## ॥ शार्दूलविक्रीडितवृत्तेन श्रीआदिजिनस्तुतिः ॥

श्रीमन्मन्दरशैलधीरमहितस्तोमप्रणाशं सतां, विश्वाऽज्ञानतमोविनाशतरणिं सद्ध्यानलीनं सदा ।
नम्रामर्त्यशिरःकिरीटमणिभिर्नीराजितांह्रिद्वयं, तं वन्देऽखिलसौख्यकारकमहं श्रीमद्**युगादीश्वरम्** ॥१॥
सत्त्वानां परमापदो विघटनं भावारिवारोज्झितं, सर्वार्थप्रतिबोधनैकतरणिं श्रीनाभिभूपाङ्गजम् ।
येनाऽऽत्मीयपराक्रमेण विजितः प्रोद्दामकृष्णाङ्गजो, निर्वाणं समवाप योऽभिजिति तं वन्दे गुणानां गृहम् ॥२॥
सद्भक्त्याऽनिमिषाधिपैः कृतनतिर्दीप्यद्धिरण्याकृतिः, पापाटोपकठोरकष्टदलनः सज्ज्ञानवारान्निधिः ।
चञ्चद्दुष्टहृषीकवाजिदमकः कारुण्यरत्नाकरो, नाभेयो भगवान् सनेष्टवरदो भूयाद् विभूत्यै मम ॥३॥
संसाराब्धितरीः प्रमोदजलधिः सद्धर्मबोधप्रदो, रागद्वेषविवर्जितो जिनपतिः प्रौढप्रभावाकरः ।
पुण्याब्धी रमणीप्रसङ्गरहितो वाचांपतिः पापभिद्, भव्येष्टार्थविधानकल्पविटपी जीयाद् युगादीश्वरः ॥४॥
**ने**ङ्गन्ते विषयेषु खानि नितरां कैर्लोभ्यमानान्यपि, **मि**त्रोद्दाममहा महारिगणहा कल्याणकेलीगृहम् ।
**सू**क्तिं यस्य निपीय कर्णपुटकैर्भव्या व्रतान्याददू, **रि**क्तात्मा वृजिनैः **प्रताप**भवनं पायात् स नो विश्ववित् ॥५॥

## ( २ )
## ॥ अनुष्टुब्वृत्तेन श्रीअजितनाथस्तुतिः ॥

ॐनमो**ऽजित**नाथाय, विघ्नसन्दोहनाशिने ।
अर्हते वागधीशाय, विश्वविश्वार्थवेदिने ॥१॥
[आनन्दाब्धिनिमग्नाय, परमानन्ददायिने ।]
सत्प्रतापनिधानाय, जगज्जन्तूपकारिणे ॥२॥
वन्देऽजितं सदाऽमायं, सुमनोवृन्दवन्दितम् ।
जगदम्भोजमार्त्तण्डं, गम्भीरागमभाषिणम् ॥३॥
जितकामोऽजितस्वामी, जरामृत्युविवर्जितः ।
पायात् सना स सत्त्वौघान्, तेजोधाम जितेन्द्रियः ॥४॥
**ने**मुर्यं स्वर्गिणो नित्यं, **मि**षानाहतमानसम् ।
**सू**क्तिं **प्रताप**संस्त्यायं, **रि**पुव्रातविभेदिनम् ॥५॥ द्वाभ्यां युगलम् ॥

## ( ३ )
## ॥ वसन्ततिलकावृत्तेन श्रीसम्भवनाथस्तुतिः ॥

उद्योतकस्त्रिजगतां स्तवनीयतीर्थो, देवेन्द्रपङ्क्तिपरिषेवितपादपद्मः ।
विश्वत्रयाखिलपदार्थविकाशभानुः, श्री**सम्भवो**ऽवतु सतो जिनभक्तिभाजः ॥१॥
तप्तार्जुनद्युतिसधर्ममनोज्ञकान्तिः, संसारभिद् दलितमोहमहान्धकारः ।
सद्ध्यानरूढहृदयो नयनीरनाथो, देयाच्छिवं स जगतां महनीयकीर्तिः ॥२॥
निक्षेपशुद्धनयभङ्गपवित्रवाचा, बौद्धादिशासनपराभवने समर्थः ।
श्रीसम्भवो निखिललोकविबोधदक्षो, दूरीकरोतु दुरितानि भवार्जितानि ॥३॥
उत्सारिताखिलतमो ! हि तृतीयदेव !, त्वत्तोऽपरं हरिहरादिसुरं सरागम् ।
सास्त्रं बिभत्सचरितं वनितानिमग्नं, स्वप्नेऽपि नैव हृदये परिभावयामि ॥४॥
**ने**त्रप्रमोदजननं जितशत्रुपुत्रं, **मि**थ्यात्वकर्दमविशोधनवारितुल्यम् ।
**सू**क्तिच्छटोद्दलितदृप्तकुवादिवृन्दं, **रिष्टप्रताप**सदनं सुतरां स्तवीमि ॥५॥

## ( ४ )
## ॥ शार्दूलविक्रीडितवृत्तेन श्रीअभिनन्दनजिनस्तुतिः ॥

भव्यानां शिवमार्गमग्नमनसामज्ञानविध्वंसकः, शीघ्रं निर्जितमत्तमोहनृपतिर्देवेन्द्रकोटिश्रितः ।
स्याद्वादामृततोषिताखिलजगत् कैवल्यलीलाश्रितो, दुष्टाष्टादशदोषदिग्धिरहितो भव्यात्मनां सौख्यदः ॥१॥
स्फूर्जज्ज्ञानकलानिधिः क्षतमदो निश्शान्तकामानलो, लोकानामुपरिस्थितिर्जिनपतिः पूर्णेन्दुबिम्बाननः ।
सत्कीशाङ्कलसत्पदाब्जयुगलः पाखण्डविध्वंसकः, शश्वच्छ्री**अभिनन्दनो** जिनवरो लोकत्रयाह्लादकः ॥२॥
कल्याणावलिमातनोतु भविनां निर्दग्धकर्माङ्कुरः, पापानां हननः समृद्धिजननो मन्मानसाब्जस्थितः ।
सच्छ्रेयस्तरुवर्द्धनामृतधरो नष्टान्तरारिव्रजो, ज्ञाताशेषपदार्थतत्त्वनिवहो भव्यात्मभिस्सेवितः ॥३॥ त्रिभिर्विशेषकम् ॥
कृत्याकृत्यविवेकवित् सकरुणोऽलोलां समाधिं गतो, यत्कान्तिः कनकाभिमानदमनी संसारपारङ्गमः ।
ज्ञानाच्छादककर्ममेघनिकरोत्सारप्रचण्डानिल-स्त्रैलोक्यार्तिहरोऽभिनन्दनजिनः पायात् स भव्यात्मनः ॥४॥
**ने**ता मोहमहान्धकारदलने तार्क्ष्याग्रजन्मोपमो, **मि**थ्यादृष्टिजनप्रसङ्गरहितोऽव्यामोहितो मायया ।
**सू**नुस्संवरभूपतेस्त्रिभुवने जीयाज्जिनानां पती, **रि**ष्ट्युच्छेदिपदप्रदोऽघदलनोऽलङ्घ्य**प्रतापः** क्षितौ ॥५॥

## ( ५ )
## ॥ वसन्ततिलकावृत्तेन श्रीसुमतिनाथस्तुतिः ॥

प्रध्वंसितान्धतमसं स्फटिकाश्मकान्तिं, कन्दर्प्पदर्प्पजयिनं रहितं कलङ्कैः ।
शिक्षाप्रदं समभिनन्दितसर्वलोकं, मेघाङ्गजं भजत दोषविवर्जिताङ्गम् ॥१॥
दुष्टाष्टकर्मतरुभञ्जनपुण्डरीकं, शर्मप्रदं विहितभव्यविपद्विरामम् ।
संसारभीतशरणं जनितोपकारं, ज्ञानार्णवं क्षपितमोहतमोवितानम् ॥२॥

ज्ञानस्वरूपमसपत्नममेयरूपं, संप्लुष्टविघ्नशलभं च्यवनादिशून्यम् ।
सन्नैगमादिनययुक्तगभीरवाचं, श्रीमेघराजतनयं **सुमतिं** नमामः ॥३॥ युग्मम् ॥

संसारदीप्तदमुनःशमनाम्बुतुल्यो, यः संस्तुतः सुरगणैर्महिमानिधानः ।
मुक्तावलीव विशदं चरितं यदीयं, भूयाच्छ्रिये स सततं सुमतिर्जिनेशः ॥४॥

**ने**त्रद्वयं मम विभो ! तव दर्शनेन, **मि**थ्यात्त्वभिद् ! हरिहरादिषु मेघसूनो ! ।
**सू**क्त्या जितामरगुरो ! किल नैति तोषं, **रि**क्तेषु शुद्धचरितैः प्रचुर**प्रताप** ! ॥५॥

## ( ६ )
## ॥ वसन्ततिलकावृत्तेन श्रीपद्मप्रभस्वामिस्तुतिः ॥

मुक्तिप्रदं त्रिदशवन्दितपादपद्मं, दुष्पापरेणुहरणे पवनप्रकारम् ।
**पद्मप्रभं** विशदशारदराजतुण्डं, रत्नत्रयेण कलितं प्रणमामि नित्यम् ॥१॥

गात्रे च यस्य किल पापलवः प्रवेष्टुं, छिद्रं मनाग् न लभते नितरां पवित्रे ।
चित्तं विकर्तुमलमास न मीनकेतुः, पद्मप्रभः स जयताद्धतसर्वकामः ॥२॥

संसारसन्ततिसमर्जितपापनाशं, सङ्कल्पशून्यहृदयं करुणावतारम् ।
सम्मोहवारणविदारणसारसिंहं, पद्मप्रभं जिनवृषं विभयं श्रयामि ॥३॥

तारस्वरं दरहरं धरवंशहारं, रागादिभावरिपुसंहतिसम्प्रहारम् ।
सम्यङ् गतं श्रुतवतां भजनीयभावं, पद्मप्रभं प्रणिदधे भवसिन्धुनावम् ॥४॥

**ने**पोद्भवाङ्कितपदं सकृपं प्रणौमि, **मि**त्रव्रजे रिपुगणे समचिद् दधानम् ।
**सू**देतरामृतनिधिं जिनपद्मदेवं, **रि**ष्टावलिप्रणयिनं महित**प्रताप**म् ॥५॥

## ( ७ )
## ॥ शार्दूलविक्रीडितवृत्तेन श्रीसुपार्श्वजिनस्तुतिः ॥

सत्स्थामा महिमाम्बुधिर्न वशिमा कस्याऽपि लोकत्रये, क्रोधाद्युग्रचतुष्कषायरहितः श्लाघ्यावतारः क्षितौ ।
कान्तस्वस्तिकलाञ्छनोपकलितो ज्योतिर्मयोऽव्याजकः, सेन्द्रस्वर्गिकदम्बकार्चितपदो जीयात् सुपार्श्वप्रभुः ॥१॥

यन्नामस्मरणेन पावकपयःस्तेनक्षितीन्द्रद्विषद्-व्यालव्याघ्रजनुर्जरामरणरुक्छोकादिभीस्तम्भनम् ।
दुर्जेयाष्टककर्ममत्तकरिणां विध्वंसपञ्चाननः, पुण्यौघैर्गरिमा प्रमाणवचनः स स्तात् सुपार्श्वः श्रिये ॥२॥

संसारार्त्तिहरं विकाररहितं क्षेमङ्करं प्राणिना-मक्षोभ्यं परवादिभिः प्रवचनं यस्योज्ज्वलं कामदम् ।
सत्कीर्त्या परिपूरितत्रिभुवनं शक्रैः कृताराधनं, यो नृणां वितनोति वाञ्छितफलं तं श्रीसुपार्श्वं श्रये ॥३॥

नित्यानित्यपदार्थसार्थविलसत्प्रज्ञो गुणानां निधिः, संसाराम्बुनिधौ परप्रवहणो योगीन्द्रवन्द्यो विभुः ।
प्रज्ञापारमितो विलुप्तममतः सौभाग्यलक्ष्मीगृहं, निष्पापो भगवान् शिवं स भविनां दद्यात् सुपार्श्वो जिनः ॥४॥

**ने**त्रानन्दनचन्द्रमो ! भवनदान्मां तारयस्व द्रुतं, **मि**थ्याज्ञानविनाशनैककुशल ! क्षीणाष्टकर्मन् ! विभो ! ।
**सू**रिस्तोमपयोजबोधनरवेऽनीते ! सुपार्श्वप्रभो !, **रि**ष्टक्षान्तियशः**प्रताप**वसते ! पूज्यांह्रिपद्माऽनिशम् ॥५॥

## ( ८ )

## ॥ वसन्ततिलकावृत्तेन श्रीचन्द्रप्रभस्वामिस्तुतिः ॥

**चन्द्रप्रभं** विगतजन्मजराविपत्तिं, चन्द्रप्रभं सकलसत्त्वविबोधदक्षम् ।
चन्द्राङ्कभूषितपदं सुतरां नमामः, स्वात्माद्भुतामलगुणाङ्कुरपोषणाय ॥१॥
दुःशल्यपङ्कपरिशोषणवासरेशं, दुष्कर्मभूमितलदारणसारसीरम् ।
संरुद्धपञ्चशरदर्पममानमायं, चन्द्रप्रभं प्रतिदिनं परिभावयामि ॥२॥
कर्पूरधूलिधवलद्युतिराजमान!, क्रोधादिशात्रवसमूहसमूलनाशिन्! ।
चन्द्रप्रभाऽभयद! शान्तसुधारसाब्धे!, संस्तौमि ते जिन! पदोत्तमपद्मयुग्मम् ॥३॥
यत्तीर्थसुन्दरपयोभरमज्जनेन, वज्रावलिप्तदुरितानि भवन्ति दूरम् ।
ज्योतिर्दशामुपगतो गतबन्धमोक्ष-श्चन्द्रप्रभो भवभिदे भविनां स भूयात् ॥४॥
**ने**पेशजातशुचिमौक्तिकहारकायं, **मि**थ्यातमोनिहतकं शुभकृत**प्रतापम्** ।
**सू**रावलीमहितमष्टमचन्द्रनाथं, **रि**ष्टालयं तममलं प्रणमामि भक्त्या ॥५॥

## ( ९ )

## ॥ वसन्ततिलकावृत्तेन श्रीसुविधिजिनस्तुतिः ॥

यद्गीर्व्ययं मतिमतां तमसां विधत्ते, यस्याऽऽगमः सदनुयोगमणीन् बिभर्त्ति ।
तृष्णाविवर्जितमतिं मतिदं दयाब्धिं, तं देवदेव**सुविधिं** सुतरां नमामः ॥१॥
सर्वत्र सान्द्रयशसं घनकर्ममुक्तं, सत्त्वेषु कारणमृते करुणां दधानम् ।
वाचंयमेन्द्रमनघं विषयेष्वलीनं, वन्दामहे सुविधिनाथमजं जिनेन्द्रम् ॥२॥
गीर्यस्य निश्चयनयव्यवहारयुक्ता, ज्ञानं प्रभोस्त्रिभुवनैकललामभूतम् ।
दानादिविघ्नरहितोऽपि मुधा जिनेश!, त्वं किं परागमयसे मम मोक्षदाने ॥३॥
अम्लानकेवलकलाविदिताखिलार्थो, लोकत्रयार्च्यचरणाम्बुजपुण्यरेणुः ।
गीर्वाणपङ्क्तिपरिपूजितपादपीठो, वाचांपतिः स सुविधिर्वितनोतु सौख्यम् ॥४॥
**ने**त्राब्जतोषितमनुष्यमिलिन्दवृन्दं, **मि**त्रायमाणमनिशं त्रिजगज्जनेषु ।
**सूर्यप्रताप**ममदं सुविधिं विधित्सु-**रि**ष्टार्थमत्र भज भव्यजन! त्रिसन्ध्यम् ॥५॥

## ( १० )

## ॥ शालिनीवृत्तेन श्रीशीतलनाथस्तुतिः ॥

यस्मिन् नाऽस्त्येनःप्रवेशावकाशो, मुक्तिद्वारं विश्वविश्वोपजीव्यम् ।
श्रीवत्साङ्कं सर्ववात्सल्यभाजं, संस्तौमि श्री**शीतलं** तं त्रिकालम् ॥१॥
सिद्धात्मानं क्षीणतन्द्रं नतेन्द्रं, निर्व्यामोहं निर्भयं निष्कलङ्कम् ।
तत्सङ्ख्याशैर्ज्ञायमानस्वरूपं, देवं वन्दे शीतलं भावतोऽहम् ॥२॥
लोकालोकाशेषसूक्ष्मार्थसार्थ-सत्ताऽसत्ताबोधदाने समर्थ! ।
क्षीणज्ञानाच्छादनाद्यष्टकर्मन्!, नाऽन्यः पूज्यस्त्वां विना कोऽपि देव! ॥३॥

वाचोयुक्त्याऽशेषविश्वप्रबोधं, ज्ञानं यस्याऽनन्तवस्तुप्रकाशम् ।
क्षीणाज्ञानं सर्वसम्पन्निवासं, पूज्यं भक्त्याऽनन्तधैर्यं नुमस्तम् ॥४॥
**ने**ता श्रेयोमार्गमाप्तप्रशस्यो, **मि**थ्याचारै: शून्यचेता: स जीयात् ।
**सू**नुर्नन्दामातुराप्तप्रवेको-ऽ**रि**ष्टध्वंस: सीमशून्य**प्रताप:** ॥५॥

## ( ११ )
## ॥ शालिनीवृत्तेन श्रीश्रेयांसनाथस्तुति: ॥

आपत्कोटिध्वंसिनं श्रीजिनेन्द्रं, संसाराब्धेस्तारकं निष्प्रपञ्चम् ।
दोषोन्मुक्तं विश्वविख्यातकीर्त्तिं, श्री**श्रेयांसं** निर्विकल्पं स्तवीमि ॥१॥
अम्भोजास्यं विघ्नवल्लीविनाशं, दीप्राखण्डज्ञानलक्ष्मीनिधानम् ।
क्षीणाकाङ्क्षं निर्मलं तीर्थनाथं, श्रेयस्स्थानं निर्मदं ब्रह्मवासम् ॥२॥
श्रीस्याद्वादाद् यस्य तीर्थे समस्ता-ऽर्थानां नित्यं जायते सत्यवत्ता ।
यस्य ज्ञानं मत्तदुर्वाद्यधृष्यं, श्रीश्रेयांसं बोधिदं तं नमामि ॥३॥
अव्याबाध: सौख्यदो ज्योतिरात्मा, कल्याणानां कोटिदो भव्यशास्ता ।
वीतद्वेष: कामद: कामजेता, श्रीश्रेयांसो यच्छताद् वाञ्छितं मे ॥४॥
**ने**मुर्भक्त्या यं सुरा: प्रास्तपापं, **मि**त्रे शत्रौ काञ्चने वा दलौ वा ।
**सू**ने दर्भे तुल्यदृष्टिं स्तुवे तं, **रि**क्तं मिथ्यामेधया सत्**प्रतापम्** ॥५॥

## ( १२ )
## ॥ मन्दाक्रान्तावृत्तेन श्रीवासुपूज्यजिनस्तुति: ॥

कल्याणानां कृपणमनसो दुर्लभानां निधानो, मोक्षेच्छूनां स्पृहितफलदो योग्यगम्यस्वरूप: ।
बाढं दूरस्थितिकृदपि यो भक्तिभाजामदूरो, रिष्टं दद्यादमरमहितो **वासुपूज्यो** जिनेन्द्र: ॥१॥
उद्यन्मित्रारुणिमसुषमाशोभमान: समन्तात्, पञ्चत्रिंशद्वचनसुगुणै राजमानो रसायाम् ।
भ्राम्यन्मन्थोदधिधुमधुमध्वानगम्भीरघोषो, रिष्टं दद्यादमरमहितो वासुपूज्यो जिनेन्द्र: ॥२॥
यस्य ब्राह्मी सुविलसति कौ योजनान्तप्रचारा, चण्डा देवी चरणकमलं यस्य नित्यं सिषेवे ।
येनोद्दामो विरतिकलया निर्जितो मीनकेतू, रिष्टं दद्यादमरमहितो वासुपूज्यो जिनेन्द्र: ॥३॥
वैराग्येण क्षणसुखकरं बाढसन्तापहेतु:, श्रेयोरोधं प्रकृतिचपलं यो हि राज्यं विहाय ।
भेजे दीक्षां भवजलतरीं सर्वसम्पत्तिमूलां, रिष्टं दद्यादमरमहितो वासुपूज्यो जिनेन्द्र: ॥४॥
**ने**मुर्भक्त्या यममरवरा ज्ञानसम्यक्त्वशुद्ध्यै, **मि**थ्यादृष्टीन् हितकरगिरा बोधयामास योऽरम् ।
**सू**क्त्यावल्या त्रिदशगुरुणा गीतसत्कीर्तिकूटो, **रि**ष्टं दद्यादमरमहितो वासुपूज्यो जिनेन्द्र: ॥५॥

## ( १३ )
## ॥ स्रग्धरावृत्तेन श्रीविमलजिनस्तुति: ॥

प्राप्याऽखण्डां यदीयां प्रवचनतरणिं वादिवातादबाध्यां, दुस्तारापारसंसारजलधितरणे नैव शङ्काप्रसङ्ग: ।
रागद्वेषादिदोषोज्झितमशुभभिदं सर्वदेवाधिदेवं, तं श्रीयोगीशवन्द्यं **विमल**जिनवरं संश्रये भावतोऽहम् ॥१॥

नम्रीभूतेन्द्रपङ्क्तिस्त्रिभुवनवलये यस्य वाणी प्रमाणं, कान्तानां हावभावैर्मुनिधृतिहरणैर्लोभितो नैव लुब्धः ।
निष्पङ्काम्भोरुहास्यं शमसलिलनिधिं शुद्धसम्बोधिहेतुं, तं श्रीश्यामाङ्गजातं जितसकलभयं नौमि नित्यं कृतार्थम् ॥२॥
यस्मिन् देशेऽमरार्च्यो विहरति भगवांस्तत्र दुर्भिक्षहानिः, सिंहव्याघ्रादिसत्त्वा गतजनिरिपुता मित्रभावं प्रयान्ति ।
चित्तेनैकेन यस्य श्रवणपुटयुगैर्देशनां स्वादयन्ति, श्यामादेव्याः स पुत्रोऽस्खलितनयवचाः श्रेयसे नोऽस्तु नित्यम् ॥३॥
सिद्धं बुद्धं जिनेन्द्रं निखिलगुणगृहं सर्वथोपाधिशून्यं, विध्वस्तानङ्गदर्पं सकलनयनिधिं मद्रपाथोधिमाप्तम् ।
शान्तं वीताभिलाषं शुचितरचरितं निर्जरस्वामिपूज्यं, क्षीणाऽन्तःशत्रुवृन्दं विमलपतिमहं भावतो नौमि नित्यम् ॥४॥
**ने**ता निर्वाणमार्गं निखिलमतिमतां जैनमार्गानुगाना-**मि**ष्टार्थप्राप्तये स्ताद् विमलजिनवरो पुण्यभाजां जनानाम् ।
**सू**ते शान्तिं बुधानां सुरपतिनमिता सर्वदा यस्य सूक्ति-**रि**ष्टार्थोत्सर्ज्जनेऽयं सुरवरशिखरी विश्वकीर्ण**प्रतापः** ॥५॥

## ( १४ )
## ॥ वसन्ततिलकावृत्तेन श्रीअनन्तनाथस्तुतिः ॥

संसारसंसृतिभिदं निखिलाप्तमुख्यं, सद्भक्तवाञ्छितविधानसुरद्रुकल्पम् ।
भावारिकुञ्जरविनाशनकेसरीशं, प्रोत्तानपापपटलीपरितापहारम् ॥१॥
निर्नाथनाथमजितं परिवादिवृन्दै-र्देवेन्द्रवन्द्यमनवद्यमवद्यभेदम् ।
विध्वस्तमोहमपराभवनीयतीर्थं, सद्भावतो जिनपतिं प्रणमाम्यनन्तम् ॥२॥ युग्मम् ॥
दुर्वासनाजनितजन्मजराविपत्ति-मज्जज्जगज्जनसमुद्धरणैकदक्षम् ।
संसारनीरनिधितारणयानपात्रं, शश्वत् स्तवीमि भगवन्तमनन्तमाप्तम् ॥३॥
यस्मै नतिं विदधते खलु शुद्धभावा, भव्या मुदा परममोक्षपदाभिलाषाः ।
निःसङ्गसिद्धिसरणिप्रतिपत्तिहेतुः, श्रीमाननन्तभगवान् स तनोतु शर्म ॥४॥
**ने**ता सतां शुभविधौ भुवनाब्जसूर्यो, **मि**त्रारिसङ्गरहितः शिवमार्गदेष्टा ।
**सू**ते स्म यं जिनवरं सुयशाः सवित्री, **रि**ष्टं ददातु जगदेकमहा**प्रतापः** ॥५॥

## ( १५ )
## ॥ इन्द्रवज्रावृत्तेन श्रीधर्मनाथस्तुतिः ॥

स्वर्गोत्रधीरो गतदोषदृष्टि-र्दम्भोलिचिह्नाङ्कितपादयुग्मः ।
प्रक्षीणकामः कृतकर्मशान्तिः, श्री**धर्म**नाथो भविनां श्रिये स्तात् ॥१॥
श्रीभानुभूमीन्द्रकुलप्रदीपं, स्याद्वादराजप्रसवाब्धिकल्पम् ।
छत्रत्रयं यस्य विभाति मौलौ, तं नौमि भक्त्या जिनधर्मनाथम् ॥२॥
सज्ज्ञानसिन्धुं गतसर्वदोषं, सुत्रामचूलार्चितपादपद्मम् ।
सूक्तिच्छटानिर्जितवादिवृन्दं, श्रीधर्मनाथं सततं भजामि ॥३॥
सिद्धं निराकारममानमायं, स्याद्वादमुद्रापरिराजमानम् ।
कन्दर्प्पदर्प्पोद्भिदमर्त्तिशून्यं, नमामि नित्यं जिनधर्मनाथम् ॥४॥
**ने**पोद्भवास्योऽङ्गजगर्वनाशो, **मित्रप्रतापः** प्रथितः पृथिव्याम् ।
**सू**रीशवन्द्यो जिनधर्मनाथो-ऽ**रि**ष्टप्रणाशो भवतात् स सिद्ध्यै ॥५॥

## ( १६ )
## ॥ वसन्ततिलकावृत्तेन श्रीशान्तिनाथस्तुतिः ॥

भक्त्याऽवनम्रसुरमौलिकिरीटकोटी-स्थोद्दामरत्नमणिमौक्तिकरञ्जितांह्रेः ।
सारङ्गलाञ्छनलसच्चरणाम्बुजस्य, संस्तौम्यहं सदुपदेशवचांसि **शान्तेः** ॥१॥
सिद्धः प्रमादरहितो गतमानहस्ती, यद्दर्शनेन दुरितं विगमं प्रयाति ।
प्रोत्तानकामविजयी भवतापतोयं, भूयात् स शान्तिभगवान् मम मोक्षसिद्ध्यै ॥२॥
संसारसिन्धुपतदुद्धृतियानपात्रा-ऽमर्त्येशवन्द्य ! करुणाकर ! वीतराग ! ।
श्रीशान्तिनाथ ! शरणेतकृपार्द्रदृष्टे !, रत्नत्रयं वितर मोक्षपथप्रदीपम् ॥३॥
श्रीशान्तिनाथ ! भगवन् ! शमथाम्बुराशे !, संसारभीषणमहाम्बुधिमुत्तितीर्षौ ।
भक्त्या नते मयि दयां हृदये विधाय, त्रायस्व मां जिनपते ! भववारिनाथात् ॥४॥
**ने**त्राभिभूतकमलः सकलाघशून्यो, **मि**त्रीभवन् निखिलजन्तुषु शान्तिनाथः ।
**सू**रीशनिर्जरनरेन्द्रनतांह्रियुग्मो, **रि**ष्टप्रदो भवतु नोऽस्खलित**प्रतापः** ॥५॥

## ( १७ )
## ॥ इन्द्रवज्रावृत्तेन श्रीकुन्थुनाथस्तुतिः ॥

सम्मेतशैले समभूद्धि यस्य, कल्याणकं पञ्चममद्वितीयम् ।
यो वै जिगायाऽखिलमोहसेनं, श्री**कुन्थु**नाथो भुवने स जीयात् ॥१॥
संसारदावोप्तकुकर्मदूर्वा-संघातप्रोच्छेदनदीप्रदात्रम् ।
वीतस्पृहं भेदकमापदानां, संस्तौमि नित्यं जिनकुन्थुनाथम् ॥२॥
यो योगिलोकेन निषेव्यमाणो, भव्यौघशासो भुवनाधिनाथः ।
सन्तापनाशो गतदूषणस्तं, श्रीकुन्थुनाथं प्रणमामि भक्त्या ॥३॥
सज्ज्ञानलक्ष्मीपरिराजमानो, यस्याऽस्ति तीर्थं शिवमार्गदर्शि ।
सच्छागलक्ष्माङ्कितपादयुग्मो, वन्द्यो न केषां जिनकुन्थुनाथः ॥४॥
**ने**त्राभिभूताम्बुरुहो जिनः स्ता-**न्मि**थ्यात्वजम्बालविशोधनाम्भः ।
**सू**क्त्या पराभूतसुपर्वसूरि-**रिष्टा**र्थदः ख्यातमही**प्रतापः** ॥५॥

## ( १८ )
## ॥ मन्दाक्रान्तावृत्तेन श्रीअरनाथस्तुतिः ॥

ज्योतीरूपं कलुषतिमिरस्तोमविध्वंसहंसं, विश्वोद्धारं महिमभवनं भव्यकल्याणहेतुम् ।
क्षान्त्यावासं सकलविबुधश्रेणिसंसेव्यमानं, शुक्लध्यानानुपमशिखिना दग्धदुष्कर्मदर्भम् ॥१॥
सर्वस्मै यो हितयति सदा शुद्धधर्मोपदेशै-र्ध्यानासक्तं प्रशमजलधिं दुर्लभं पाप्मभाजाम् ।
कल्याणौको भवजलनिधेस्तारणे यानपात्रं, विश्वश्रेयं परमपददं चिद्रमागाधसिन्धुम् ॥२॥
सद्भक्तेभ्योऽभिमतफलदं राजमानं त्रिरत्नैः, शान्ताक्षौघं प्रकृतिसुभगं शुद्धसम्यक्त्वहेतुम् ।
स्वीयस्थाम्ना जितरिपुगणं शान्तदुष्पापचक्रं, पापाद्रीणां झटिति दलने दीप्रदम्भोलिकल्पम् ॥३॥

तीर्थाधीशं विजितमदनं वाञ्छितार्थैकहेतुं, मान्यादेशं त्रिदशमहितं शान्तमुद्राभिरामम् ।
मोहास्पृष्टं शुभगुणनिधिं नष्टभावारिवारं, नष्टानिष्टं त**मर**ममलं भावतोऽहं नमामि ॥४॥
चतुर्भिः कलापकम् ॥

**ने**त्रानन्दो विगतकलहः क्रोधमानादिशून्यो, **मि**थ्यावादक्षपणकुशलः सर्वभावावभासी ।
**सू**रिस्तोमैर्विहितनमनः पञ्चमस्थानवासो, **रि**ष्टावासो वितरतु शिवं स**त्प्रतापो**ऽरनाथः ॥५॥

## ( १९ )
## ॥ अनुष्टुब्वृत्तेन श्रीमल्लिनाथस्तुतिः ॥

भव्याब्जबोधनादित्यं, वीतरागमनीश्वरम् ।
परभीरहितं देवं, स्वर्णशैलमिव स्थिरम् ॥१॥

निवासं सर्वलब्धीनां, सर्वावद्यविवर्जितम् ।
सदानन्दमयं सिद्धं, शान्तं कल्मषनाशिनम् ॥२॥

शक्रपूज्यं कृपाम्भोधिं, सर्ववेदं गिरांगुरुम् ।
गुणागारं महोधाम, **मल्लीशं** प्रणिदध्महे ॥३॥ त्रिभिः कुलकम् ॥

सर्वकर्मविनिर्मुक्तः, प्रसादामृतवारिधिः ।
सिद्ध्यै स्ताच्छमाम्भोधि-र्मल्लिनाथो घटाङ्कितः ॥४॥

**ने**ता निर्वृतिकान्ताया, **मि**तोद्दामारवावलिः ।
**सू**रतः स**त्प्रतापा**ढ्यो-ऽ**रि**ष्टध्वंसाय सोऽस्तु नः ॥५॥

## ( २० )
## ॥ वसन्ततिलकावृत्तेन श्रीमुनिसुव्रतजिनस्तुतिः ॥

निर्मथ्यमानजलनाथगभीरघोषः, कर्मेन्धनौघदहने ज्वलनायमानः ।
भव्यद्विरेफभरणे कमलायमानः, पायात् स नो जिनपति**र्मुनिसुव्रते**शः ॥१॥

धीसम्पदे स्मरजितेऽमलशासनाय, द्वन्द्वापहारकुशलाय शरीरभाजाम् ।
श्रेयोगृहाय कलहौघविवर्जिताय, नित्यं नमो भवभिदे मुनिसुव्रताय ॥२॥

तीर्थाधिराजममलाशयमिन्द्रवन्द्यं, सद्योग्यवर्ण्यचरितं हरिवंशदीपम् ।
विज्ञानवारिधिनिमज्जनमुक्तपङ्कं, नित्यं नमामि मुनिसुव्रतनामदेवम् ॥३॥

घोरान्धकारनरकार्त्तिनिवारणो यो, वीतस्पृहो **भृगुपुरे**ऽस्खलितप्रभावः ।
क्षेमाय यो मतिमतां यतते स्म नित्यं, तस्मै नमो भगवते मुनिसुव्रताय ॥४॥

**ने**र्ष्याऽस्ति यस्य भवसंसृतिमुख्यबीज-**मि**च्छामि दर्शनमहं भवभेदि तस्य ।
**सू**माकलौघकलितस्य विनष्टशत्रो-**रि**ष्टार्थसार्थदयनं मुनिसुव्रतस्य ॥५॥

## ( २१ )
## ॥ वसन्ततिलकावृत्तेन श्रीनमिनाथस्तुतिः ॥

ऐश्वर्यनिर्जितसमस्तमहेन्द्रशोभो, वागीशदैत्यगुरुशोभितवाग्विलासः ।
स्याद्वादसिन्धुसुषमोद्गमचन्द्रकल्पो, रिष्टिं द्यता**न्नमि**पतिर्नमतां नराणाम् ॥१॥
मोहान्धकारतरणिः कृतकर्मशान्ति-र्द्वन्द्वापहारकुशलो भविनां नितान्तम् ।
भक्त्याऽवनम्रजनजातविपद्विनाशो, रिष्टिं द्यतान्नमिपतिर्नमतां नराणाम् ॥२॥
भव्यात्मनां हृदयपापविनाशदक्षः, कारुण्यसिन्धुरवनिप्रभुरासपूज्यः ।
सत्तत्त्वदेशनपटुर्वृजिनोज्झिताङ्गो, रिष्टिं द्यतान्नमिपतिर्नमतां नराणाम् ॥३॥
पञ्चाक्षसप्तिदमनो नवमेघनाद-स्त्रैलोक्यसत्त्वशिवमार्गविधानदक्षः ।
क्रूरेऽपि नैव कुरुते करुणाविलोपं, रिष्टिं द्यतान्नमिपतिर्नमतां नराणाम् ॥४॥
**ने**पोद्भवाम्बकयुगो जितमानसेनो, **मि**थ्यान्धकारदलनैकरवि**प्रतापः** ।
**सू**नुर्नृपाग्र्यविजयावनिनायकस्य, **रि**ष्टिं द्यतान्नमिपतिर्नमतां नराणाम् ॥५॥

## ( २२ )
## ॥ उपजातिवृत्तेन श्रीनेमिनाथस्तुतिः ॥

संसारसिन्धौ प्रपतज्जनेभ्यः, पोतायमानः प्रशमामृतेशः ।
यन्नाममात्रं वितनोति सौख्यं, स **नेमि**नाथो भवताच्छिवाय ॥१॥
भक्त्या नताशेषसुरेन्द्रमौलिः, श्यामाकृतिर्मन्मथगर्वजेता ।
श्रीनेमिनाथो जगतो जनानां, शिवाय भूयात् परमेश्वरोऽसौ ॥२॥
लोकत्रयाम्भोजविबोधभानुः, संवेगरङ्गाम्बुनिमग्नचेताः ।
श्रीनेमिनाथो भगवान् कृपाब्धि-र्जीयात् स नित्यं विगताभिमानः ॥३॥
साम्राज्यलक्ष्मीं तृणवद् विदित्वा, प्राज्यर्द्धियुक्तां निजवीर्यलब्धाम् ।
भेजे व्रतं योऽखिलसौख्यपात्रं, स नेमिनाथो जयतात् त्रिलोक्याम् ॥४॥
**ने**मिर्जिनेशो यदुवंशमौलि-**र्मि**ष्टैर्वचोभिः कृतविश्वमोदः ।
**सू**त्रामपूज्यो भवतु श्रिये वो, **रि**पून् विजेता विदित**प्रतापः** ॥५॥

## ( २३ )
## ॥ स्रग्धरावृत्तेन श्रीपार्श्वनाथस्तुतिः ॥

प्राज्याजेयप्रतापोऽतिविशदचरितो ध्याननिष्ठैकचेता, दुर्वारां मानुषाणां बहुविधविपदां ध्वंसयन्नस्तमानः ।
प्रक्षीणाशेषदोषस्त्रिभुवनमहितः कर्मसम्बन्धशून्यो, जीयाच्छ्री**पार्श्व**नाथोऽतुलगुणजलधिर्ज्ञानलक्ष्मीनिधानः ॥१॥
जन्तुत्राता वितन्द्रो विगतकलिमलो दानवारीशवन्द्यो, लोकानां मोहनिद्रां झटिति तिरयितुं व्युष्टकालप्रकारः ।
सन्ध्येयः पन्नगाङ्कोऽप्रतिहतसमयोऽतुल्यतीर्थाधिराजो, विश्वोद्धर्ताऽरिजेता स जयति सततं पार्श्वनाथो जिनेन्द्रः ॥२॥

पायं पायं यदीयां शुभचरितसुधां श्रोत्रयुग्मैः प्रकामं, शुद्धाचारा मनुष्याः शिवपुरसरणिं गन्तुमर्हा भवन्ति ।
दर्शं दर्शं यदीयां प्रतिकृतिमपि च प्रास्तपापा भवामः, स श्रीपार्श्वाख्यदेवो जगति विजयते कृत्तरागादिवर्गः ॥३॥
विश्वाधीशं जिताक्षं प्रशमरसमयं सीमशून्यप्रभावं, नष्टातङ्कं सशूकं स्मरमददमनं छिन्नसंसारपाशम् ।
कारुण्येनाऽऽर्द्रचित्तं शशधरवदनं सर्वसम्पत्तिहेतुं, भक्त्या श्रीपार्श्वदेवं परमपदकृते नौमि नित्यं प्रकामम् ॥४॥
**ने**ता स्याद्वादभाजामतुलशिवपथं धार्मिकाणां नराणां, **मि**थ्यात्वध्वान्तनाशे दशशतकिरणो विश्वजन्तूपकर्त्ता ।
**सू**क्ष्मार्थौघावबोद्धा भवभवभयभित् स्थायिविश्व**प्रतापो**-ऽ**रि**ष्टप्रध्वंसमानस्त्रिभुवनतिलकः पार्श्वनाथोऽस्तु सिद्ध्यै ॥५॥

## ( २४ )
## ॥ शार्दूलविक्रीडितवृत्तेन श्रीवीरजिनस्तुतिः ॥

**ने**त्रानन्दविधायिनी विधिभृतां क्रोधादिदोषोज्झिता, **मि**त्रेऽरौ कनके दलौ सममतिर्मिथ्यामतिध्वंसिनी ।
**सू**त्रार्थप्रतिपादिनी भगवती सूरिव्रजोपासिता-ऽ**रि**स्तोमाविजिता **प्रताप**वसती रिष्टौघसन्नाशिनी ॥१॥
सद्विज्ञानमयी कृपारसमयी श्रेयोमयी भामयी, भव्येभ्यो मतिदायिनी विजयिनी दौर्भाग्यविध्वंसिनी ।
दृप्यद्वादिविनाशिनी प्रणयिनी भव्यात्मनामव्ययं, मूर्ति**र्वीर**विभोः पुनातु भुवनं सत्कामदा कामदा ॥२॥
युग्मम् ॥

निःशेषाङ्गिसमीहितार्थनिकरत्यागैककल्पद्रुमो, ज्ञानाब्धिः सततं विपत्तिदलनो निर्वाणलक्ष्मीवृतः ।
कारुण्याम्बुनिधिर्भवाग्निशमनः पुण्यैकवारान्निधि-र्देवार्यो वसुधातले विजयतां कल्याणकारी सताम् ॥३॥
श्रीसिद्धार्थनरेन्द्रवंशजलधिप्रोल्लासशीतद्युति-र्विश्वव्यापियशास्तमोभरहरो विध्वस्तकर्मागमः ।
दृप्ताशेषकुवादिदन्तिदलने प्रोद्दीप्तकण्ठीरवो, जीयाज्जन्मजरादिकष्टरहितः श्रीवीरनाथो भुवि ॥४॥
**ने**दिष्ठो निवसन् सतामनिकटं शार्दूललक्ष्माङ्कितो, **मि**थ्याधीमदिराप्रपाणनिबिडोन्मत्तैरनालोकितः ।
**सू**त्थानो जगतः सतां शिवविधौ दुर्जेयपद्माङ्गजा-ऽ**रि**स्फारस्मयवारणक्षयहरिर्जीयाज्जिनोऽपश्चिमः ॥५॥

ஐ✦ஐ

## ॥ ४. चतुर्विंशतिजिनस्तव: - १ ॥

पाणिस्थिताऽमलकवत् त्रिजगत्पदार्थ-ज्ञातो ! महेन्द्रमहितक्रमपद्मयुग्म ! ।
युष्मत्सधर्मपदवीं समवासुकाम-स्त्वां स्तौमि **नाभिज** ! सदाऽहमनन्तवीर्यम् ॥१॥
प्रोन्मादिवादिमतखण्डनलब्धवर्णं, बाह्यान्तरङ्गरिपुशाखिकदम्बकानाम् ।
प्रोन्मूलने प्रबलकल्पविरामवातं, वन्दे**ऽजिते**शमनिशं त्रिदशेशवन्द्यम् ॥२॥
सम्प्राप्तशुद्धपरमात्मपदं जिनेन्द्रं, मोहव्यथाभरनिवारणवैद्यरूपम् ।
विश्वत्रयाऽऽन्तरकुतर्कविनाशदक्षं, श्री**सम्भवं** जिनवरं प्रयत: प्रणौमि ॥३॥
पूज्**याभिनन्दन**विभोर्गुणरत्नराशे-र्गाव: शुभास्त्रिभुवने कुमतैरधृष्या: ।
सद्द्रव्यपर्यवयुता नयभङ्गयुक्ता:, प्रामाण्यत: परिगता: सततं जयन्तु ॥४॥
यस्मिन् गते जिनपतौ जठरं जनन्या, जाता शुभा मतिरपूर्वनयादिकानाम् ।
आख्या बभूव सुमतिस्तत एव यस्य, पायात् स नोऽकृशमति: **सुमति**र्बलीयान् ॥५॥
क्षान्त्यौकसो भयभिदो वरबोधिहेतो-र्मोहान्धकारहननार्यमधामकल्पा: ।
**पद्म**प्रभोरनघदिव्यशरीरभास-स्तन्वन्तु वाञ्छितफलं जिनभक्तिभाजाम् ॥६॥
वाचंयमो विदितविश्वपदार्थसार्थो, दुष्कर्मदर्भदहनप्रबलाग्नितुल्य: ।
श्रीमत्**सुपार्श्व**भगवान् कलधौतकान्ति:, पायात् सदा स भुवनं पुरुहूतपूज्य: ॥७॥
आकर्ण्य तावकवचो जिन**चन्द्र**नाथ ! स्याद्वादतत्त्वकथनैकपटुप्रमाणम् ।
सद्धर्मबोधनविधौ विहितप्रयत्नं, सञ्जायते मनसि मुल्लहरी मदीये ॥८॥
दृप्यत्कुवादिगजभञ्जनकुञ्जरारिं, शान्तं मनोज्ञमकराङ्कितपादपद्मम् ।
नि:शेषदोषविगमाभिगताक्षयेन्दिं, वन्दे सुधासमगिरं **सुविधिं** जिनेशम् ॥९॥
निस्तन्द्रमात्मगुणलीनमतीतरूपं, कल्याणकेलिभवनं भवनं कलानाम् ।
मोहक्षपाविघटनोदितसप्तसप्ति:, श्री**शीतल:** स जयतात् करुणामितद्रु: ॥१०॥
नि:शेषलोकपरमप्रमदाङ्कुराणां, संवर्द्धने नवकबन्धदमाप्तमुख्यम् ।
स्याद्वादयुक्तियुततीर्थमनन्तवीर्यं, **श्रेयांस**नाथमनघं तमहं स्तवीमि ॥११॥
आविष्कृताखिलशरीरिकृपाप्रवाहं, युक्त्या निराकृतकुवादिमनोवितर्कम् ।
तं **वासुपूज्य**भगवन्तमतीतदोषं, संस्तौम्यहं क्षतरुजं महिषाङ्कयुक्तम् ॥१२॥

सद्वेद्यकर्महतये कृतधर्मबोधः, कोलाङ्कितांह्रिकमलोऽशुभकर्मनाशः ।
शान्ताकृतिः सुरवरार्चितपादपीठो, देवः स पातु भविनः **कृतवर्मसूनुः** ॥१३॥
विश्वोपकारकरणाय सदा प्रवृत्ताः, श्री**सिंहसेनधरणीपतिदिव्यसूनोः** ।
वाचो जयन्ति सुतरां कृतिपीयमाना, भव्याङ्गिसंहतिमनोमलवारितुल्याः ॥१४॥
कल्पद्रुमप्रतिममीहितवस्तुदाने, वज्राङ्कभूषितपदं सुरराजवन्द्यम् ।
पादाब्जसंस्पृशि सुरे च जने समानं, वीतस्पृहं प्रणिदधे जिन**धर्म**नाथम् ॥१५॥
ज्योतिर्मयं शिवमयं विजितस्मरारिं, पीयूषसोदरगिरा मुदिताङ्गिवृन्दम् ।
श्रीसार्वभौमपदवीकलितं निरीशं, तीर्थङ्करं प्रणिदधे जिन**शान्ति**नाथम् ॥१६॥
सम्पत्तिकारणमनन्तमनन्तपुण्यं, संसारसंसृतिभिदं महनीयवीर्यम् ।
भावावभाससवितारमुपाधिशून्यं, तन्नौमि **कुन्थु**ममरासुरपूज्यपादम् ॥१७॥
आविष्करोतु भगवा**नर**नाथदेवो, मेऽज्ञानताकुरचना हि विधाय दूरम् ।
क्रोधादितस्करहतत्रिकरत्नकस्य, रत्नत्रयस्य सुतरां हृदये प्रकाशम् ॥१८॥
दुष्कर्मपङ्कपरिशोषणचण्डभानुं, वृन्दारकासुरनृपाक्षचकोरचन्द्रम् ।
येनाऽऽहिता स्वहृदि केवलपुण्यमाला, तं नौमि **मल्लि**मभयं सुकृतैकहेतुम् ॥१९॥
विध्वस्तदोषहरिवंशसमुद्रचन्द्रं, जाग्रत्प्रतापमचलं भुवनैकदीपम् ।
सत्कच्छपाङ्ककलितं जितशत्रुसेनं, भक्त्या स्तवीमि **मुनिसुव्रत**नामधेयम् ॥२०॥
नीलोत्पलाङ्ककलितांह्रिसरोजयुग्मा-ऽनेकान्तवादमतवारिधिवृद्धिचन्द्र ! ।
देवासुराधिपमयूरनवीनमेघ !, मद्वाञ्छनां **नमि**पते ! परिपूरयाऽरम् ॥२१॥
अर्हन्तमिन्द्रमहितं विहितोपकारं, दुर्जेयमारपरिवर्जितचित्तवृत्तिम् ।
त्रैलोक्यकामितविधायिनमाप्तमुख्यं, **नेमिं** नमामि नितरां यदुवंशदीपम् ॥२२॥
सम्मेतशैलशिखरे नभसोऽच्छपक्षा-ऽष्टम्यामदोषचरितः शिवमाप यो हि ।
सम्बोधयन् भविजनान् नितरां तमीडे, श्री**पार्श्व**नाथमचलं कमठोपसर्गैः ॥२३॥
पीता भवेषु कटुगीर्मयकाऽधमानां, तस्मान्ममाऽक्षयगतिः किल दुर्लभैव ।
पुण्यात् तथापि तव तीर्थमथाऽत्र लब्ध्वा, मन्येऽह**मन्तिमजिनै**व शिवं प्रपत्स्ये ॥२४॥

# ॥ ५. चतुर्विंशतिजिनस्तवः - २ ॥

अपारसंसारसमुद्रपोतं, देवेन्द्रनागेन्द्रनतांह्रिपीठम् ।
प्रास्तप्रमादं प्रथितप्रबोधं, श्री**मारुदेवं** सततं श्रयेऽहम् ॥१॥
स्वदेशनारञ्जितभव्यचित्तं, चरित्रविद्योतितविश्वलोकम् ।
योगीशितारं विनिपातिताघं, देवं **द्वितीयं** श्रयताऽऽसमुख्यम् ॥२॥
महोदयो भूरिविभूतिरर्ह-न्नानन्दकन्दस्तुरगध्वजोऽसौ ।
**जितारिजातो**ऽपि जितारिरेव, पुष्याच्छ्रियं वः स तृतीयदेवः ॥३॥
गुणैर्गरीयान् नतदानवारिः, शिवाश्रयः संवरपूरितात्मा ।
देवो विभुः क्षीणसमस्तकर्मा, ददातु शं **संवरराजसूनुः** ॥४॥
शरन्निशानाथविशुद्धकीर्तिं, प्रफुल्लपद्माननमर्ककान्तिम् ।
संसारसिन्धूत्तमयानपात्रं, नमामि नित्यं **सुमतिं** जिनेन्द्रम् ॥५॥
पद्मप्रभं पद्मसमास्यनेत्रं, पद्मासनस्थं स्फुटपद्मचिह्नम् ।
पद्मानिवासं मृदुपाणिपद्मं, **पद्मप्रभं** नौमि कलासमुद्रम् ॥६॥
निःशेषनाकीश्वरपङ्क्तिपूज्याः, सङ्कल्पकल्पद्रुसमाः सुभासः ।
**प्रतिष्ठभूपाङ्गज**पादयुग्म-नखा दिशन्तु प्रथितप्रबोधम् ॥७॥
चन्द्रप्रभश्चन्द्रसधर्मशान्त-श्चन्द्राच्छकीर्तिर्धृतचन्द्रलक्ष्मा ।
चन्द्रो ह्यनेकान्तसमुद्रवृद्धौ, **चन्द्रप्रभो**ऽर्हंस्तनुतात् सुखानि ॥८॥
निःसीमविद्येश्वरमाप्तपूज्यं, सुग्रीववंशोदधिबालचन्द्रम् ।
त्रिकालसेवागतदेवराजिं, वन्दामहे श्री**सुविधिं** कृपालुम् ॥९॥
निष्कामनः काञ्चनकामिनीषु, भवाधितापोपरमैकनीरम् ।
क्षीणाष्टकर्मा निहतप्रमादः, श्री**शीतलो** मामवताद् भवाब्धेः ॥१०॥
वारीन्द्रगम्भीररवो जिनेन्द्रो, महेन्द्रमान्यांह्रिसरोजयुग्मः ।
प्रोत्तप्तजात्यार्जुनकल्पकान्तिः, **श्रेयांस**नाथो भवताच्छिवाय ॥११॥
लोकत्रयाविष्कृतसर्वभावाः, कुमत्यधृष्या नयसार्थपूर्णाः ।
श्री**वासुपूज्य**स्य गतस्पृहस्य, शर्माणि गावः प्रथयन्तु नित्यम् ॥१२॥

निसर्गकारुण्यकलासमुद्रो, देवोऽपतन्द्रो जितपुष्पबाणः ।
अनन्तवीर्यः कृतकर्मशान्तिः, सुखानि दिश्याद् **विमल**प्रभुर्नः ॥१३॥
दुष्कर्मपृथ्वीरुहपुण्डरीकं, परोपकाराय कृतप्रयत्नः ।
श्येनाभिलक्ष्मा जितमोहसेनो, जीया**दनन्तो** जिनचक्रवर्ती ॥१४॥
भवाब्धिसन्तारणयानपात्रं, विपश्चिदीड्यं वृजिनाद्रिवज्रम् ।
प्रक्षीणकर्माणमनन्तवीर्यं, श्री**धर्म**नाथं प्रणमामि नित्यम् ॥१५॥
क्रूरान्तरङ्गारिकलापदाहे, यस्य प्रतापो ज्वलनायितो वै ।
सन्तप्तहेमद्युतिभासमानः, स **शान्ति**नाथो जयताज्जिनेशः ॥१६॥
सद्वृत्तमुक्ताफलवारिराशिं, कैवल्यलीलाश्रितमिन्द्रपूज्यम् ।
जिनाधिपं निर्जितमन्मथारिं, **कुन्थुं** भवच्छेदकरं भजामि ॥१७॥
निकेतनं चारुकलागुणानां, नयार्णवं सप्तमसार्वभौमम् ।
वीतस्पृहं कामितकल्पवृक्षं, नमाम्य**रं** निर्जितमोहमल्लम् ॥१८॥
समस्तकल्याणवनाभिवृद्धौ, मेघायिता यस्य हि देशानावाक् ।
स वन्दितोऽनेकमहेन्द्रवृन्दैः, श्रेयांसि नो यच्छतु **मल्लि**नाथः ॥१९॥
त्रैलोक्यसम्पादितवाञ्छितार्थ-स्तीर्थेश्वरो निष्कलुषात्मवृत्तिः ।
तपःकृपाणक्षतकर्मशाखी, जीयाज्जिनेन्द्रो **मुनिसुव्रता**ख्यः ॥२०॥
हतद्विषे तप्तहिरण्यभासे, पापव्यपेताय जितस्मराय ।
योगीश्वरायाऽखिलभूमिभर्त्रे, देवाय तस्मै **नमये** नमोऽस्तु ॥२१॥
नूत्नाम्बुवाहोपमदेहवर्णो, नमत्समस्तामरभर्तृमौलिः ।
पारङ्गतः सन्तनुतात् सुखानि शङ्खाङ्कितोऽसौ जिन**नेमि**नाथः ॥२२॥
यदीयभाश्चण्डकरे विनाशं, यात्युद्गते मोहमहान्धकारः ।
श्री**पार्श्व**भर्तुः क्रमयोर्नखास्ते-ऽस्माकं सुखानि प्रथयन्तु नित्यम् ॥२३॥
आखण्डलालीमहितांह्रिपद्मो, यद्द्वादशात्मद्युतिरस्तदोषः ।
मृगेशलक्ष्मा करुणासमुद्रः, स **वर्द्धमानो** भवतु श्रिये वः ॥२४॥

## ॥ ६. चतुर्विंशतिजिनस्तवः - ३ ॥

भक्त्या महेन्द्रार्चितपादपद्मं, देवाधिदेवं करुणावतारम् ।
निःशेषदोषोज्झितमाप्तमुख्यं, संस्तौमि नित्यं **प्रथमं** जिनेन्द्रम् ॥१॥
तीर्थाधिराजं त्रिजगत्प्रदीपं, संस्तूयमानं सुरराजवृन्दैः ।
नागाङ्कसंशोभितपादपद्मं, वन्देऽ**जित**स्वामिनमंशुकान्तिम् ॥२॥
भव्याङ्गिनां नेत्रचकोरचन्द्रं, श्रेयोनिवासं महिमानिधानम् ।
कर्मद्रुमोन्मूलनपुण्डरीकं, श्री**संभवेशं** प्रणमामि भक्त्या ॥३॥
गावो हि वः पा**न्त्वभिनन्दनस्य**, समस्तदेवेन्द्रनरेन्द्रनम्याः ।
मोहान्धकारापगमांशुहस्ता, विश्वाङ्गिनां संशयनाशदक्षाः ॥४॥
विध्वस्तदोषागमनं शिवाङ्गं, कल्याणकान्तिं करुणार्द्रचित्तम् ।
विश्वाभिवन्द्यं भवतापनीरं, संस्तौमि भक्त्या **सुमतिं** जिनेन्द्रम् ॥५॥
कन्दर्पमातङ्गविदारणोरु-कण्ठीरवो दोषविवर्जितात्मा ।
बालार्ककान्तिः शमवारिनाथः, **पद्मप्रभः** स्ताद् भवतापशान्त्यै ॥६॥
दुर्दान्तकन्दर्पविकारनाशो, देवेन्द्रपूज्यो हतसर्वपापः ।
वीतस्पृहो वीतसपत्नराशिः, **पृथ्वीवपुर्जो** जयतात् त्रिलोके ॥७॥
सज्ज्ञानवार्धिं मृगचिह्नचिह्नं, सिद्धं जिनेन्द्रं सुरराजवन्द्यम् ।
**चन्द्रप्रभं** ज्ञातसमस्तभावं, संस्तौमि भक्त्या महसेनसूनुम् ॥८॥
पञ्चाक्षजेताऽखिलपापहर्त्ता, धर्मोपदेष्टा शिवमार्गदाता ।
दुष्कर्महन्ताऽखिलभूमिभर्त्ता, भूयाद् विभूत्यै **सुविधि**जिनेन्द्रः ॥९॥
कल्याणकारी कृतकर्मनाशो, निर्वाणवासो विहितोपकारः ।
श्रीवत्सलक्ष्मा विगतप्रपञ्चः, श्री**शीतले**शो विदधातु सौख्यम् ॥१०॥
अनङ्गजेतारमनन्तपुण्यं, कारुण्यपाथोधिमनीशमीशम् ।
संसारसेतुं शिवशर्महेतुं, **श्रेयांस**नाथं भजत प्रकामम् ॥११॥
विश्वाधिपं निर्जितमोहराजं, भव्याङ्गिचेतोगतसंशयानाम् ।
दूरे विधानैकपटुं पवित्रं, श्री**वासुपूज्यं** प्रणमामि भक्त्या ॥१२॥

नित्योदयः प्रास्ततमःकलापो, गीर्वाणचक्रार्चितपादपद्मः ।
कल्याणकृच्छूकरलाञ्छनोऽसौ, भद्राय भूयात् **कृतवर्मसूनुः** ॥१३॥
त्रैलोक्यनाथाय जिनेश्वराय, श्री**सिंहसेनाधिपगात्रजाय** ।
योगीन्द्रवन्द्याय जितेन्द्रियाय, विध्वस्तकामाय नमोऽस्तु तस्मै ॥१४॥
श्रीभानुवंशार्णववृद्धिचन्द्रं, पूर्णेन्दुबिम्बोपमशान्तवक्त्रम् ।
आदित्यवर्णं करुणानिधानं, श्री**धर्म**नाथं नमताघनाशम् ॥१५॥
शान्ताखिलाक्षप्रकरोऽस्तमानः, शान्त्यम्बुधिः शान्तिकरो जिनेशः ।
विध्वस्तकर्मा मृगलाञ्छनोऽयं, श्री**शान्ति**नाथो भवताच्छिवाय ॥१६॥
सद्धर्ममार्गोपदिशे जिनाय, पापापहाराय महोदयाय ।
दुष्टाष्टकर्मारिविनाशनाय, श्री**कुन्थु**नाथाय नमो हिताय ॥१७॥
निर्दग्धकामाङ्कुरमस्तदोषं, विश्वत्रयासेवितपादपद्मम् ।
विश्वारविन्दप्रविकाशसूर्यं, वन्दे**ऽर**नाथं जितमोहमल्लम् ॥१८॥
संसारभीष्मानलतापतोयं, भव्याङ्गिनां हृन्मलशोधनाम्बु ।
विश्वाङ्गिचेतोऽभिमतामरागः, श्री**मल्लि**नाथो जयति प्रकामम् ॥१९॥
तेजोनिधानाय जिनोत्तमाय, श्रेयोनिवासाय जितेन्द्रियाय ।
भव्यव्रजान्तर्मलशोधनाय, तस्मै नमः श्री**मुनिसुव्रताय** ॥२०॥
लोकत्रयाशेषपदार्थसार्थ-प्रकाशनाहर्मणयेऽनघाय ।
प्रोद्दीप्तकल्याणसमप्रभाय, नमोऽस्तु तस्मै **नमये** जिनाय ॥२१॥
दुर्वादिमत्तेभमृगेश्वराय, कैवल्यलक्ष्मीपरिभूषिताय ।
नूत्नाम्बुवाहप्रतिमाङ्गभासे, श्री**नेमि**नाथाय नमोऽस्तु नित्यम् ॥२२॥
स्वात्मोपकाराय च यो ह्यनेकान्, घोरान् विषेहे कमठोपसर्गान् ।
निधिर्महिम्नां प्रणतामरस्तं, श्री**पार्श्व**नाथं भजत त्रिसन्ध्यम् ॥२३॥
संमोहनिद्राहरणप्रभातं, दीप्यत्प्रतापं हरिणेशचिह्नम् ।
सिद्धार्थधात्रीशकुलावतंसं, श्री**वर्द्धमानं** नितरां नमामि ॥२४॥

# ॥ ७. पञ्चजिनस्तुतय: ॥

## ( १ )
## ॥ श्रीऋषभजिनस्तुति: ॥

सकलनिर्जरमौलिनमस्कृतं, कनककान्तिकलाकमनीयकम् ।
वृषभलाञ्छनमीहितदायिनं, जिनपतिं **प्रथमं** प्रणिदध्महे ॥१॥

कलुषकर्दमशोषणभास्करा, मदनमत्तकरीन्द्रमृगेश्वरा: ।
जिनवरा जितमोहमहीश्वरा, जनितजन्तुहिता वितरन्तु शम् ॥२॥

हितकरं भविकाम्बुजभास्करं, निखिलनीतिविभूषितमद्भुतम् ।
कुमतिगर्वविनाशनकौशलं, जिनमतं वितनोतु सुखं सदा ॥३॥

ललितहंसगते ! कमलस्थिते !, जिनवरांह्रिसुपङ्कजभृङ्गिके ! ।
परमबोधविधानविशारदे !, वितर देवि ! हितं कृतमङ्गले ! ॥४॥

## ( २ )
## ॥ श्रीशान्तिजिनस्तुति: ॥

अरुणचरणपाता सर्वकल्याणहेतु-स्त्रिदशविहितसेवो विश्वसेनप्रसूत: ।
दलितसकलदोषो यानपात्रं भवाब्धौ, विदितनिखिलतत्त्व: शान्तिनाथोऽस्तु शान्त्यै ॥१॥

शुचितममहिमानो विष्टपै: स्तूयमाना, विगतविषयवाञ्छा मुक्तिरामैकरक्ता: ।
प्रशमसलिलनाथा: सर्वतीर्थाधिराजा, गतसकलभयास्ते वाञ्छितं मेऽर्पयन्तु ॥२॥

नयगममणिवृन्दोद्भासितं भव्यपूज्यं, शिवपदपथदीपं नित्यशुद्धस्वरूपम् ।
कृतकुसमयतत्त्वध्वंसनं भूरिशोभं, प्रवचनमहमीडे सर्वलोकप्रसिद्धम् ॥३॥

जिनवरमतसिन्धूल्लासनैकेन्दुकल्पा, शशधरसितवर्णा विघ्नवृन्दापहारा ।
वरकमलनिषण्णा पुस्तकादिं दधाना-ऽघमपहरतु देवी धार्मिकाणां नराणाम् ॥४॥

( ३ )

॥ **श्रीनेमिजिनस्तुतिः** ॥

यन्नाममात्रस्मृतितो जनाना-मेनांसि शीघ्रं विलयं श्रयन्ते ।
कन्दर्पलीलोपवनप्रणाश-हस्ती स **नेमि**प्रभुरस्तु सिद्ध्यै ॥१॥
कुकर्मविध्वंसविधानशूरा, नित्यं शरण्याः शरणोत्सुकानाम् ।
विश्वोपकारप्रवणाशयाः श्री-जिनेश्वरा वो वितरन्तु शर्म ॥२॥
प्रमाणनिक्षेपसुनीतियुक्तं, हितावहं सर्वसतामदोषम् ।
तीर्थेश्वरास्याम्बुरुहप्रसूतं, ध्यायामि रात्रिन्दिवमागमार्थम् ॥३॥
प्रभाढ्यवैताढ्यसितेतविघ्ना, सदाशयैश्वर्ययुताऽपतन्द्रा ।
सार्थीकृतागण्यगुणप्रकारा, देव्यम्बिकाख्या कुशलं तनोतु ॥४॥

( ४ )

॥ **श्रीपार्श्वजिनस्तुतिः** ॥

जिगाय यो मन्मथदर्प्पमाप्त-मखण्डभूमण्डलसेवितांह्रिम् ।
दृक्कर्णलक्ष्माङ्कितपादयुग्मं, गतस्पृहं तं भजताऽऽ**श्वसेनिम्** ॥१॥
आसादितानन्तचिदास्पदानां, परार्थनिर्मापणपण्डितानाम् ।
वीतस्पृहाणां जगदीश्वराणां, जितद्विषां श्रीचरणौ नमामि ॥२॥
सद्भिर्नतं निर्वृतिवर्त्मदर्शि, कल्याणवल्लीवनवारिवाहम् ।
विश्वत्रयोद्द्योतकरं जिनानां, मतं नमामीहितपारिजातम् ॥३॥
वामेयदेवांह्रिसरोजभृङ्गी, विघ्नाहरी नूतनमेघनादा ।
प्रियङ्करी सर्वजगत्प्रधाना, पद्मावती कामितमातनोतु ॥४॥

( ५ )

॥ **श्रीवीरजिनस्तुतिः** ॥

विश्वाधीशो देशनावाक्सुधाभिः, सर्वान् भव्यान् जीवयामास योऽसौ ।
नेशुस्तूर्णं यत्प्रभावात् कषायो-लूकास्तं श्री**वीर**भानुं नमामि ॥१॥
भव्याम्भोजोद्बोधनैकोष्णपादा, लेखाधीशैः स्तूयमानाः प्रकामम् ।
संसाराम्भोराशिपातो जिनेन्द्रा, दृप्यन्मोहेभच्छिदः श्रेयसे स्युः ॥२॥
कल्याणौको विज्ञजाताभिवन्द्यं, दोषास्पृष्टं वादिदर्पप्रणाशम् ।
श्रीसर्वज्ञैर्भाषितं क्षीणमोहै-स्तं सिद्धान्तं नौमि नित्यं पवित्रम् ॥३॥
भक्ताभीष्टं पूरयन्ती प्रकामं, भव्योत्तापानुज्झसन्ती लसन्ती ।
कल्याणी सा विश्वलोकाभिपूज्या, सिद्धादेवी वाञ्छितं नस्तनोतु ॥४॥

## ॥ ८. श्रीशङ्खेश्वरपार्श्वनाथ-षोडशकम् ॥

**वामेया**ऽनन्तशक्ते ! सुरपतिविहितस्तोत्र ! विज्ञानसिन्धो !,
**शङ्खेशो**त्तंस ! देवाऽवृजिन ! शमनिधे ! भव्यदृङ्मुद्विधायिन् ।
संसाराम्भोधिपोतप्रतिमपदयुगातुल्यकीर्त्यम्बुराशे,
भक्त्या स्तोतुं यतेऽहं गुणगणमनिशं युष्मदीयं प्रकामम् ॥१॥

विध्वस्ताशेषदोषं मधुरतमगिरा नन्दिताशेषलोकं, काश्यां प्रख्यातकीर्तिं मदनकरिहरिं छिन्नदुर्मोहजालम् ।
नागाङ्कं नागपूज्यं कमठमदभिदं धैर्यशैलाधिराजं, वन्दे शङ्खेश्वरस्थं जगदहितहरं पार्श्वनाथं जिनेन्द्रम् ॥२॥

श्रेयोवल्लिवनाभिवृद्धिजलदं निर्वाणसौधस्थितं, त्रैलोक्येहितदायकं घनतरश्यामद्युतिं श्रीपतिम् ।
जैष्णश्रेणिसमर्चितांह्रिकमलं भावारिविध्वंसिनं, श्रीशङ्खेश्वरसंस्थितं जिनपतिं पार्श्वेशितारं स्तुम: ॥३॥

येन ध्यानकृशानुना निजतम:कक्ष: समुज्ज्वालित:, पञ्चत्रिंशदुदारवाग्गुणगणैर्योऽसौ समुज्जृम्भते ।
सर्वज्ञो भगवान् विशुद्धमहिमा देवेश्वरै: संस्तुत:, स श्रीपार्श्वजिन: क्षितौ विजयतां शङ्खेशसम्भूषणम् ॥४॥

दृगानन्दकारी भवव्याधिवैद्य:, कृपाणांपयोधि: पयोजाक्षयुग्म: ।
श्रियामालयोऽनङ्गनागेशसिंहो, जिनोऽस्त्वाश्वसेनि: शिवायाऽऽर्हतानाम् ॥५॥

महेन्द्राभिवन्द्य: समस्तार्थदर्शी, नयानां निवासो हताशेषकर्मा ।
व्यपास्तान्तरङ्गारिवारो निरीह:, स शङ्खेश्वरोऽसौ श्रिये वोऽस्तु पार्श्व: ॥६॥

सेन्द्रद्युसत्सुभगमौलिकिरीटकोटी-सङ्घृष्टरम्यचरणाम्बुजमस्तदोषम् ।
ज्ञानार्णवं परकुतीर्थ्यपराजितोक्तिं, शङ्खेश्वरं जिनवरं प्रणमामि पार्श्वम् ॥७॥

दृप्यत्कुवादिहृदयोद्गतदुर्विचार-संयोजितागमभुजङ्गमपन्नगारिम् ।
नि:शेषनीतिनिलयं तमसां विनाशं, शङ्खेश्वरं प्रणिदधे जिनपार्श्वनाथम् ॥८॥

साकल्यावगतत्रिलोकविषय: सौभाग्यसाम्राज्यभू:, संसारार्णवयानपात्रमखिलप्राण्यम्बुजाहर्पति: ।
शक्राभिष्टुतपादपङ्कजयुगस्तीर्थेश्वर: शङ्करो, वामेयस्तनुताद्धितं कलिमलप्रक्षालनप्राणदम् ॥९॥

निःशेषाशिवभञ्जनं सुकृतिनां कारुण्यपाथोनिधिं, प्रीत्या पण्डितशेखरैरभिनतं पूर्णीकृतप्रार्थनम् ।
निष्पङ्कामृतरश्मिकल्पवदनं कैवल्यसम्पद्युतं, श्रीवामातनयं नमामि सततं शङ्खेश्वरस्थं जिनम् ॥१०॥

वन्द्यो लेखगणोत्तमाङ्गमुकुटै रागादिदोषोज्झितो-ऽनेकान्तोदधिशारदामृतकरो देवाधिदेवो दमी ।
पातालावनिनिर्जरालयगतः सर्वार्थसिद्धिप्रदः, श्रीपार्श्वो जयतात् सदा त्रिजगतीसर्वज्ञसंसेवितः ॥११॥

प्रत्यूहप्रकरान्धकारदलने प्रोद्यद्दिवास्वामिनं, दृप्यद्वादिमहीरुहोद्धतगजं सिद्धं नयाम्भोनिधिम् ।
संस्तौमीहितदं सकर्णमहितं कल्याणकेलीगृहं, पूर्णोद्रिक्तशरन्निशेशवदनं श्रीपार्श्वनाथं प्रभुम् ॥१२॥

भ्राजिष्णुः सुगुणैर्दुरिन्द्रियदमी प्रौढप्रभावाकरः, सर्वज्ञः शतकोटिपाणिमहितो क्षीणाष्टकर्मा विभुः ।
विश्वव्यापिमहामहा जिनवरो ख्यातो महिम्नाऽवनौ, कामं कामितमातनोत्वसुमतां श्रीअश्वसेनाङ्गजः ॥१३॥

मिथ्यात्वान्धकृतिप्रणाशतरणिं निःशेषयोगीश्वरं, भासोद्भिन्नतमोव्रजं सुरनरश्रेणीस्तुतं शर्मदम् ।
रागद्वेषमुखारिवारजयिनं श्रेयःपदावाप्तये, सर्वज्ञं तमभिष्टुवेऽक्षदमनं भक्त्याऽऽश्वसेनिं सदा ॥१४॥

गाम्भीर्यं जलधेर्जयन् विघटयन् भव्यात्मनामापदाः, कीर्त्त्या भारतभूतलं धवलयन्नेनोव्रजं दूरयन् ।
भव्याब्जं प्रतिबोधयन् विरचयन् सम्प्रार्थितानर्थिनां, वामेयो जयताज्जितेन्द्रियगणो धर्मं धरन् धारयन् ॥१५॥

ज्ञानात्माऽच्युतवन्दितोऽखिलगुणाम्भोधिर्गिरामीशिता, विध्वस्तोत्कटकर्ममर्मनिवहोऽम्भोजोपमोर्ध्वस्थितिः ।
भव्यानामभिवाञ्छितार्थनिकरस्वर्द्रूपमो नीरतिः, श्रीशङ्खेश्वरपार्श्वनाथभगवान् दद्यान्मनोवाञ्छितम् ॥१६॥

## ॥ ९. श्रीवीरस्तोत्रम् ॥

जगन्नेता जगत्राता, सिद्धो नित्यसुखेशिता ।
निष्पाप: पातु वो नित्यं, वर्द्धमानो महेश्वर: ॥१॥
निरञ्जनो निराकार:, पुण्यात्मा पुरुषोत्तम: ।
निर्दम्भो निरहङ्कारो, विश्वव्यापी सनातन: ॥२॥
य: कर्त्ता सर्वसौख्यानां, संहर्त्ता निखिलैनसाम् ।
सर्वज्ञ: सर्वदर्शी च, कल्याणकमलालय: ॥३॥
देवेन्द्रैरपि पूज्योऽसौ, वीतरागो जितेन्द्रिय: ।
निरामयो निरातङ्क:, शान्तो योगविदां पर: ॥४॥
तीर्थनाथो जगन्नाथो-ऽनाथनाथो गुणोदधि: ।
विधूतकर्मजम्बालो, नष्टोपाधिर्गतस्पृह: ॥५॥
परात्मा परमज्योति-र्निर्मोह: करुणार्णव: ।
निर्मुक्तकामिनीसङ्ग:, शस्त्रापेतकराम्बुज: ॥६॥
सदानन्दलताम्भोद:, संसारार्णवनौर्विभु: ।
ध्वस्तक्रोधादिसंक्लेशो, निश्शान्तमदनानल: ॥७॥
भूर्भुव:स्वस्त्रयप्राणि-व्राताह्लादविधायक: ।
भव्याम्भोजतमोऽराति-र्वादीभव्रजकेसरी ॥८॥
सर्वज्ञो ममतापेतो, मिथ्यात्वोदधिशोषण: ।
यशस्वी च महस्वी च, मेधावी च सदोदय: ॥९॥
अज: सौभाग्यभाग्यैका-धिष्ठानं मेदिनीपति: ।
जगद्बन्धुर्जगन्नाथो, कृतकृत्यस्तपोधन: ॥१०॥
उद्धर्त्ताऽशेषजन्तूनां, संसाराऽऽतततोयधे: ।
निहन्ताऽनिष्टकष्टानां, दाता मोक्षफलस्य च ॥११॥
सर्वोपद्रवविध्वंसी, नि:शेषामरवन्दित: ।
साद्यनन्तस्थितिर्देवो, विध्वस्ताखिलकल्मष: ॥१२॥

रूपातीतो विशुद्धात्मा-ऽनन्तविज्ञानदर्शनः ।
प्रणेता सर्वनीतीनां, ध्येयः कामितदायकः ॥१३॥
शरणोऽनन्तशक्तिश्च, सर्वसत्त्वहितावहः ।
स्याद्वादपादपाम्भोमुक्, शुद्धमार्गप्रकाशकः ॥१४॥
क्षेमकृद् देवदेवेशः, स्वयम्बुद्धो गिरांपतिः ।
स्वयंभूर्भुवि विख्यातो, भावारिकरिकेसरी ॥१५॥
विभिन्नाज्ञानसम्भारो, भव्यानां भयनाशनः ।
सितध्यानो गतापायो, गतारम्भः समाधिभाक् ॥१६॥
एकोऽनेकः शिवो जन्म-जरामृत्युविवर्जितः ।
अग्रणीः सर्वदेवेषु, सान्द्रानन्दविभाजनम् ॥१७॥
निर्विकारोऽकषायश्च, सर्वगः सर्वसौख्यदः ।
विश्वेशो जगतीदीपः, प्रमादपरिवर्जितः ॥१८॥
गततृष्णश्चिदानन्दा-ऽद्वैतयूषोदधिर्जिनः ।
कैवल्यकमलाभोगी, निष्पङ्कोऽम्भोजपत्रवत् ॥१९॥
एनोमहीध्रदम्भोलिः, प्रातिहार्यान्वितो मुनिः ।
संसारार्त्तिहरः श्रीमान्, सत्तमातिशयर्द्धिकः ॥२०॥
रागद्वेषविनिर्मुक्तो, धीरो निर्जितमन्मथः ।
निर्भयो निर्मदोऽविघ्नः, प्रधानः परमेष्ठिनाम् ॥२१॥
यो योगिनामपि ध्येयः, पूज्यः सर्वसुरासुरैः ।
यः स्वामी सर्वदेवानां, मार्गदाता महाशयः ॥२२॥
ज्योतीरूपोऽपि शान्तात्मा, नियोक्ता च शुभे पथि ।
निष्कलङ्को जगद्भानु-र्लोकानामुपरि स्थितः ॥२३॥
विश्वदृश्वा महादेवो, वीतेहो भवपारदः ।
देवकोटीश्रितो नाथः, छिन्नसंसारबन्धनः ॥२४॥
पूज्यः सिंहासनासीनः, स्त्रीणां हावैरनिर्जितः ।
वाचंयमो जिनाधीशः, सर्वपापप्रणाशकः ॥२५॥
कुतीर्थिकापराजेय-श्चामरादिविभूषितः ।
हास्यरत्यादयो दुष्टा, दोषा यस्माद् व्ययं ययुः ॥२६॥
यस्य वाणी सुधावृष्टिः, सर्वजन्तूपकारिणी ।
प्रादुष्कृताखिलार्थौघा, भवतापापहारिणी ॥२७॥
वादिनां संशयोद्धर्त्री, आयोजनप्रसारिणी ।
मिथ्यादृष्ट्यपराजेया, सर्वकल्मषभेदिनी ॥२८॥
गताधिव्याधिरासेशो-ऽनेकान्तोदधिचन्द्रमाः ।
योगिनामपि नाऽध्यक्षो, निर्ग्रन्थो निष्परिग्रहः ॥२९॥

जात्याद्यष्टमदातीतः, सप्तभीस्थानवर्जितः ।
पञ्चाक्षमत्तमातङ्ग-दमनाङ्कुशसोदरः ॥३०॥
पञ्चाश्रवव्यपेतात्मा, पञ्चाचारपरायणः ।
दृप्यद्वादिमदोच्छेदी, कल्याणकरसङ्गतिः ॥३१॥
निन्दास्तुती समे यस्या-ऽरातिमित्रे तथा समे ।
समौ कनकपाषाणौ, तीर्थेशो जगदीश्वरः ॥३२॥
महनीयो महादेवः, सदाराध्यः श्रियां पतिः ।
अव्याबाधो भुवो भर्त्ता, मोहस्वापदिवागमः ॥३३॥
अर्हन् यथार्थवक्ता च, मितब्राह्मिः क्षमालयः ।
प्रौढप्रभाववारीशः, सर्वसम्पत्तिमन्दिरम् ॥३४॥
कल्याणकमलावासः, कल्याणप्रतिमद्युतिः ।
कल्याणाय च यो भव्य-जन्तूनां यततेऽनिशम् ॥३५॥
परोपाधिविनिर्मुक्तो, रममाणो निजात्मनि ।
गतसङ्क्लेशसम्भारो-ऽव्ययो व्यापारवर्जितः ॥३६॥
अग्लानिदेशनादान-विधानकुशलः प्रभुः ।
कारुण्यपयसां स्वामी, वीताशेषाक्षकामनः ॥३७॥
संस्थितो हृदयाम्भोजे, दूरस्थोऽपि विपश्चिताम् ।
स्वयंसिद्धः स्वयम्बुद्धो, भव्यात्मपरिपूजितः ॥३८॥
सर्वविद्याप्रवीणोऽयं, कलावान् शान्तिनीरधिः ।
ब्रह्मरूपो महीगोप्ता-ऽनीशिता च महोदयः ॥३९॥
अबाध्यशासनो विज्ञः, पाकशासनसेवितः ।
सम्पन्नसर्वलक्ष्मीको, निर्वाणपुर्यधिष्ठितः ॥४०॥
ज्ञानदर्शनचारित्र-वीर्यानन्त्यो दमीश्वरः ।
मोहान्धतमसादित्यः, सद्धर्माङ्कुरतोयदः ॥४१॥
ब्रह्मा विष्णुर्जगत्पूज्यः, शङ्करो जिननायकः ।
बौद्धसाङ्ख्यादिदुर्वादि-मतोच्छेदनतत्परः ॥४२॥
निहन्ता भवभीतीनां, नास्तिकानामगोचरः ।
यस्य दर्शनतः पापं, ध्वंसं गच्छति दूरतः ॥४३॥
स्वकीयोद्दामभारत्या, जितो येन बृहस्पतिः ।
ध्वस्तदारिद्र्यदौर्भाग्यः, सौभाग्यादिगुणान्वितः ॥४४॥
सिंहव्याघ्रनृपादीना-मुद्दण्डानि भयानि वै ।
अशेषाणि विलीयन्ते, स्मरणाद् यस्य सत्त्वरम् ॥४५॥
विशीर्णाशेषभावारिः, छत्रत्रयविराजितः ।
भामण्डलं स्फुरत्तेजो, विभाति यस्य मस्तके ॥४६॥

सर्वप्राणिषु सङ्काश-दृष्टिः सद्धर्मदेशनः ।
जगदानन्दनोऽनन्तः, कन्दर्पाकम्पितोऽतमाः ॥४७॥
पद्मास्यः पद्मदृग्द्वन्द्वः, पद्मकोमलविग्रहः ।
पद्मपाणिपदः पद्मा-वासः पद्माकरो धियाम् ॥४८॥
शमी देवाधिदेवोऽयं, दम्भालक्षितमानसः ।
दाता मङ्गलकोटीनां, निश्चलः सानुमानिव ॥४९॥
निष्पङ्को यस्य सिद्धान्तो, निष्पङ्कं यस्य वर्त्तनम् ।
पीयूषमधुरब्राह्म्या, येनाऽपावि जगत्त्रयम् ॥५०॥
मोक्षारोहणसोपान-स्त्रिलोकीतिलकोऽतुलः ।
स्फीतप्रेक्षो निराकाङ्क्षो, धर्ममार्गप्रदीपकः ॥५१॥
त्रिदशनायकमस्तकशेखरै-रभिनतः कृतकामपराजयः ।
निखिलसंशयभेदनपाटवो, दलितदुर्गतिरर्त्तिविनाशकः ॥५२॥
कुमतिशासनपादपकुञ्जरो-ऽभिमतपूरणनिर्जरपादपः ।
विशदकेवलदर्पणलोकिता-खिलपदार्थगणो गुणभूषितः ॥५३॥
भविकपङ्कजबालदिवाकरो, जिनपतिर्हतसर्वतमोव्रजः ।
विपुलकीर्तियुतो जगदीश्वरो, गतमदोऽखिललोकसमर्चितः ॥५४॥
विशदबोधविधानपरायणः, प्रशममञ्जुलयूषमहोदधिः ।
सकलदुर्जयकल्मषसंहरो, भुवनकुन्दविकाशनचन्द्रमाः ॥५५॥
करणचञ्चलघोटकरोधकः, प्रमितभाषणभूषणभूषितः ।
कुशलपादपपल्लवनाम्बुदो, विगतजन्मजरामरणादिकः ॥५६॥
भवसमुद्रतरिर्विगतस्पृहः, स्वबलनिर्जितमोहमहीश्वरः ।
अनघतीर्थपतिः सुकलागृहं, कपटकुम्भविपाटनमुद्गरः ॥५७॥
अतुलशर्मविधानसुकौशलो, दमितसर्वविरोधिजनोत्करः ।
जनितजन्तुमहोपकृतिः सदा, त्रिदशकोटिसमर्चितविग्रहः ॥५८॥
नयगृहं शुभधर्मविबोधकः, शरणदो भवभीतनृणां दमी ।
विषयितोपरतो विरतो भवाद्, विततभावुकवारिधिरीश्वरः ॥५९॥
अतिशयाद्भुतभूषणसंयुतो, विलसितो वचनाग्र्यगुणैर्विभुः ।
कलुषशातनशासनसङ्गतिः, सितयशा हितदो महसांनिधिः ॥६०॥
दलितसर्वकुवादिमदोऽगदो, महिममन्दिरमीहितदायकः ।
सकलदोषविनिर्गमनोद्भवा-ऽक्षयपदो जिनमौलिशिरोमणिः ॥६१॥
कठिनकर्मकलापविभञ्जनः, स भुवि विश्रुतशुभ्रयशा जिनः ।
अखिलविद् वरबोधिविधायक-श्चरमतीर्थपतिर्जयतात् सदा ॥६२॥
जय जिनेन्द्र! सदाऽन्तिमतीर्थप!, त्रिदशवन्दित! भव्यतराकृते! ।
त्वमघघातक! पावितविष्टपा-ऽमरनरासुरबर्हिपयोधर! ॥६३॥

नमोऽस्त्वन्तिमदेवाय, विश्वचिन्ताविनाशिने ।
अर्हते कृतकृत्याय, प्रत्यूहौघनिवारिणे ॥६४॥
सिद्धार्थान्वयदीपाय, श्रीवाणीगुणशालिने ।
नमः श्रीवर्द्धमानाय, सूत्राममहितांह्रये ॥६५॥
श्रीमते जितकामाय, सर्वसम्पत्तिसद्मने ।
तस्मै नमोऽस्तु वीराय, द्विधाधर्मोपदेशिने ॥६६॥
नमोऽस्तु वीरदेवाय, सर्वसिद्धिप्रदायिने ।
आधिव्याधिविघाताय, संसारभयभेदिने ॥६७॥
स्याद्वाददेशिने नित्यं, सिद्धाय शान्तिसिन्धवे ।
तस्मै विलीनमोहाय, श्रीवीराय नमो नमः ॥६८॥
यदि भवाब्धिसमुत्तरणस्पृहा, यदि जनुःसफलीकरणीयता ।
त्रिविधतापनिराकरणक्षमं, जिनपदं सततं भजतां तदा ॥६९॥
एतत् स्तोत्रं सदा ध्येयं, भव्यैः सर्वहितावहम् ।
शाकिनीडाकिनीघोर-भयध्वंसक्षमं सताम् ॥७०॥
पठतां श्रीमतां पाणा-वेतत् स्तोत्रं सदैव च ।
जिनानुयायिनां सिद्धि-पद्माऽऽयास्यति शाश्वता ॥७१॥

## ॥ १०. श्रीपरमात्मपञ्चविंशिका ॥

अप्रच्युतोऽनन्तपदार्थदर्शी, प्रत्यूहपातङ्गविघातदीपः ।
सद्धर्मसम्प्रीणितसर्वलोको, देवः स एको भवताद् गतिर्मे ॥१॥
श्रेयस्करो विश्वविकाशसूर्यो, विमुक्तदोषोऽस्खलितप्रभावः ।
विज्ञातविश्वाणुपदार्थसार्थो, देवः स एको भवताद् गतिर्मे ॥२॥
दुर्वादिवृन्दानिहतप्रभावः, संसारनिःसारणचातुरीकः ।
कारुण्यपाथोनिधिरिन्द्रवन्द्यो, देवः स एको भवताद् गमिर्मे ॥३॥
क्रोधो न मानो न भयं न लोभः, स्पर्शो न रूपं कपटं न यस्य ।
सम्प्राप्तसंशुद्धपरात्मरूपो, देवः स एको भवताद् गतिर्मे ॥४॥
सिद्धो गताऽज्ञानदशा यदीया, भूयो भवे संसरणं न यस्य ।
कामादिकष्टं न कदापि यस्य, देवः स एको भवताद् गतिर्मे ॥५॥
द्वेषो न मोहो नहि यस्य दम्भो, विशुद्धकीर्त्तिर्विहितोपकारः ।
निःशेषसत्त्वेषु दयां दधानो, देवः स एको भवताद् गतिर्मे ॥६॥
देवाधिदेवो नतशक्रमालो, जन्तूपकाराय कृतप्रयत्नः ।
सौभाग्यगेहं विगतप्रमादो, देवः स एको भवताद् गतिर्मे ॥७॥
सत्प्रातिहार्यातिशयर्द्धियुक्तः, सिद्धः शमी धर्मविबोधदक्षः ।
दोषस्य लेशैरपि ना।ऽनुविद्धो, देवः स एको भवताद् गतिर्मे ॥८॥
शत्रुर्न मित्रं नहि कोऽपि यस्य, ध्वस्ताखिलैनःप्रसरोऽस्ततन्द्रः ।
भव्याब्जवृन्दप्रतिबोधनार्को, देवः स एको भवताद् गतिर्मे ॥९॥
रोगो न शोको न च कामपीडा, हास्यं न लास्यं न कदाऽप्युदास्यम् ।
निन्दाप्रशंसे न कदाऽपि शंस्ये, देवः स एको भवताद् गतिर्मे ॥१०॥
श्लाघ्यस्वरूपो भुवनप्रदीपो, नित्यं दयालुर्निखिलार्थदर्शी ।
निःशेषवेधोमुखदेवमुख्यो, देवः स एको भवताद् गतिर्मे ॥११॥
व्याधिर्न चा।ऽऽधिर्न च कोऽप्युपाधिः, पुण्यं न पापं न च सौख्यदुःखे ।
आत्मन्यजस्रं सुनिमग्नचेता, देवः स एको भवताद् गतिर्मे ॥१२॥

सद्ध्यानपीयूषसुतृप्तितात्मा, सिद्धः प्रसिद्धः परितः समृद्धः ।
सन्त्यक्तनिःशेषपदार्थमूर्च्छो, देवः स एको भवताद् गतिर्मे ॥१३॥
मोक्षो न बन्धो न मदानुबन्धो, विध्वस्तदुर्वादिमनोवितर्कः ।
शान्ताखिलाक्षः प्रशमाम्बुनाथो, देवः स एको भवताद् गतिर्मे ॥१४॥
विश्वत्रयख्यातविशुद्धकीर्त्ति-र्नाऽघप्रवेशो न गदाभिवेशः ।
कल्याणवासो विपदां निहन्ता, देवः स एको भवताद् गतिर्मे ॥१५॥
यस्याऽस्ति नैवाऽऽत्मनि रागभागो, ज्योतिःस्वरूपः परमात्मरूपः ।
दुर्जेयविघ्नौघसमूलघाती, देवः स एको भवताद् गतिर्मे ॥१६॥
भव्यालिसंसेवितपादपद्मो, वीताभिलाषो दमितेन्द्रियाश्वः ।
विज्ञो महौजा विधुसन्निभास्यो, देवः स एको भवताद् गतिर्मे ॥१७॥
भवे च मुक्तौ कनके च लोष्ठे, शत्रौ च मित्रे नृपतौ च रङ्के ।
सधर्मबुद्धिस्त्रिदशेशमान्यो, देवः स एको भवताद् गतिर्मे ॥१८॥
गतस्पृहः शीर्णसमस्तकर्मा, सम्यक्त्वदायीहितकल्पवृक्षः ।
तीर्णः परांस्तारयितुं समर्थो, देवः स एको भवताद् गतिर्मे ॥१९॥
योगीन्द्रगम्यो हि लसद्गुणौघो, मूर्च्छन्ममत्वो ज्वलितावबोधः ।
शैलेशधीरो विषयेष्वरक्तो, देवः स एको भवताद् गतिर्मे ॥२०॥
सन्तोषयन्नर्थिजनानशेषा-नतुल्यमाधुर्यकिरा गिरा वै ।
शरत्सुधांशूज्ज्वलकीर्तिमालो, देव स एको भवताद् गतिर्मे ॥२१॥
विश्वत्रयीसर्वमनुष्यनेत्र-चकोरजैवातृककल्पमूर्तिः ।
क्षेमङ्करः क्षोणिपतिः क्षमौको, देवः स एको भवताद् गतिर्मे ॥२२॥
नृणां नये योजितचित्तवृत्ति-र्दारिद्र्यदौर्भाग्यविघातहेतुः ।
सौभाग्यसम्पत्तिविधानदक्षो, देवः स एको भवताद् गतिर्मे ॥२३॥
मिथ्यात्वजम्बालनिमग्नजन्तु-निष्कासनाऽऽलम्बितपाणियुग्मः ।
आनन्दपीयूषरसाभिमग्नो, देवः स एको भवताद् गतिर्मे ॥२४॥
पुण्यद्रुसंवर्द्धनमेघधारः, सन्त्रासितानेककुवादिवर्गः ।
स्फीत**प्रतापो** मृदुपाणिपादो, देवः स एको भवताद् गतिर्मे ॥२५॥

## ॥ ११. श्रीशान्तिनाथ-चैत्यवन्दनम् ( प्राकृतम् ) ॥

सिद्धं पबुद्धजगसव्वपयत्थसत्थं, देवासुरिन्दनरनाहमयूरमेहं ।
दुव्वाइसल्लहणणं जगभाणुकप्पं, तेलुक्कसन्तिजणणं पणमामि सन्तिं ॥१॥
इत्थिप्पसङ्गरहियं सयलत्थमुक्कं, देविन्दसेवियपयं परमिड्ढिमुक्खं ।
नीसेसमङ्गलघरं मियलच्छसोहं, तेलुक्कसन्तिजणणं पणमामि सन्तिं ॥२॥
संसारतावपरिपीडियसन्तिनीरं, कोहाइदुट्ठरिवुचक्कविणासचक्कं ।
धीरं महिन्दमहियं करुणासमुद्दं, तेलुक्कसन्तिजणणं पणमामि सन्तिं ॥३॥
निव्वाणदाणनिउणं गयसव्वदोसं, पोतत्तजच्चवरहेमसरीरकन्तिं ।
दालिद्दनिब्भरविणासगमत्तमुक्खं, तेलुक्कसन्तिजणणं पणमामि सन्तिं ॥४॥
धम्मत्थिणं सुहकरं कयकिच्चमीसं, नीसेसदुक्खहरणं पुरिसाण मुक्खं ।
सन्तिन्दियं मयणमाणविणासमेगं, तेलुक्कसन्तिजणणं पणमामि सन्तिं ॥५॥

## ॥ श्रीस्तम्भनपार्श्व-चैत्यवन्दनम् ( प्राकृतम् ) ॥

देविन्दसेढिपरिपूइयपायजुग्गं, दुव्वज्झबज्झसमयं घणकम्ममुक्कं ।
अक्खीणकेवलविलोकियसव्वभावं, पासं णमामि सइ थंभणपट्टणत्थं ॥१॥
सद्धम्मकप्पतरुवड्ढणवारिवाहं, तेलुक्कजन्तुगणवंछियपारिजायं ।
एकन्तसन्तपयसंठियमिद्धरूवं, पासं णमामि सइ थंभणपट्टणत्थं ॥२॥
निज्जामगं जिणवरं जगसत्थवाहं, सप्पाडिहेरकलियं कयधम्मबोहं ।
तेलुक्कमाणवविबोहविहाणदक्खं, पासं णमामि सइ थंभणपट्टणत्थं ॥३॥
नागिन्दलच्छसमलङ्कियपायपोम्मं, वाराणसीपसियकित्तिभरं जिणेसं ।
संसारसायरतरण्डममच्चपुज्जं, पासं णमामि सइ थंभणपट्टणत्थं ॥४॥
विद्धत्थविग्घनिगरं गुणवारिणाहं, सव्वोवसग्गरहियं गयसव्वकामं ।
कम्मट्ठपायवविणासणकुंजरिन्दं, पासं णमामि सइ थंभणपट्टणत्थं ॥५॥

## ॥ १२. परमगुरुवृद्धिचन्द्र(वृद्धिविजय)-द्वात्रिंशिका ॥

पायं पायं जिनपतिवचो जातसम्यक्त्ववृद्धि-र्ग्राहं ग्राहं गुणिजनगुणं मोदमानो नितान्तम् ।
बोधं बोधं सजलभविकान् श्लोकसङ्क्रान्तविश्वो, दद्यादिष्टं शुभमतिरसौ **वृद्धिचन्द्रो** महात्मा ॥१॥
दामं दामं सकलकरणं नित्यकृत्यैकनिष्ठो, ज्ञायं ज्ञायं भवविलसितं संयमं यः प्रपेदे ।
धारं धारं श्रमणपदवीं सर्वसम्पत्तिमाप, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥२॥
स्थायं स्थायं सदुदितपथे भव्यबोधं प्रचक्रे, जायं जायं मदनसुभटं सत्तपस्याप्रलीनः ।
क्षोभं क्षोभं विबुधसमितिं प्राप्तकीर्तिप्रचारो, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥३॥
स्नायं स्नायं प्रवचनजले धौतकालुष्यपङ्को, दायं दायं सदभिलषितं स्वर्द्रुतुल्योऽभवद् यः ।
दर्शं दर्शं युगमितमहीं दत्तपादप्रचारो, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥४॥
त्याजं त्याजं निखिलविषयांल्लब्धसिद्धान्तसारः, तापं तापं सुविविधतपस्त्यक्तनिःशेषवाञ्छः ।
गायं गायं जिनगुणगणं ध्वस्तरागादिवर्गो, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥५॥
कारं कारं सकलसुकृतं प्राप्तसौभाग्यलक्ष्मी-र्ज्ञापं ज्ञापं सकलसमयं पूज्यभावं प्रपन्नः ।
छेदं छेदं कलुषफलदान् प्रोप्तसद्धर्मबीजो, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥६॥
नाशं नाशं सकलविपदाः सर्वशर्मप्रदाता, मोचं मोचं विषयममतां निर्मलध्याननिष्ठः ।
हायं हायं कुगतिजननीं दुष्टमायां विशुद्धो, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥७॥
धावं धावं भविजनमनःपापपङ्कं कृतार्थो, गाहं गाहं समयजलधिं जातरत्नत्रयाप्तिः ।
पालं पालं प्रवरमुनितां प्राप यो नाकलोकं, दद्यादिष्टं शुभमतिरसौ वृद्धिचन्द्रो महात्मा ॥८॥
आपत्त्रासनकर्मठो मुनिपतिर्जाड्यापहारक्षमो, यस्यांऽघ्र्यम्बुजयामले विजयते सौभाग्यलक्ष्मीः सदा ।
गाम्भीर्यादिर्गुणैः सदा विलसितो मोहेभपञ्चाननः, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥९॥
कान्त्या येन जितः प्रचण्डकिरणः शान्त्या तथा चन्द्रमाः, संवेगादिगुणान्वितो विपुलधीः सम्यक्त्वविस्फूर्जितः ।
शास्त्राम्भोनिधिराप्तमौलिमहितः क्रोधादिशत्रूज्झितः, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥१०॥
भव्यात्मभ्रमरा भ्रमन्ति नितरां यत्पादपद्मद्वये, सूयन्ते मनसोऽभिलाषविषया यत्सेवया प्राणिनाम् ।
लोके यस्य बुधा मुदा गुणगणान् गायन्ति नित्यं प्रगे, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥११॥
क्रोधाद्यारिविघातकोऽपि सदयः सौभाग्यलक्ष्मीधरः, सम्यग्बोधिकरोऽविचिन्त्यमहिमा विश्वोपकारोद्यतः ।
भव्यानामभिवाञ्छितार्थपटलत्यागोर्ध्वलोकद्रुमः, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥१२॥

जन्तूनां कुनयावटे प्रपततां सद्देशनायाः क्षणे, निर्यद्भिर्दशनांशुभिर्निकरमाकृष्याऽनयत् सत्पथम् ।
विद्वन्मस्तकशेखरः श्रुतवतां संपूज्यतामास्रवान्, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥१३॥
पीयूषप्रतिमं नु यस्य वचनं मेघध्वनिस्पर्द्धनं, सर्वज्ञोक्तपथानुकूलमनघं जागीयमानं बुधैः ।
अक्षोभ्यं परवादिभिर्विजयते लोकत्रये सर्वदा, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥१४॥
ज्ञानां मानसचारुमानससरोहंसायमानोऽवनौ, यद्भाषा प्रमिताक्षरा भविमनोऽत्यन्तप्रमोदावहा ।
येनोद्दामतपःसमाधिवशतः श्रोतोबलं निर्जितं, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥१५॥
निष्णातोऽखिलविघ्नभित् सकरुणो निर्ग्रन्थचूडामणि-र्विस्फूर्जद्यतिसप्तविंशतिगुणालङ्कारसम्भूषितः ।
चारित्रं मलशोधनं निरतिचारं पालयन् सर्वदा, संसारार्तिहरः स वृद्धिविजयो जीयान्मुनीनां पतिः ॥१६॥
यदीयसौजन्ययशोवलक्षतां, निरीक्ष्य चन्द्रोऽसिततामुपैति हि ।
गुरुः कलानां निलयो दयोदधिः, स वृद्धिचन्द्रो मतिमांस्तनोतु शम् ॥१७॥
सदाऽपारं धीरं गुणगणनिधिं दीप्रमहसं, क्षमागारं गीरञ्जितसकललोकं यतिपतिम् ।
गतारम्भासक्तिं प्रकृतिसरलं शान्तवदनं, स्तुवेऽतुल्यज्ञानं प्रतिदिनमहं वृद्धिविजयम् ॥१८॥
सदा शान्तात्मानं परमतपसं ख्यातयशसं, लसज्ज्ञानध्यानज्वलदनलदग्धाहिततृणम् ।
भवज्वालाजिह्वार्दितनिखिलसत्त्वौघशरणं, स्तुवेऽतुल्यज्ञानं प्रतिदिनमहं वृद्धिविजयम् ॥१९॥
निरीहं निर्मोहं प्रशमजलधिं निर्गतमदं, सदा चार्वाचारं विदलितकुमत्यागममदम् ।
अनाथानां नाथं भवभयहरं पूज्यचरितं, स्तुवेऽतुल्यज्ञानं प्रतिदिनमहं वृद्धिविजयम् ॥२०॥
कृपाम्भोधिं भव्याभिमतफलदं शुद्धचरितं, मुनिं न्यायाम्भोधिं विजितमदनं नीतिनिलयम् ।
विशुद्धान्तर्वृत्तिं विदितमहिमानं शुभमतिं, स्तुवेऽतुल्यज्ञानं प्रतिदिनमहं वृद्धिविजयम् ॥२१॥
सदा मोहास्पृष्टं गतसकलकष्टं जयकरं, विनष्टापद्ध्यानं वरकनककान्तिं गुरुवरम् ।
भवस्फूर्जन्मायारहितमनसं शुभ्रयशसं, स्तुवेऽतुल्यज्ञानं प्रतिदिनमहं वृद्धिविजयम् ॥२२॥
देशं देशमटन् हिताय भविनां सद्धर्मवारांनिधि-र्जीवातुर्भविकात्मनाममलधीर्निष्णातसार्थाग्रणीः ।
संप्रोल्लासितजन्तुजातहृदयः श्रीवृद्धिचन्द्रो मुनि-र्धन्यो न्यायविशारदो विजयते त्रैलोक्यसौख्यप्रदः ॥२३॥
पुण्याः स्वस्तिगृहा गुणादरकराः सद्बुद्धिवृद्धिप्रदा, नानाशास्त्रविशारदाः कृतिनता विश्वप्रतिष्ठां गताः ।
दुर्वादीभकदम्बभीषणविधौ सक्रोधकण्ठीरवा, नन्दन्ति प्रतिभान्विताः प्रतिदिनं श्रीवृद्धिचन्द्राह्वयाः ॥२४॥
ख्यातः ख्यातसुधर्ममर्ममहिमा पुण्याङ्कुरक्षीरदो, वाग्ज्योत्स्नापरिनन्दितत्रिभुवनस्त्रैलोक्यचूडामणिः ।
ईर्यादिप्रवराष्टमातृवहने धूर्धारिणामग्रणी-र्मेदिन्यां जयतात् प्रमाणवचनः श्रीवृद्धिचन्द्रो गुरुः ॥२५॥
लोकोद्धारधुरन्धरं विधुतसच्चेतोमलं निर्मलं, धीमन्तं करुणापरं गुणनिधिं निःशेषविद्यानिधिम् ।
अज्ञानान्धकृतिप्रणाशतरणिं विध्वस्तदोषोदयं, वन्दे तं मदमोहलोभरहितं श्रीवृद्धिवाचंयमम् ॥२६॥
विस्मेरपाथोरुहबन्धुरास्यः, प्रोल्लासयन् भव्यमनो नितान्तम् ।
सद्गुप्तिगुप्तो विगतप्रमादः, श्रीवृद्धिचन्द्रोऽवतु रम्यधामा ॥२७॥
गभस्तिवत् तामसवृन्दभेत्ता, सौभाग्यलक्ष्मीपरिभूषितात्मा ।
शास्त्रेषु सर्वेषु च लब्धपारः, श्रीवृद्धिचन्द्रस्तनुतान्मुदं वः ॥२८॥
निःसीममङ्गलतपोनिधिमक्षरोधं, वीतस्पृहं विजितमोहमहीन्द्रदर्पम् ।
भद्रङ्करं वृजिनशैलपविं पवित्रं, संस्तौमि वृद्धिविजयं विजयं विमोहम् ॥२९॥

गुणैर्गरिष्ठं प्रतिभापटिष्ठं, जाड्यार्णवालोडनहेमशैलम् ।
सङ्ख्यावता चर्चितपादरेणुं, तं संश्रयेऽहं गुरुवृद्धिचन्द्रम् ॥३०॥
असमशमपयोधिर्विश्वभव्याब्जभास्वान्, जिनपतिपदपद्मे चञ्चरीकायमाणः ।
अगणितगुणगेहं लब्धनाकीयलक्ष्मी-र्वितरतु मम सौख्यं वृद्धिचन्द्रो मुनीन्द्रः ॥३१॥
संपन्मन्दिरमांह्रियुग्मनखरश्रेणीमयूखैस्तमो, ध्वंसन्तं हितमङ्गिनां प्रणयिनं निष्पङ्कचेतोऽम्बुजम् ।
तृष्णावर्जितमानसं शुभमतिं कारुण्यरत्नाकरं, तं श्रीवृद्धिगुरुं भजन्तु नितरां भव्यास्त्रिसन्ध्यं मुदा ॥३२॥

## ॥ १३. श्रीविजयनेमिसूरि-षोडशकम् ॥

पूज्यो विचक्षणशिरोमुकुटायमानो-ऽव्याजो गरिष्ठगुणरत्नपयोधिनाथः ।
श्रीमान् विशुद्धतरशान्तिरसैकलीनः, सोऽयं गुरुर्विजयते भुवि **नेमिसूरिः** ॥१॥
चारित्रमुज्ज्वलतमं शिवदं यदीयं, धाम्ना सना दिनकृतः प्रतिमां बिभर्त्ति ।
योऽनेककोविदकुलेष्वहतप्रभावः, सोऽयं गुरुर्विजयते भुवि नेमिसूरिः ॥२॥
वाचंयमः सकलतन्त्रविचारदक्षो, बुद्ध्या हसन् सुरगुरुं करुणामितद्रुः ।
ध्वस्ताखिलारिततिराप्तकिरीटनम्यः, सोऽयं गुरुर्विजयते भुवि नेमिसूरिः ॥३॥
धीमान् नमन्मनुजकल्पितकल्पवृक्षो, वक्त्रप्रभाविजितशारदसोमशोभः ।
भव्यान् ददाति करुणाकलितं च धर्मं, सोऽयं गुरुर्विजयते भुवि नेमिसूरिः ॥४॥
प्रज्ञापतिः प्रविहितोग्रतपःप्रभाव-निर्धूतकेशवसुतो महसां निधानः ।
वाणीविलासविहितप्रथितप्रबोधः, सोऽयं गुरुर्विजयते भुवि नेमिसूरिः ॥५॥
श्लोकांशुशुक्लीकृतसर्वलोकः, शुद्धाशयो बुद्धिधनो महात्मा ।
धाम्ना विनिर्धूतकुवादितान्तिः, श्रीनेमिसूरिर्जयताद् गुरुर्नः ॥६॥
दूरीकृतांहा दलितप्रमीलो, गतस्पृहः सूरिशिरोललाम ।
क्षेमङ्करो न्यक्षकलापयोधिः, श्रीनेमिसूरिर्जयताद् १गुरुर्नः ॥७॥
रत्नत्रयालङ्कृतिभूरिशोभो, भिन्दञ्जनानामहितानि नित्यम् ।
कन्दर्प्पदृप्यद्द्विपराजसिंहः, श्रीनेमिसूरिर्जयताद् गुरुर्नः ॥८॥
प्रफुल्लपङ्केरुहनेत्रयुग्मो, शिष्योपशिष्यैः श्रितपादपीठः ।
कल्याणपद्माघनकेलिसद्म, श्रीनेमिसूरिर्जयताद् गुरुर्नः ॥९॥
निर्मूलितानेककुवादिमानः, क्षान्त्यालयः शीलपवित्रिताङ्गः ।
पारं प्रयातः समयार्णवस्य, श्रीनेमिसूरिर्जयताद् गुरुर्नः ॥१०॥
विकचपङ्कजमञ्जुललोचनं, भविककामितवस्तुविधायिनम् ।
सकलजन्तुमहोदयकारणं, निखिलजन्तुमनोमलशोधनम् ॥११॥
सुकृतिवन्दितपादसरोरुहं, मनुजमोहमहातिमिरारुणम् ।
रुचिरहेमरुचं गतकिल्बिषं, सुचरितं सदयं स्फुरितप्रभम् ॥१२॥

दुरितसन्ततिपादपकुञ्जरं, स्वमतिवैभवबोधितविष्टपम् ।
असमशान्तिरसैकपयोनिधिं, यतिपतिं गुणरत्नजलेश्वरम् ॥१३॥
प्रचलदिन्द्रियदुर्जयवासना-विजयिनं तपसा मुदिरध्वनिम् ।
सकलमङ्गलशाखिपयोधरं, भवभृतामहितौघविनाशकम् ॥१४॥
निखिलदोषविवर्जितविग्रहं, कमनकुञ्जरनाशमृगेश्वरम् ।
सुकृतिनं वरसूरिपदाङ्कितं, भजत नेमिमबोधतमोरविम् ॥
॥ पञ्चभिः कुलकम् ॥१५॥
श्रीमन्नुग्रतपोनिधे ! कविकुलस्फूर्जच्छिरोलङ्कृते !,
षट्त्रिंशत्प्रमितैर्गुणैर्विलसितानल्पप्रमोदाऽऽवह ! ।
त्वद्वक्त्रेक्षणतोऽखिलं भवशतोपात्तं ममांहः शमं,
सूरे ! गच्छति वर्षणाज्जलमुचो दावाश्रयाशो यथा ॥१६॥

## ॥ १४. श्रीविजयनेमिसूरि-अष्टकम् (प्राकृतम्) ॥

सन्तो सीलधरो महव्वयधरो सुक्खंगरो पाणिणं, जस्साऽऽणं विबुहा वहन्ति सगला सीयुत्तमङ्गे सया ।
पुज्जो सग्गुणमण्डिओ जगगुरू थुच्चो बुहेहिं मुणी, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥१॥

पुण्णाणं जलही कलेसरहिओ कोहाइदोसुज्झिओ, दुक्खाणं भवियाण णासकुसलो विज्जाघणेहिं जुओ ।
निण्हाओ भयवं पणट्ठभयगो सत्तत्तसंबोहगो, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥२॥

सन्देहद्दिवियारणासणिसमो सिद्धन्तपारङ्गमो, गुत्तो गुत्तिभरेण जो य समिईहिं भूसिओ सुद्धधी ।
जेणुद्दण्डकुवाइदप्पदलणे रत्तिंदिवुज्झम्मइ, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥३॥

धम्मम्भोनिहिवड्ढणेगभवई भावारिविद्धंसगो, णिच्चं जस्स चरित्तमत्थि अणघं कामाइदोसुज्झिअं ।
निप्फावोऽमयणो भवग्गिसलिलं दन्तो प्पहावागरो, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥४॥

संजोगा रहिओ विमुक्कसगलोवाही गुणाणं घरं, निम्माओ सुहकारगं दरिसणं जस्सऽत्थि लोगे सया ।
वक्खाणब्भुअसत्तितोसियजगासेसासुमन्तो कई, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥५॥

भव्वम्भोजभगो पमायरहिओ कल्लाणहेऊ पहू, पक्खीणट्ठमदोऽविगारनयणो संसारसंतारगो ।
मिच्छादंसणखण्डगो जिणमयाऽऽसंवड्ढगो निम्ममो, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥६॥

आइच्चप्पडिमो तमप्पदलणे धीरो सहावेण जो, बज्झऽब्भन्तरदिप्पसत्तवजुओ कारुण्णणीरम्बुही ।
भारण्डुव्वऽपमायगो बुहणुओ तेलुक्कभद्दंगरो, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥७॥

णिक्कामो जयणाजुओ मुणिवरो भव्वाण संपालगो, णिस्सल्लो मणुजोवदेसकुसलो सन्नाणपाहोणिही ।
णिग्गन्थो समयम्बुही जिणमये दक्खोऽविपक्खो गणी, अम्हाणाऽभिमयं पदेउ समणो सो णेमिसूरीसरो ॥८॥

ഊ✦ഢ

## ॥ १५. श्रीनेमिसूरि-अष्टकम् (समसंस्कृतप्राकृतम्) ॥

संसारसंसारणमारमारं, धीरं सुबोधं नवमेघनादं ।
विलीनमोहं विमदं विलोभं, नमामि **नेमिं** नयनीरनाथं ॥१॥

सारङ्गसाराननमङ्कहीनं, संसारसन्तापनिरासनीरं ।
लोके दयालुं सुविनेयजातं, नमामि नेमिं नयनीरनाथं ॥२॥

सनाऽपतन्द्रं भयजातभेदं, संसारसेतुं समयाभिबुद्धं ।
भावारिघातं समताम्बुनाथं, नमामि नेमिं नयनीरनाथं ॥३॥

संबोधिबीजं गलिताभिमानं, संसारभीरुं करुणानिवासं ।
सज्जन्तुसंकामितपारिजातं, नमामि नेमिं नयनीरनाथं ॥४॥

संवेगसारांबुविलीनचित्तं, वाचंयमं भूरिविभूतिहेतुम् ।
संबोधसंपावितलोकचित्तं, नमामि नेमिं नयनीरनाथं ॥५॥

वीरं सुधीरं सुगुणाभिरामं, वीताखिलोपाधिममायमारम् ।
संसातहेतुं जितवादिमानं, नमामि नेमिं नयनीरनाथं ॥६॥

आचारपूतं रमणीयरूपं, निस्सारसंसारविचारकारं ।
निस्सङ्गमेकं विनिपातपातं, नमामि नेमिं नयनीरनाथं ॥७॥

उद्दामधामावलिभासमानं, सन्देहसन्दोहसमूलसूदं ।
निस्सीमसूमं समसाधुसारं, नमामि नेमिं नयनीरनाथं ॥८॥

## ॥ १६. दण्डकवृत्तेन गुरुस्तुतिः ॥

त्रिभुवनजनमानसाम्भोजलीलाविधौ हंसकल्पं समूलव्यपास्ताखिलद्वेषिवर्गं क्षमागारमानन्दपीयूषयूषोदधिं विश्वविख्यातकीर्तिं हताशेषदोषं प्रमादार्णवालोडनस्वर्णधात्रीभृदंह्रिद्वयं शान्तमुद्राङ्कितं रम्यकायं गतापायमौदार्य-सौभाग्यसंपत्तिगेहं कृपाम्भोनिधिं ज्ञानसिन्धुं प्रणम्राखिलच्छेकलोकोत्करं सद्गुणाम्भोनिधिं न्यक्कृतानङ्गतुङ्गोद्ध-तैरावणात्यन्तशक्तिं तपस्यानिरुद्धास्थिराक्षप्रबन्धं नयाम्भोनिधिम् ।

चरणकरणधारिणं निर्ममं पापवन्ध्यं सदाचारयुक्तं विकारव्यपेतं सुधर्मोत्तमक्ष्मारुहोल्लासनैकाम्बुवाहं स्थिरस्वान्तमाप्ताभिवन्द्यं मुनीन्द्रं सुसिद्धान्तपाथोधिपारङ्गमं शारदाम्भोधिजास्यं सदासेव्यपादं प्रबोधप्रदं प्रौढतेजस्विनं सत्प्रभावाकरं भव्यचेतश्चकोरैणचिह्नायमानं निशानाथशान्तं गतप्राणिवैरं निरीहं वचोनीरनिर्धूतनिःशेषभव्यो-च्चलान्तर्मलम् ॥

परममहिममन्दिरं शुद्धचारित्रयुक्तं कलानां गृहं सर्वसंपत्करं विश्वबन्धुं निरङ्कं गताकं विमानं शुभध्यानयुक्तं विलीनाखिलारातिसन्दोहमन्यूनपुण्यं सदा देशनारञ्जितानेकलोकं कुकर्माद्रिनिर्भेददम्भोलिकल्पं पवित्राशयं विश्वजाड्यापहारं शुभैकास्पदं ब्रह्मचर्योत्तमालङ्कृतिभ्राजितं सर्वविद्याप्रवीणं गतोपाधिवृन्दं जितान्तःसपत्नं सरोजाक्षयुग्मं महोधाम सन्तोषभाजं जगच्चिन्तितार्थानिमेषद्रुमम् ।

रसपशुपतिनेत्र(३६)संख्यामितेद्धैर्गुणैर्भूषिताङ्गं विपत्त्यौघविध्वंसकं पञ्चधाऽऽचारसंपालकं शुद्धशीलं मृषावादशून्यं कुवाद्युत्कटेभोत्करध्वंसने पञ्चवक्त्रं सतां कारितश्रीजिनेन्द्रोक्तसद्धर्मपीयूषपानं हतानेकसन्देहजालं शुभप्राणिनां षण्मताभिज्ञमंहोहरं धैर्यगाम्भीर्ययुक्तं कृतिप्राञ्चितं सर्ववाचंयमेशं प्रतापान्वितं दीप्तिमन्तं पयोनाथगम्भीरवाचं मुदा नौमि निर्ग्रन्थचूडामणिं **नेमिसूरीश्वरं** सर्वदा ॥

## ॥ १७. प्रशस्तिः ॥

यस्य प्रौढतरप्रतापतरणिर्मोहान्धकारापहा, सङ्क्रान्तो भुवनत्रयेऽघरहितो नित्योदयो राजते ।
दूरं याति कुतीर्थिकौशिकगणो यस्योद्गमे सर्वदा, जीयात् सोऽन्तिमतीर्थकृत् त्रिभुवनालङ्कारचूडामणिः ॥१॥
श्रियैधमानमर्हन्तं, पञ्चेषुक्षतिशङ्करम् ।
सिद्धं परिष्टुतं देवै-र्वन्देऽपश्चिमदैवतम् ॥२॥
क्षीरान्नेनैकपात्रान्निजसदतिशयात् तापसान् भोजयित्वा, येन स्वष्टापदाद्रावनघमभिददे केवलं दक्षिणायाम् ।
लब्ध्वा सारं त्रिपद्याश्चरमजिनपतेर्द्वादशाङ्गीं प्रचक्रे, कल्याणानां निवासो भवतु भवतुदे **सेन्द्रभूति**र्मुनीन्द्रः ॥३॥
यत्तेजसा महामोह-ध्वान्तस्तोमो विलीयते ।
तस्मै चिदेकरूपाय, गौतमाय नमोनमः ॥४॥
शान्तात्मा भुवनारविन्दसविता जातः **सुधर्मा** प्रभु-र्हन्ताऽशेषकुवादिमत्तकरिणां श्रीवीरपट्टे शुभे ।
श्री**जम्बू**र्भगवान् बभूव तदनु स्फारप्रभूतद्युतिः, श्रीजैनेश्वरतीर्थधर्मजलधिप्रोल्लासशीतद्युतिः ॥५॥
लोकानवद्यनिखिलागमतत्त्ववेत्ता-ऽगर्वो गरिष्ठगुणरत्नकबन्धभर्त्ता ।
जैनेन्द्रशासननभस्तलतिग्मभानुः, संवर्द्धमानमहिमाऽवतु **नेमिसूरिः** ॥६॥
भवदवानलतापपयोधरो, निखिलनास्तिकगर्वविनाशकः ।
सकलतन्त्रचणो नयभूषितो, विजयतां गुरुनेमिमुनीश्वरः ॥७॥
मनोवचःकायसुयोगधर्त्ता, जाग्रत्**प्रतापो** वसुधेशवन्द्यः ।
वीतस्पृहः सोऽत्र तनोतु शर्म, सूरीशिता श्रीगुरुनेमिनामा ॥८॥
जातं चेन्मतिमान्द्यतः क्वचिदपि श्रीजैनशास्त्रक्रमा-दुत्सूत्रं यदि वा प्रयोगघटनाऽशुद्धा प्रजाता खलु ।
मिथ्या दुष्कृतमस्तु मे तदखिलं शुद्धाशया भावत-स्तत् सर्वं करुणापराः सहृदयाः संशोधयन्तूचितम् ॥९॥
गच्छतः स्खलनं क्वापि, भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र, समादधति सज्जनाः ॥१०॥
विक्रमार्कनृपस्याऽब्दे, मुनिषण्णवभूमिते (१९६७) ।
वैशाखस्य सिते पक्षे, पूर्त्तिमाप्नोदियं कृतिः ॥११॥

॥ इति समाप्तोऽयं ग्रन्थः
आचार्यवर्यश्रीमद्गुरुविजयनेमिसूरीश्वरप्रसादतः ॥
॥ इति शम् ॥

# स्तोत्रभानुः

◆

श्रीविजयनन्दनसूरिः

# अनुक्रमः

| | | पृष्ठम् |
|---|---|---|
| १. | मङ्गलाचरणम् | १२१ |
| २. | चतुर्विंशतिजिनचैत्यवन्दनानि | १२२ |
| ३. | पञ्चजिनस्तुतयः | १२९ |
| ४. | चतुर्विंशतिजिनस्तवः | १३१ |
| ५. | विजयनेमिसूरि-पञ्चविंशिका | १३३ |
| ६. | भुवनदीपकस्तोत्रम् (विजयनेमिसूरि-द्वात्रिंशिका) | १३५ |
| ७. | गुर्वष्टकम् | १३७ |
| ८. | प्रशस्तिः | १३८ |

## ॥ १. मङ्गलाचरणम् ॥

तीर्थाद्यमीशममरेन्द्रनरेन्द्रनम्यं, भव्यात्मनां परुषपापतमःपतङ्गम् ।
ऐक्ष्वाक**माद्यमधिपं** जिनसङ्घचन्द्र-मानन्त्यकेवलपतिं सततं नमामि ॥१॥ (वसन्ततिलका)
स्याद्वादवारिधिविधुर्नरदेववन्द्यः, सारङ्गलक्षणधरो भविपुष्करार्कः ।
मुक्त्यङ्गनासुखरतो जिन**शान्ति**नाथो, भव्यश्रिये भवतु पापवनीकृशानुः ॥२॥
कृत्वा तपोनिचयमाशु मुदाऽऽप्तमुक्तिं, तं कर्मपङ्कजहिमं शमवारिराशिम् ।
शुद्धप्रबोधजलधिं यदुवंशकेतुं, वन्दे **समुद्रविजयाङ्गज**माप्तवर्यम् ॥३॥
ज्ञानश्रियं भवसरित्पतिपोतमग्र्यं, तं मोहकुञ्जरहरिं जगदीश्वरेन्दुम् ।
धैर्येण मेरुसदृशं भृशमाश्वसेनिं, **वामाङ्गजात**मुरगाङ्कमहं स्तवीमि ॥४॥
क्षीराब्धिवारिकलशैर्मरुदङ्गनौघैः, सुस्नापितं भवगदागदमर्कभासम् ।
जन्मप्रवाहचितकर्मबलारिवीरं, नित्यं जगज्जनविभुं प्रणमामि **वीरम्** ॥५॥

◆

नानाकर्मरजोऽनिलं प्रकटितस्याद्वादशास्त्रामृतं, सेव्यश्रीजगदीशवीरममरव्यूहाभिनम्यं सदा ।
प्राप्तज्ञानदिवाकरं सुखकरं मुक्तिप्रियाया वरं, नित्यं नौमि मुनीश्वरं गणधरं श्री**गौतम**स्वामिनम् ॥६॥
(शार्दूलविक्रीडितम्)
सन्मान्यं सुखदायिनं ततयशोदीर्घापगं भूतल, इष्टार्थामरशाखिनं व्रतसरश्चक्राङ्गमिन्द्वर्चिषम् ।
शिष्यव्यूहसुसेवितं मदरिपोर्जेतारमानन्ददं, वन्देऽहं मुनिराज**वृद्धिविजयं** शान्तामृताब्धिं सदा ॥७॥

◆

गुणव्राताावासं कुमुदपतिभासं व्रतिवरं, तरीतारं भावं भवजलधिनावं सुखकरम् ।
सदा श्रीसङ्घेन्दीवरदिनकरं सन्नतमहं, स्तुवे श्रीसूरीशं मुनिभशशिनं **नेमिविजयम्** ॥८॥ (शिखरिणी)

◆

श्रीवीरशासनदिवाकरनेमिसूरि-पट्टोदयाद्रिकमलप्रिययोगिनाथम् ।
सिद्धान्तविज्ञमहमाप्तमुनित्वरत्न-मासन्नमुक्ति**मुदयं** प्रणमामि नित्यम् ॥९॥ (वसन्ततिलका)

# ॥ २. श्रीचतुर्विंशतिजिनचैत्यवन्दनानि ॥

## ॥ श्रीआदिनाथ-चैत्यवन्दनम् ॥

यद्ध्यानेन नरा निरन्तरसुखं मोक्षं लभन्तेऽचिरं, यन्नामस्मरणेन सर्वदुरितं याति प्रदूरं द्रुतम् ।
यन्मूर्त्तेरभिदर्शनेन नयने शान्ताऽमृतं प्राप्नुतो, भव्यानामभयाय सोऽस्तु सततं नाभेय **आदीश्वरः** ॥१॥
(शार्दूलविक्रीडितम्)
कृत्वा योऽखिलकर्मगाढजलदं दूरं तपोवायुना, प्राप्य ज्ञानरविं ददर्श सकलं लोकस्वरूपं भृशम् ।
गत्वाऽष्टापदमाप्तबन्धुरपदो नष्टाखिलापत्तिक, ऐक्ष्वाको वृषलक्षणो विजयतामादिप्रभुस्सर्वदा ॥२॥
प्रापुः पारमपारजन्मजलधेर्यद्धर्मसन्नौकया, प्राप्स्यन्ति प्रमुदाऽऽप्नुवन्ति भविनोऽनेके विशुद्धं वरम् ।
विश्वेशानमहं जिनेन्दुमनिशं शान्त्यालयं सुन्दरं, दिव्या**नन्दन**दीपतिं यतिपतिं तं मारुदेवं स्तुवे ॥३॥

◆

## ॥ श्रीअजितनाथ-चैत्यवन्दनम् ॥

जगतीभविनामघपद्महिमं, दृढमोहमहागजकेसरिणम् ।
**अजितं** सततं जिनचन्द्रमहं, प्रणमामि विभुं नृसुरप्रणतम् ॥१॥ (तोटकम्)
भवकर्मखलानभिजित्य बला-दसमाचलमाप पदं रुचिरम् ।
स विभुः प्रवरोऽभयरोपकरो, मतिदो वरदोऽस्तु सदोदयदः ॥२॥
जगतां प्रभुतां भवितारकतां, भविता लविता भववल्लिवनम् ।
सुतपश्चरिता शिवमातनुतां, जितशत्रुसु**नन्दन** आप्तवरः ॥३॥

◆

## ॥ श्रीसम्भवनाथ-चैत्यवन्दनम् ॥

प्रगाढपारमानेता, दुस्तरस्य भवोदधेः ।
कामितानि प्रदत्ते य-द्धर्मः कल्पतरूपमः ॥१॥ (अनुष्टुप्)
चारुपोतं भवाम्भोधौ, विश्वनाथं तमीश्वरम् ।
यस्य वागमृतं पीत्वा-ऽक्षयं यान्ति पदं जनाः ॥२॥

श्रुताम्भोजसरोवर्यं, सत्सङ्घातविधुं विभुम् ।
सर्वदा **सम्भवं** भक्त्या, जितारे**र्नन्दनं** स्तुवे ॥३॥ (त्रिभिर्विशेषकम्)

◆

## ॥ श्रीअभिनन्दनस्वामि-चैत्यवन्दनम् ॥

सुरासुरेज्यं रुचिरं सुखालयं, हरन्तमीशं प्रचुरं महाभयम् ।
हिरण्यदीप्तिं प्रवरप्रबोधिनं, नमामि तुर्यं जिनराजमिष्टदम् ॥१॥ (वंशस्थवृत्तम्)
सुराङ्गनाभिर्वरकाञ्चनैर्घटैः, पूर्णैर्महाक्षीरसमुद्रवारिभिः ।
कृताभिषेकामलकाञ्चनाचले, जिनप्रभो ! त्वं जय संवराङ्गज ! ॥२॥
येनाऽखिलं गाढमहातमो हतं, दुष्कर्मरूपं रविनेव संसृतेः ।
जिगाय यो दुष्टमनोजभासुरं, स्ताच्छर्मदाताऽऽशु स वो**ऽभिनन्दनः** ॥३॥

◆

## ॥ श्रीसुमतिनाथ-चैत्यवन्दनम् ॥

वरद इन्दुरुची रुचिरार्णवः, श्रुतमतेरभिरूपसुसेवितः ।
प्रहतकर्ममहाजगलः प्रभु-र्विजयतां सततं स जगद्विभुः ॥१॥ (द्रुतविलम्बितम्)
हतमहाखिलमोहतमस्ततिं, सकलसौख्यदमाप्तवरास्पदम् ।
सुखसरोवरहंसमहं स्तुवे, सुमतिधाम सदा **सुमति**प्रभुम् ॥२॥
सकलसंसृतिदुःखमहोत्पलं, हिम इवाऽभिददाह य इष्टदः ।
निरुपमः प्रशमाब्धिरसौ विभु-र्जयति मेघसु**नन्दन** ईश्वरः ॥३॥

◆

## ॥ श्रीपद्मप्रभनाथ-चैत्यवन्दनम् ॥

रागद्वेषारण्यमाशु प्रघोरं, दाह्यं दग्धं यत्प्रभासाग्निनेव ।
भव्यौघानां तत् सुसीमात्मजस्य, भूत्यै भूयात् पादपाथोजयुग्मम् ॥१॥ (शालिनी)
दुष्टाज्ञानद्वेषिसङ्घातशूर !, सुज्ञश्रेष्ठ ! प्राज्ञगम्य ! प्रधान ! ।
दिव्यज्ञान ! श्रीपते ! पद्मनाथ !, मुक्तीशानाऽभ्यर्चनीयोऽसि मे त्वम् ॥२॥
देवाधीशं सर्वकल्याणवल्लिं, विश्वख्यातं पूजनीयं नृदेवैः ।
**पद्मं** पद्मं विश्वभव्यद्विरेफे, नित्यं वन्दे **नन्दनं** श्रीधरस्य ॥३॥

◆

## ॥ श्रीसुपार्श्वनाथ-चैत्यवन्दनम् ॥

सदा निर्जरेज्यो वरो विश्वनाथो, गुणानां पयोधिर्जिनेशोऽमिताभः ।
पृथिव्यात्मजस्सर्वसौख्यप्रदाता, प्रभुर्यच्छतान्मुक्तिऋद्धिं विशालाम् ॥१॥ (भुजङ्गप्रयातम्)

महामोहराजारिवारं कठोरं, मदोन्मत्तमातङ्गयूथं विशालम् ।
पराजिग्य आर्यो महाकेसरीव, स सुश्रेयसे सर्वदा स्तात् **सुपार्श्वः** ॥२॥
शुभध्यानवारा भवावद्यरूपं, मलं येन दूरं प्रगाढं कृतं द्राक् ।
दयाया नदीकान्तमाखण्डलेज्यं, प्रतिष्ठस्य राज्ञः स्तुवे **नन्दनं** तम् ॥३॥

◆

## ॥ श्रीचन्द्रप्रभस्वामि-चैत्यवन्दनम् ॥

कृत्वा दूरं सहसा, रागद्वेषाम्बुदं महागहनम् ।
यद्विज्ञानदिनेशः, सततं भासयति कृत्स्नार्थान् ॥१॥ (आर्या)
सर्वज्ञेन्दुर्जिनप-श्चन्द्राङ्काङ्कितपदद्वितय ईशः ।
जन्माम्भोधिं तीर्त्वा, सुखगेहं वरपदं प्राप ॥२॥
दिव्यैश्वर्यो जयतु, ज्ञेशो धर्मदवरः सुहितदाता ।
**चन्द्रेश**स्स नितान्तं, परमा**नन्दन**गपर्जन्यः ॥३॥

◆

## ॥ श्रीसुविधिनाथ-चैत्यवन्दनम् ॥

सुपर्वनाथानतमस्तकस्थ-प्रशस्तमौलिस्थमहामणीनाम् ।
मरीचिसङ्घातमरं न सेहे, यत्पादयुग्मस्थनखव्रजश्रीः ॥१॥ (उपजातिः)
यन्नामदीपो हृदयस्थितोऽर-मनादिकालागतमप्रधृष्यम् ।
तमो विनाशं नयति प्रसह्य, तस्येष्टदातुः **सुविधे**र्जिनस्य ॥२॥
शिवाङ्घ्रिपारामघनोपमा सा, संसारसिन्धौ भ्रमतां जनानाम् ।
स्याद्वादयुक्ता वरदेशनागी-रा**नन्दन**द्यस्तु सदोदयाय ॥३॥ (त्रिभिर्विशेषकम्)

◆

## ॥ श्रीशीतलनाथ-चैत्यवन्दनम् ॥

निर्बाधमुक्तिसुखमग्नतरं जिनेन्द्रं, निःशेषसत्ततिनतं निरुपद्रवौघम् ।
प्राप्तप्रबोधतरणिं स्मरवारिवाहं, भित्त्वा स्तुवे तमनिशं जिन**शीतलेशम्** ॥१॥ (वसन्ततिलका)
तुभ्यं नमोः निखिलतत्त्वदिवाकराय, तुभ्यं नमः प्रहरते जनजन्मरोगम् ।
तुभ्यं नमः सुरपतिप्रणताय नित्यं, तुभ्यं नमोऽखिलभवौघविनाशनाय ॥२॥
निर्दोष! शोषक! प्ररोषजलाशयस्य, नित्यं प्रतोषद! सुधर्मवरप्रणेतः! ।
त्वां नाथ! ते रुचिरपादसरोजयुग्म, आसक्त**नन्दन**मधुव्रत आस्तुवेऽहम् ॥३॥

◆

## ॥ श्रीश्रेयांसनाथ-चैत्यवन्दनम् ॥

शुद्धधर्मस्य दातारं, पातारं जगतां सदा ।
सर्वभावस्य वेत्तारं, भातारं भुवनत्रये ॥१॥ (अनुष्टुप्)

मुक्तिमार्गस्य देष्टारं, पेष्टारं कृत्स्नकर्मणः ।
विश्वविश्वस्य भर्तारं, कर्तारं भव्यशर्मणः ॥२॥
नेतारं जन्मपारस्य, जेतारं मोहवैरिणः ।
श्रीश्रेयांसजिनं भक्त्या, स्तुवे तं विष्णु**नन्दनम्** ॥३॥ (त्रिभिर्विशेषकम्)

◆

## ॥ श्रीवासुपूज्यस्वामि-चैत्यवन्दनम् ॥

शुद्धविज्ञानलक्ष्मीव्रजैर्वन्दितः, शर्मदो विष्टपेशामरेशानतः ।
कर्मसङ्घातशूरस्य सङ्घातको, **वासुपूज्य**स्तनोतु प्रसौख्यं सदा ॥१॥ (स्रग्विणी)
सम्यगाखण्डलौघस्तुतार्कोदय-ज्योतिरङ्घ्र्यब्जयुग्मस्य शर्मोदधेः ।
वासुपूज्यप्रभोर्नामचिन्तामणिः, स्मर्यतां सर्वदा सर्वभव्यात्मभिः ॥२॥
पूर्णचन्द्रास्यमर्च्यं प्रशस्तोदयं, केतकीपत्रदृष्टिद्वयं मुक्तिदम् ।
अष्टसत्प्रातिहार्यप्रदीप्तं विभुं, तं जया**नन्दनं** नौमि नन्दोदधिम् ॥३॥

◆

## ॥ श्रीविमलनाथ-चैत्यवन्दनम् ॥

भवभीमभयौघपर्वतं, शमवज्रेण बिभेद वेगतः ।
प्रकठोरतरेण भास्वता, भविकल्याणनगे घनाघनः ॥१॥ (वैतालीयम्)
निखिलाघमहादृढाटवीं, विमलध्यानहुताशनव्रजः ।
प्रददाह सदाऽस्तु यस्य स, **विमले**शस्तनिता शिवस्य नः ॥२॥ (युग्मम्)
शिवधाम ! सुराधिपैर्नुत !, त्वमनीशार्च्य ! जिनाप्तचन्द्रमः ! ।
कृतपुष्पशराहितक्षय !, जय नित्यं सुतवर्म**नन्दन** ! ॥३॥

◆

## ॥ श्रीअनन्तनाथ-चैत्यवन्दनम् ॥

जात्यसर्वगुणवारिधिं वरं, भव्यधाम विगतस्पृहं सदा ।
प्राप्तजन्मविरहं चतुर्दशं, स्तौम्य**नन्त**जिनपं मुहुर्मुहुः ॥१॥ (रथोद्धता)
रागरोषपरुषान्धकारक !, त्वं प्रगच्छ बहुदूरमाशु रे ! ।
अत्र मे सुहृदयोदयाचले-ऽनन्तनाथतरणिः प्रकाशते ॥२॥
सिंहसेनतनयः सुरस्तुतः, श्रेयसे त्रिभुवनेश्वरः सदा ।
अस्त्वनन्तगुणरत्नवारिधि-र्भव्यदेहिसुख**नन्दनः** प्रभुः ॥३॥

◆

## ॥ श्रीधर्मनाथ-चैत्यवन्दनम् ॥

भुवनजलजोद्द्योतब्रध्नं तपोधनधारिणं, भुवनभविनां पीडावारापहं जगदीश्वरम् ।
प्रवहणवरं संसाराब्धौ महागहने विभुं, शमसुखपदं भानोः सूनुं स्तवीमि सदा मुदा ॥१॥ (हरिणी)

अनुपमगुणो भव्यौघानामनादिभवापह:, समकलशरच्चन्द्रोद्भासाननोऽसमसौख्यद: ।
परमविमलं सिद्धिस्थानं सुशोभयिता विभु-र्भवतु हितकृद् भव्यव्राते स आप्त उदारधी: ॥२॥
शमसलिलतश्शान्तोद्दामोरुकामहुताशन:, सुरपतिनताङ्घ्य्रब्जद्वन्द्वस्सदाप्तवरो विभु: ।
सकलजनताभद्रङ्कारी त्रिविष्टपनायको, जयतु सततं **धर्मे**शानो जगज्जन**नन्दन:** ॥३॥

◆

## ॥ श्रीशान्तिनाथ-चैत्यवन्दनम् ॥

चन्द्रद्युत्युज्ज्वलशुचितरक्षीरसिन्धुं विशालं, तृन्दञ्छान्तिप्रवरजलधि: सौख्यरत्नप्रपूर्ण: ।
भीष्मज्वालं प्रभवशिखिनं यस्य शीघ्रं ददाम, शश्वज्जीयाज्जिनवरवर: सोऽधिप: **शान्ति**नाथ: ॥१॥
(मन्दाक्रान्ता)

इष्टाब्जार्णस्त्रिदशविटपी नेह दृष्टस्तथापि, देवद्रुर्यद्वचनसलिलाद् वर्द्धितो धर्मरूप: ।
चित्ताभीष्टं शुभमतिमतां भव्यनॄणां प्रदत्ते, पादद्वन्द्वं शरणमसमं तस्य शान्तेर्ममाऽस्तु ॥२॥
गाढं बद्धान् विषयजलजेऽनेकभव्यात्मभृङ्गान्, मुक्तान् कृत्वा विमलदययाऽस्थापयत् सिद्धिपद्मे ।
तारेशास्यो विदितसकलालोकलोकस्वरूप:, शीघ्रं भव्यप्रशिवतनिता सोऽचिरा**नन्दनो**ऽस्तु ॥३॥

◆

## ॥ श्रीकुन्थुनाथ-चैत्यवन्दनम् ॥

भूतसंसृतिपयोधिपारक !, प्राप्तकेवलविभासितांशुमन् ! ।
सूरनन्दन ! शिवप्रदैधि मे, त्वं जिनैव शरणं वरं सदा ॥१॥ (रथोद्धता)
विश्ववन्द्य ! सुखमन्दिरेश्वर !, रञ्जिताखिलजनौघ ! केवलिन् ! ।
जन्मवार्ध्यवधिमेतुमाशु न:, शुद्धधर्मवरपोतदेशक ! ॥२॥
शोभमान ! भुवनत्रये सदा, सुप्रतापजलधे ! सुधीप्रद ! ।
**कुन्थु**नाथ ! जगदीश्वर ! प्रभो !, त्वां स्तुवे भविकवृन्द**नन्दन** ! ॥३॥ (युग्मम्)

◆

## ॥ श्रीअरनाथ-चैत्यवन्दनम् ॥

अनन्तसौख्यास्पदसिद्धिगन्ता, नष्टाभिलाष: प्रगताभिमान: ।
धर्मोपदेष्टा वृजिनौघपेष्टा, कामारिदाता जनकामदाता ॥१॥ (इन्द्रवज्रा)
आनन्दकल्लोलभृताम्बुराशि-र्हंसायमान: कृतिवारपद्मे ।
तीर्थङ्करो विश्वविभासमानो, नित्यं शिवायाऽ**स्त्वर**नाथ एक: ॥२॥ युग्मम् ॥
विश्वत्रयव्याप्तवरप्रतापं, येनाऽऽश्रवाप्तं भुवनेश्वरत्वम् ।
प्राज्यप्रभावं च जिना**ऽर**नाथं, स्तौम्यन्वहं तं मुनि**नन्दनो**ऽहम् ॥३॥

◆

## ॥ श्रीमल्लिनाथ-चैत्यवन्दनम् ॥

सद्धर्मेशं ज्योतीरूपं शुद्धाचारं लोकेशं, शश्वत् कृत्स्ने विश्वे व्याप्तं देवेन्द्रैर्नित्यं नम्यम् ।
संसारापत्तापार्त्तानां भव्यौघानां त्रातारं, कामाग्न्यम्भो **मल्ली**शानं सिद्धिस्थानस्थं स्तौमि ॥१॥
(कामक्रीडा)

प्रज्ञावन्तं शान्त्यागारं शीतांश्वास्यं देवेन्द्रं, संसाराब्धौ मर्त्यौघानां बाढं पारं नेतारम् ।
अर्हन्नाथं गीर्भर्तारं विश्वाम्भोजे मार्तण्डं, कारुण्याब्धिं मल्लीशं तं नित्यं भक्त्या सेवेऽहम् ॥२॥
वीताघाभ्रः सर्वोत्कृष्टो दुस्तीर्थौघाप्रत्यक्षो, येन प्राप्तो ज्ञानार्को द्राग् लोकालोकोद्भासी सः ।
सौभाग्यश्रीः कल्याणायाऽस्त्वाशु प्रज्ञो भव्यानां, **नन्दा**वासो दग्धद्वेषो लोकाग्रस्थो मल्लीशः ॥३॥

◆

## ॥ श्रीमुनिसुव्रतस्वामि-चैत्यवन्दनम् ॥

मुक्तिकासारचक्राङ्गो, विश्वेशो **मुनिसुव्रतः** ।
रक्षतु प्राणिनो भव्यान्, संसारामयपीडितान् ॥१॥ (अनुष्टुप्)
तपोऽनिलस्य वेगेन, दूरं मोहघनाघनम् ।
कृत्वा यः प्राप विज्ञान-सप्तवाहं विभासिनम् ॥२॥
यद्वचोऽम्बु मलं हन्ति, कर्मग्रामं च देहिनाम् ।
कच्छपाङ्कं जनव्राता-**नन्दनं** स्तौमि तं सदा ॥३॥ युग्मम् ॥

◆

## ॥ श्रीनमिनाथ-चैत्यवन्दनम् ॥

अचिन्त्यरूपं समविश्वसारं, जितेन्द्रियारिं वरशान्त्यगारम् ।
सुखद्रुमारामपयोदवारं, तमाप्तसंसारपयोधिपारम् ॥१॥ (उपेन्द्रवज्रा)
श्रुताम्बुजाम्बूपममीतमोहं, प्रमादशत्रुप्रविनाशवीरम् ।
सुराधिदेवं विगताभिलाषं, नमामि नित्यं विजयाङ्गजातम् ॥२॥ युग्मम् ॥
प्रभासमानो भुवनत्रयेषु, प्रभासमानः सुरनाथनाथः ।
तनोतु सौख्यं भविनो **नमीशः, सनन्दनः** सर्वजनाभिवन्द्यः ॥३॥

◆

## ॥ श्रीनेमिनाथ-चैत्यवन्दनम् ॥

सकलसुखनिदानं विज्ञवारप्रधानं, कृतवृजिनविनाशं वीतसंसारपाशम् ।
विधुसममुखभासं मोक्षलक्ष्मीनिवासं, त्रिभुवनजननाथं स्तौम्यहं **नेमि**नाथम् ॥१॥ (मालिनी)
शुचितरपदपद्मोत्कृष्टकल्याणसद्म !, गिरिवरगिरिनारोद्भासिबिम्बांशुमालिन् ! ।
भविकदुरितपङ्कक्षालनाम्बूपम ! त्वं, कृतमदनजयैधि श्रेयसे नेमिनाथ ! ॥२॥
सुरनरनुतपादाऽऽफुल्लिताम्भोजयुग्मं, सिततरयदुवंशाम्भोधिशीतांशुमन्तम् ।
भुवनतिलकमीशं शङ्खचिह्नं जिनेन्द्रं, जिनपदजलमीनो **नन्दनो**ऽहं भजामि ॥३॥

◆

## ॥ श्रीपार्श्वनाथ-चैत्यवन्दनम् ॥

समा दृष्टिर्यस्याऽसुरसुरनरेशे च कमठे, गतस्तूर्णं पारं भवजलनिधेर्गाढगहनम् ।
अपारे संसारे विषयपरिषत्पीडितजनान्, स नाथः श्री**पार्श्वो** जिनवरपती रक्षतु सदा ॥१॥ (शिखरिणी)

दयाया अम्भोधिः शुचितरमनीषानिचयदः, प्रसूतो वामाङ्गाद् दलितदुरितः संयमिवरः ।
विराजँल्लोकाग्रे सुखपदकजे हंस इव स, विभुः पार्श्वेशानः कृतिभततिचन्द्रो विजयताम् ॥२॥
महाजन्माम्भोधिप्रवहणवरं दोषभरदं, त्रिलोक्यम्भोजप्रोल्लसनतरणिं भव्यवरदम् ।
जितान्तर्दुष्टौघं विततयशसं विश्वभुवने, नमामि श्रीपार्श्वं समजनसुखाऽऽ**नन्दन**महम् ॥३॥

◆

## ॥ श्रीवीरनाथचैत्यवन्दनम् ॥

गत्वा पापापुरीं यः प्रचुरसुखनिधिं वेगतो मुक्तिमाप,
दिव्याचिन्त्यस्वरूपः स्फुटगुणजलधिः कीर्त्तिकान्तिप्रकान्तः ।
तुल्यस्वान्तप्रवृत्तिर्विषमविषधरे सेवके वासवे च,
सश्री**वीर**स्तनोतु प्रहतमदखलः प्राणिनां भूरिभूतिम् ॥१॥ (स्रग्धरा)
सम्यग्देवेन्द्रसेव्यः स्मरवनदहनः कामहः कामदाता,
संसारातङ्कवैद्यः प्रभवभयहरः सिद्धिसौख्यैकभोक्ता ।
प्राप्तप्रौढप्रतापः कृतवृजिनजयो जन्मपङ्काप्रवाहो,
दीप्रज्योतिर्जितार्को जयतु जिनवरो वर्द्धमानः प्रकामम् ॥२॥
**ने**त्रानन्दैककन्द ! स्फुरितविशदधीदातरीशप्रसिद्ध !,
**मि**थ्यादृक्पेचकार्कोपम ! परमशद ! प्रार्च्यपादाब्ज ! वीर ! ।
**सू**तप्रज्ञानसूर्य ! प्रयतपदगत ! प्राज्ञपूज्य ! प्रधान !,
**रि**ष्टाम्भोजार्यमंस्त्वां जिनपदकमलालिः स्तुवे **नन्दनो**ऽहम् ॥३॥

*॥ इति चैत्यवन्दनचतुर्विंशिका ॥*

ॐ✦ॐ

## ॥ ३. पञ्चजिनस्तुतयः ॥

### ॥ श्रीआदिनाथस्तुतिः ॥

ऐक्ष्वाक ! **नाभिज** ! जिताखिलमोहवीर !, तीर्थङ्करादिम ! शमामृतसागरेन्दो ! ।
आद्यासुरामरनराधिपसेव्यमान !, श्रीवीतराग ! वृषभाङ्क ! सदा स्तुवे त्वाम् ॥१॥ (वसन्ततिलका)

जन्मार्णवप्रवरपोतक इष्टदायी, कन्दर्प्पपावकपयोऽचलमुक्तिभर्त्ता ।
मिथ्यात्विघूकभविकोत्पलसप्तसप्ति-र्जीयाज्जिनेन्द्रनिकरः सुरमौलिनम्यः ॥२॥

मोक्षाय लुब्धतरविष्टपदेहिचित्तं, न्याय्यं सदा जिनवराननसुप्रसूतम् ।
जैनागमं सकलदोषतमस्तमोऽरिं, विश्वात्मशर्मजलधीन्दुमहं स्तवीमि ॥३॥

गन्त्री सदा गगनमाप्तमहासुऋद्धिः, श्रीसङ्घविघ्नभरकोकनदे हिमानी ।
तार्क्ष्यासना सुखकरी सदभिप्रणम्या, चक्रेश्वरी जयतु नित्यमपारशक्तिः ॥४॥

◆

### ॥ श्रीशान्तिनाथस्तुतिः ॥

नृत्यद्देवाङ्गनौघैरचलितमनसं कर्मदुष्टारिवीरं, व्याप्तज्ञानार्कभासं सकलजगति तं विश्वभव्यानवन्तम् ।
योग्यक्षेन्दुं जिनेन्द्रं कुशलजलनिधिं विश्वसेनाङ्गजातं, शान्तिव्रातं धरन्तं सुरनृपतिपतिं स्तौम्यहं **शान्ति**नाथम् ॥१॥
(स्रग्धरा)

नित्यं नाभेयमीडेऽजितसुमतिजिनौ सम्भवानन्तमल्लीन्, श्रेयोदं नन्दनं तं ससुविधिविमलं पद्मचन्द्रौ सुपार्श्वम् ।
श्रेयांसं शीतलेशं प्रशमरसनिधिं वासुपूज्यारकुन्थून्, धर्मं शान्तिं च नेमिं जिनमुकुटनमिं सुव्रतं पार्श्ववीरौ ॥२॥

श्रेयोवृन्दं ददाति प्रभवभयभरं हन्ति कामप्रदात्री, हर्षव्रातं प्रदत्ते भवशिखिपतितप्राणधारिव्रजेभ्यः ।
मुक्त्यम्भोजं प्रसूते भविकशिवतरुं सर्वदा सिञ्चते या, साऽर्हद्वाण्यम्बुमाला प्रसरतु सततं गाढपारा त्रिलोक्याम् ॥३॥

या विघ्नौघप्रहन्त्री प्रगुणगणवती हेमदीप्तिं हरन्ती, सेव्यश्रीशान्तिनाथा निखिलजनमवन्त्यर्हदाज्ञां धरन्ती ।
इष्टार्थं पूरयन्ती सकलसुखकरी शर्मवल्लिर्विशाला, सा निर्वाणी प्रदत्तां शुभमतिभविने श्रेष्ठमानन्दवारम् ॥४॥

◆

## ॥ श्रीनेमिनाथस्तुतिः ॥

गत्वा गिरीन्द्रं गिरिनारमाप्त्वा, वरव्रतं देवनरेन्द्रपूज्यम् ।
मुक्तिप्रियां स्नेहभराद् य आप, स नेमिनाथोऽवतु विश्वभव्यान् ॥१॥ (उपजातिः)

ये कर्मसङ्घं जलदं महान्तं, जहुः स्ववीर्यातुलवायुवृन्दैः ।
ते सिद्धिसौधप्रतिभासमानाः, सुरासुरस्तुत्यजिना जयन्ति ॥२॥

प्रदग्धदोषौघविशालदावं, नीतिप्रमाणप्रथितार्थतत्त्वम् ।
मिथ्यान्धकारार्यमणं सदैव, जैनागमं श्रेष्ठमहं स्तवीमि ॥३॥

सम्यक्त्वरत्नं प्रमुदा धरन्ती, त्रिशूलधात्री वरसङ्घपात्री ।
सा कामितौघं परिपूरयन्ती, देव्यम्बिका शर्म सदा प्रदत्ताम् ॥४॥

◆

## ॥ श्रीपार्श्वनाथस्तुतिः ॥

दृढतमतमवारं दुःखभारं हरन्तं, निखिलभविकचेतःपङ्कजं पुष्पयन्तम् ।
जगति तततपोंऽशुं कर्मरात्रेररातिं, भविहृदयखवासं स्तौमि तं **पार्श्व**भानुम् ॥१॥ (मालिनी)

चुलुककृतभवाब्धिं संसृतौ प्रभ्रमन्तं, जननिकरमवन्तं मुक्तिमार्गं दिशन्तम् ।
विदितभुवनभावं भावसिन्धौ सुनावं, जिनवरतरवारं नौमि विश्वैकसारम् ॥२॥

अमितगमनिवासं गूढतत्त्वप्रकाशं, विहतसकलदोषार्हन्मुखाब्जप्रसूतम् ।
गहनतरमपारं भव्यभृङ्गालिसेव्यं, शमरसपरिपूर्णं जैनसिद्धान्तमीडे ॥३॥

कनकसमसुकान्ते ! भव्यभव्यं धरन्ति, वरतरफणिपीठे ! नित्यमभ्रे चरन्ति ! ।
श्रिततमजिनपार्श्वे विघ्नवारं हरन्ति !, अतुलममलभद्रं देहि पद्मावति ! त्वम् ॥४॥

◆

## ॥ श्रीवर्द्धमानजिनस्तुतिः ॥

शच्यः स्नापितवत्य आर्यकलशैर्जन्मोत्सवे यं मुदा, प्राप्तानन्तसुखस्स कम्पिततरादीशानहेमाचलः ।
देवेन्द्रादिसुपूजितोऽन्तिमजिनो **वीरो** विभुस्सर्ववि-न्मोहाम्भोजहिमः प्रबोधकुमुदेन्दुः पातु वः सर्वदा ॥१॥
(शार्दूलविक्रीडितम्)

भव्यस्वान्ततमौघनागहरयस्सर्वज्ञतीर्थङ्करा, विश्वेशाः करुणामृतार्द्रमनसः श्रेयोनदीना जिनाः ।
भातज्ञानदिनेश्वरा वरतरा नित्यं सुमद्रङ्कराः, सर्वे तेऽभिजयन्तु देवमनुजाधीशाभिपूज्याः सदा ॥२॥

मिथ्यात्वक्षितिदारणोत्कटहलिः सत्योत्पलार्कोपमा, मुक्त्यागारसुकुञ्चिका जिनधृता दुर्मोहनिद्राहरा ।
भव्यारामघनावली सुगुणिनी स्याद्वादिनी शाश्वती, जैनी वाग् भविकाघसिन्धुमथनी वोऽस्तु श्रिये सर्वदा ॥३॥

श्रीवीराङ्घ्र्यरविन्दभृङ्गिजनताविघ्नाग्निमेघावलि !, सम्यक्त्वाभरणेन शोभितवरे ! सुश्वेतदन्तावले ! ।
सिद्धादेवि ! सुगोपिके ! जिनवराज्ञायाः सदेष्टार्थदे !, भव्येभ्योऽभयदे ! सदा सुखनिधे ! दत्तान्न इष्टं द्रुतम् ॥४॥

◆

## ॥ ४. श्रीचतुर्विंशतिजिनस्तवः ॥

विज्ञातसर्वात्ममनःस्थभाव-मुक्षाङ्किनं प्राप्तभवाब्धिपारम् ।
हतोपसर्गव्रजमादिनाथं, नमामि **नाभेय**मनन्तवीर्यम् ॥१॥ (उपजातिः)
प्रणीतधर्माणमपेतदोषं, बिन्दूकृतापारभवाम्बुराशिम् ।
व्याप्तप्रतापं भुवनेऽ**जितं** तं, स्तवीमि नित्यं भुवनत्रयेशम् ॥२॥
श्रीजैनधर्माम्बरसप्तवाहं, भव्यात्मनां पापभरं हरन्तम् ।
जितारिजातं जिन**सम्भवे**शं, सदैव मोक्षाधिपतिं स्तुवेऽहम् ॥३॥
मुक्तीश आनन्दसरस्सु हंसः, श्रुतार्णवेन्दुस्सुखदायिनाथः ।
स तीर्थकृद् देवनरेशपूज्यो-ऽ**भिनन्दन**स्ताद् भविनां हिताय ॥४॥
भव्याङ्गिनां नेत्रमयूरमेघ! देवाधिदेवाभिमतेतमोह! ।
भव्योपकारिन्! **सुमते**! यतीन्द्र!, भव श्रिये त्वं **सुमति**प्रवाह! ॥५॥
ययावनन्ताचलमुक्तिवासं, यस्तं महामोहवनीहुताशम् ।
प्रबोधपद्मार्कमधीश**पद्मं**!, सदा नमामि द्युमणीन्दुनम्यम् ॥६॥
आखण्डलासेवितपादयुग्म!, विशुद्धवाग्भृद्! वरमुक्तिवास! ।
कृतान्धविश्वं मदनं विजेत-र्जय प्रभो! नाथ! **सुपार्श्व**! नित्यम् ॥७॥
भव्यारविन्दार्यमणं जिनेन्द्रं, स्ववीर्यवीरेण जितेन्द्रियं तम् ।
मोहानलाम्भोधरमिन्दुभासं, **चन्द्रप्रभं** देवनरेशमीडे ॥८॥
शान्त्यालयं यद्वपुरर्जुनार्चि-स्तिरस्करोतीन्दुमपीन्द्रपूज्यम् ।
सुग्रीवसूनुं **सुविधि**प्रभुं तं, स्तवीम्यहं प्राप्तवरप्रभुत्वम् ॥९॥
आनन्दपद्माकरराजहंसो, लेभे वरं मुक्तिनिकेतनं यः ।
यद्दर्शनान्नश्यति पापतापः, स वः श्रिये शीतल**शीतलो**ऽस्तु ॥१०॥
जनाभिलाषं प्रपिपर्ति यस्तं, सुरासुरेन्द्राश्रितपादपद्मम् ।
श्रेयोनिकायं सुखसागरेन्दुं, **श्रेयांस**नाथं सततं स्तवीमि ॥११॥★

---

★ प्रथमावृत्तौ द्वादशः श्लोको न मुद्रितः - सं. ।

[श्री**वासुपूज्यो** जयतात् स नित्यं, यत्पादपद्माश्रयणेन बाढम् ।
संसारपीडार्दितजन्तुजातः, कैवल्यपद्मां लभते नितान्तम् ॥१२॥]
अघद्रुमोन्मूलनवारणेन्द्रः, संसारकान्तारसुसार्थवाहः ।
भवाब्धिपोतो विमलप्रबोधः, श्रियेऽस्तु नित्यं **विमल**प्रभुः सः ॥१३॥
अपारजन्माम्बुनिधिं प्रतीर्य, यः प्राप मुक्तिं त्रिजगत्प्रसिद्धाम् ।
अनन्तशक्तिं त**मनन्त**नाथं, नित्यं स्तुवेऽनन्तगुणेष्टगेहम् ॥१४॥
मोहारिजेताऽखिलभाववेत्ता, सद्धर्मदाताऽक्षयमुक्तिधाता ।
भव्यान् सुपाता रविवत् सुभाता, श्री**धर्म**भर्ताऽस्तु सुखौघकर्ता ॥१५॥
क्षीराब्धिजेत्रा वरशान्तिवारा, यः सिञ्चति प्राणिसुखाङ्घ्रिपालीम् ।
स शान्तधामा वरशान्तिधाम, श्री**शान्ति**नाथोऽस्तु सदैव शान्त्यै ॥१६॥
तिरस्कृतार्कौजसमीतरागं, श्री**कुन्थु**नाथेश्वरमाप्तमुक्तिम् ।
सुरासुरेन्द्रं व्रतितारकेन्दुं, जितान्तरारिं सततं तमीडे ॥१७॥
विज्ञातनिश्शेषपदार्थभावं, महेन्द्रमालानतमाप्तसिद्धिम् ।
सुदर्शनापत्यसुदर्शनं तं, स्तुवे**ऽर**नाथं जगदेकनाथम् ॥१८॥
शमासिना प्राहतमोहवीरः, सुमुक्तिपूर्वाचलवासरेशः ।
श्रिये स **मल्ली**श्वर इष्टदायी, वल्लिप्रसिद्धोऽभयवल्लिरस्तु ॥१९॥
सुमित्रजातं वरकच्छपाङ्क–मनादिकर्माटविचैत्यचित्यम् ।
तं सुव्रतीन्द्रं **मुनिसुव्रते**शं, नमाम्यहं नष्टककष्टकष्टम् ॥२०॥
मुक्तिं ययौ तीर्थकरो **नमि**र्यो, विहाय संसारविलासवासम् ।
भव्याभयोद्यानसुवर्षवर्षं, तं पूर्णचन्द्राननमानतोऽस्मि ॥२१॥
राजमतीमिन्दुमुखीं विहाय, मुदाऽऽप यो मुक्तिमनोज्ञकान्ताम् ।
गुणाकरं दोषकरीन्द्रसिंहं, श्री**नेमि**नाथं सततं स्तुवेऽहम् ॥२२॥
दिष्टप्रबोधासमहस्तरत्नं, प्राप्तुं भृशं मुक्तिफलं विशालम् ।
तपोऽतुलाभूषणभूषितं तं, सदा जयन्तं प्रभु**पार्श्व**मीडे ॥२३॥
दिवौकईशानकिरीटनम्या, तपोंऽशुमत्तैजसिकाभिभान्ती ।
सुखावलीपद्मजलावली सा, श्रियेऽस्तु **वीरा**ङ्घ्रिनखावली वः ॥२४॥
कृतिवज्रेज्यव्रति**नेमि**सूरि–शिष्याभिरूपो**दयनन्दने**न ।
नता मता मुक्तिरताः स्तुतास्ते, श्रिये भवन्त्वाशु जिनाः सदा वः ॥२५॥

ꕥ✦ꕥ

## ॥ ५. श्रीविजयनेमिसूरि-पञ्चविंशिका ॥

विहाय सर्वं प्रभवोपभोग-मादाय रम्यं शिवदं व्रतित्वम् ।
य आप सर्वागमपारमाशु, श्री**नेमिसूरिं** सततं स्तुवे तम् ॥१॥ (उपजातिः)
विदग्धपद्माकरराजहंसं, विदग्धदोषौघविशालदावम् ।
अखण्डभूव्याप्तवरप्रतापं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥२॥
वितन्द्रिपङ्कं प्रविमुक्तदारं, जगज्जनप्रावृषिकाभ्रवारम् ।
स्वदेशनारञ्जितभव्यभारं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥३॥
समस्तनिक्षेपनयाम्बुनाथं, स्फुरद्विवेकं स्फुटशर्मगेहम् ।
चारुव्रतं त्यक्तविलासवृन्दं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥४॥
उदारबुद्धिं वचनप्रसिद्धि-मासन्नसिद्धिं भुवनप्रसिद्धिम् ।
विज्ञानदीप्तिव्रजसुप्रदीप्तं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥५॥
उद्दामकन्दर्प्पहुताशपाथो-ऽभिरूपसङ्घाभ्रदिनेशमेकम् ।
प्रमादसारङ्गमृगेन्द्रराजं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥६॥
भव्यात्मभृङ्गोरुसमूहसेव्य-पादारविन्दद्वितयं मुनीन्द्रम् ।
सूर्यांशुशोभं सुकलापयोधिं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥७॥
संसारसेतुं जिनधर्मकेतुं, प्रभासमानं प्रतिभासमानम् ।
मुनीश्वरं पौर्णिमचन्द्रवक्त्रं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥८॥
कामारिसम्बोधमहाप्रवीरं, सम्बोधपाथोधिमुदारवृत्तिम् ।
व्यतीतमानं विगताभिलाषं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥९॥
प्रवीणसन्दोहसुधांशुमन्तं, प्रणष्टसन्देहभरं कृतान्ते ।
सत्यस्वरूपाश्रयणप्रगल्भं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥१०॥
भव्याङ्गिनां सर्वसमीहितौघ-प्रसिद्धिपाथोजपयःसमूहम् ।
सुकेतकीपत्रसमाक्षियुग्मं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥११॥
स्वशोभया चन्द्रकलां बिभर्त्ति, यस्तिग्मभारङ्घ्रिनखश्रियं तम् ।
सर्वाङ्गिकारुण्यमहासमुद्रं, श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥१२॥

गताश्रवं पञ्चमहाव्रतेशं, रत्नत्रयस्वामिनमाशयाब्धिम् ।
श्रेयस्करं जन्मपयोधिपोतं, श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१३॥
जिनेशसिद्धान्तविचारदक्षं, तीर्थङ्करादिष्टकरं मुनीशम् ।
कषायसङ्क्षणदाश्ववाहं, श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१४॥
समस्तविश्वे ततसाधुवादं, भक्ते च शत्रौ समभावदृष्टिम् ।
आनन्दभङ्गप्रभृताम्बुराशिं, श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१५॥
विज्ञाम्भोजावासहंसायमानो, विश्वाम्भोजोद्बोधहंसायमानः ।
शर्माम्भोजोद्भेदतोयायमानः, शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१६॥ (शालिनी)
निस्तन्द्रौघो जैनधर्माम्बरार्कः, शीतांशूर्जा मुक्तिमार्गप्रदर्शी ।
प्राज्ञप्राच्यो मुक्तसंसारलीलः, शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१७॥
श्रेयःसिन्धुः स्फारशीलप्रभावो, भास्वद्विद्यः प्रास्तमानप्रयासः ।
आशुप्रज्ञो धैर्यकेणाऽद्रितुल्यः, शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१८॥
गाम्भीर्येणाऽम्भोधितुल्यो मुनीन्द्रः, कारुण्याब्धिः शुद्धधर्मस्य वक्ता ।
स्फारज्ञानो भव्यकल्याणहेतुः, शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१९॥
सत्त्वाधारो योगिनक्षत्रचन्द्रः, शास्त्राब्धीन्दुर्वीतसर्वस्पृहौघः ।
फुल्लाब्जास्यः शुद्धवैराग्यसिन्धुः, शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥२०॥

यस्य प्रौढतमप्रतापतपनः शश्वद् भुवि भ्राजते, यस्याऽङ्घ्र्यम्बुजमातनोति भविनामानन्दभङ्गव्रजम् ।
यस्य ज्ञानमृगेश्वरेण परवादीभाः प्रणष्टा द्रुतं, भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२१॥
(शार्दूलविक्रीडितम्)
यस्याऽभ्रेण समं वचो नयगमस्याद्वादयुक्तं वरं, भव्यप्रावृषिकप्रमोदमतुलं नित्यं विधत्ते भृशम् ।
यस्याऽतुल्यमरं यशः क्षितितले सर्वासु दिक्षूद्गतं, भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२२॥
सेव्यश्रीगुरुराज**वृद्धिविजयः** प्रज्ञाः सदा यं श्रिताः, सम्यग्बोधसरिच्छिलोच्चयवरः स्याद्वादपाथोनिधिः ।
अन्तेवासिमधुव्रतश्रितपदाम्भोजः प्रशस्तक्रियो, भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२३॥
दिव्यक्षेमनिधिर्विशुद्धचरणो वाचंयमेशाग्रणीः, स्फाराः पूर्वयुगप्रधानविधृताः सर्वे गुणा यं श्रिताः ।
स्याद्वादाम्बुनिधिप्रभासनविधुर्भूमीश्वरार्च्यः सदा, भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२४॥
गुर्वादेशधरो महाव्रतिधरो गाम्भीर्यरत्नाकरो, मेधाविप्रवरो हतानृतभरो भव्यात्मभद्रङ्करः ।
गच्छैश्वर्यधरो महाभयहरः फुल्लास्त्रदावाशरो, भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२५॥
यत्स्तोत्रपाठकरणेन महाभयञ्च, याति प्रणाशमखिलाघमरं जनानाम् ।
तन्**नेमिसूरि**चरणाम्बुजयुग्ममर्च्यं, संसेव्यतां भविजनैः सततं पवित्रम् ॥२६॥

## ॥ ६. भुवनदीपकस्तोत्रम् ॥

### ( श्रीमत्परमगुरुविजयनेमिसूरि-द्वात्रिंशिका )

यद्वाक्प्रफुल्लितकजे रतमर्त्यभृङ्गे, सत्योष्णरश्मिकिरणप्रतिभासमाने ।
पूर्वाभिरूपसुवृता द्रुतसिद्धिलक्ष्मी-र्वीतान्तरामनुपमस्थितिमभ्यकार्षीत् ॥१॥ (वसन्ततिलका)
भृङ्गव्रजोत्कटविनोदभरप्रदातुः, संफुल्लितस्य जलजस्य मनोज्ञशोभा ।
संस्मारिता ननु जवेन यदास्यभार्भिः, संस्मारितश्च वरपौर्णिमशीतभास्वान् ॥२॥
विश्वाभिरूपनिचयाभिनतोत्तमाङ्ग-श्रेणीजिनेन्द्रवरशासनमौलिभान्ती ।
स्पर्शेन यस्य विमलस्य पदस्य पूता, स्तोष्यामि तं व्रतिपतिं किल नेमिसूरिम् ॥३॥
(त्रिभिर्विशेषकम्)
ज्ञातुं कृतीज्य! तव किञ्चिदपि स्वरूपं, शक्ता न संयमिपते! जडबुद्धयस्तु ।
जानाति रूपमिभबालतरो व्रतिन्! किं, कण्ठीरवस्य नगभेदकगर्जनस्य ॥४॥
पारं तवाऽमलमते! गुणवृन्दसिन्धो-र्योगीश्वरेण खलु वीतमदेन गम्यम् ।
निर्बुद्धिरेतुमधिपो द्रुफलं कुतोऽहं, प्राप्नोति किं विमतिवामन! उन्नताप्यम् ॥५॥
धीमन्मुने! गतधियं तव भक्तिरेव, स्तोतुं प्रयोजयति मां भवरक्षक! त्वाम् ।
प्रावृष्यतीव सुनटन्ति कलापिनो यत्, तद् गर्ज्जदम्बुदरवश्रवणैकजन्यम् ॥६॥
अल्पाशयेन तव नाथ! मयोच्यमानं, स्तोत्रं धरिष्यति हृदि प्रवराशयोऽपि ।
क्षीराब्धिमौक्तिकमदन्नपि राजहंसः, किञ्जल्कमत्ति किल कर्द्दमजस्य किं नो ॥७॥
आराद् भवान् प्रवरशान्तरसाम्बुराशि-र्नामैव ते तदपि लोकहितं विधत्ते ।
दूरस्थितार्ककिरणैररविन्दबन्धा-न्मुक्ता न किं मधुकराः सकला भवन्ति ॥८॥
त्वय्येव सन्ति निखिला विमला गुणौघा, अत्राऽद्भुतं न किमपि प्रविकस्वरास्य! ।
प्राचीं दिशं नहि विहाय सहस्रभानुः, स्फूर्ज्जत्प्रभाप्रकरकोऽन्यदिशं वृणोति ॥९॥
रूपेण कामसदृशोऽप्यभिभूतकाम-स्थामा त्वमद्भुतशमः समभावदातः! ।
त्वामिष्टदेवविटपिन्! ननु सर्वकामो, दृष्ट्वैव याति सहसा परिपूर्णभावम् ॥१०॥
श्रेणीकृतामलयशो! विबुधप्रवीण!, योग्यर्च्य! शश्वदुदयस्य महाप्रताप! ।
उद्गच्छदब्जभरवल्लभताम्रपादा, पादस्य ते नखततिः सततं विभाति ॥११॥

अन्धीकृताखिलजगन्मदनप्रगाढ-मेघप्रणाशपवमानप्रदर्शने ते ।
नेत्राम्बुजस्य भवतीश! निमेषमन्द-पक्ष्मावलीह नयनद्वितयं जनानाम् ॥१२॥
नैसर्गधैर्यविजितामरशैलवर्गं, स्फारप्रभासमतमीकृतचन्द्रकान्तम् ।
संस्मारकं च शिवतिथ्युडुवल्लभस्य, विस्मापकं तव विभाति गुरो! ललाटम् ॥१३॥
नाथोज्ज्वलाङ्घ्रिगतिपूततरावनीक!, सत्यं मितं च सुहितं सुवचोरसं ते ।
पीत्वाऽमृतं खलु सुदुर्लभपानमाशु, धीजीवनस्नपितभव्यजनास्त्यजन्ति ॥१४॥
नाथ! प्रधीः कुमतिपर्वतभेदिकाया-स्त्वद्देशनारवमृगेश्वरगर्जनायाः ।
अज्ञानवादमदमत्तमहाकुतीर्थ-मातङ्गकास्तु सहसा सकला विनष्टाः ॥१५॥
गम्भीरतारसभृता तव देशनागी-र्मेघावलीध्वनिरिवाऽहिभुजः सुभव्यान् ।
सम्यक् प्रमोदयति सारविचारधारा, प्रौढाशयप्रकटपुण्यगुणप्रकाश! ॥१६॥
संसारकूपपतनार्त्ततरां विमुग्धां, रक्षन्ननन्यगतिकां जनतां मुनीश ।
भारण्डपक्षिवदिलावलयेऽप्रमत्तः, स्वामिन् सदा विचरसि प्रहतस्पृहारे! ॥१७॥
स्याद्वादभासक! सदोदय! शर्मधाम! निर्यामकं गहनसंसृतिवारिराशौ ।
सच्छासनं प्रमितिभङ्गनयोपशोभि, शश्वत् प्रदीपयसि दीप्तविभ! व्रतिंस्त्वम् ॥१८॥
भो! देहभाक्प्रकर! यत्स्फुरितप्रभावा-न्मिथ्यात्वसान्द्रतिमिरं व्रजति प्रणाशम् ।
तन्नामदीप्रकरदीपमजस्रमस्य, सेवस्व सूरिप्रवरस्य सुभक्तिभावात् ॥१९॥
त्वत्तः प्रविज्ञ! हिमसानुमतो मुनीश!, कल्याणफुल्लफलिवृन्दविभूषिताङ्गात् ।
जाता वरा जगति निर्मलकीर्तिगङ्गा, सर्वा दिशोऽकृत कृतिन्! परमाः पवित्राः ॥२०॥
लोकप्रसिद्धतरवर्यकुलावतंस-कोटीश्वरप्रकरपूजितपादपद्म! ।
बुद्धिप्रभावकृतदुष्टमताभिषङ्ग! पूज्यो मुनीश! सततं जगतीतले त्वम् ॥२१॥
वैराग्यवारिनिधिभासनशीतभानो!, संसारतारक! सदाप्तसमूहसेविन्! ।
चारित्रभास्वरवरायुधमात्तमाशु, नाथ! त्वया खलु विमोहरिपुं प्रहन्तुम् ॥२२॥
स्थाने प्रमोदमपरे न जना लभन्ते, कृत्वा मुने! गुणनिधान! सुदर्शनं ते ।
ग्रीष्मे विहाय सुभगां रवितापतप्त-श्छायां सुगन्धिफलिनो दहनं किमिच्छेत् ॥२३॥
सद्बोधदायककिरीट! मुनीश! सम्यग्, धीश्रीमदोघनुतपादपयोजयुग्म! ।
सर्वात्मना विमलशर्मभृता कृपाश्री-र्योगीश! ते हृदि कजे द्युतिते विभाति ॥२४॥
अन्ये स्मरन्त्वपरमप्यहमिज्यबुद्ध्या, त्वामेव नाथ! हृदये विशदे स्मरामि ।
धाराधरं ननु विहाय न नीलकण्ठः, पृथ्वीतलेऽपि निखिले भजतेऽन्यमीश! ॥२५॥
मुद्धाम! धामनलिनीशसम! त्वयीन!, नाऽस्त्येव किञ्चिदपि योगिपते! जडत्वम् ।
स्पष्टप्रकाशितमयूखसमूहसूर्ये, ध्वान्तस्थितिस्तु नहि किञ्चिदपि प्रभाते ॥२६॥
सन्तीह नाथ! बहवः परवादिनोऽपि, त्वं त्वेक एव शिवदोऽनृतवादहीनः ।
भूयिष्ठभानि दिवि सन्ति तथापि शश्व-च्चन्द्रेतरो न वितनोति चकोरहर्षम् ॥२७॥
अन्धीकृताखिलकुतीर्थिकघूकसङ्घ-फुल्लीकृताखिलचतुर्विधसङ्घपद्म! ।
दूरीकृताखिलजगज्जनसङ्घनान्ध!, योगिंस्त्वमत्र तरणे! जयतादभीक्ष्णम् ॥२८॥

वक्त्राद् विनिर्गतगभीरतरस्वनौघ-तुल्यीकृतामृतपयोधितरङ्गनाद ! ।
प्रज्ञाऽधरीकृतसुरेन्द्रगुरो ! महौजः !, श्रेयःश्रियं मुनिप ! नो वितनु त्वमाशु ॥२९॥
मिथ्यात्वपुद्गलधरातलदारणौग्र-सीरायमाण ! जिनदर्शनबीजवप्तः ! ।
मालायमान ! हृदये जिनशारदाया-स्त्वामीश ! सूक्ष्मसुमते ! सततं स्तवीमि ॥३०॥
सद्**बुद्धिवृद्धि**सुलताम्बुद ! **नेमि**सूरे !, स्याद्वादभृत्**सुमति**सिन्धुविधो ! **यशो**ऽरम् ।
त्व**द्दर्शनादुदय**मेति नय**प्रतापं विज्ञानसिद्धि**विजयं जनता सु**ऋद्धिम्** ॥३१॥
**कीर्तिप्रभावकुसुमा**र्चित**पद्म**नेत्र !, वैराग्य**चन्दन**विलेपनलिप्तचित्त ! ।
स्तोत्रं **गुणामृत**भृतं तव **भक्ति**रागा-**ल्लावण्य**धाम ! रचितं च मया **निधानम्** ॥३२॥
आपुष्पदन्तमिदमद्भुतभावशोभि, स्तोत्रं सदा मतिमतां हृदयं प्रभायात् ।
भव्यात्मनां **भुवनदीपक**नाम तेषां, प्रज्ञाभि**नन्दन**वरं हृदि ये धरेयुः ॥३३॥

ꩡ✦ꩢ

## ॥ ७. श्रीमद्गुर्वष्टकम् ॥

विज्ञाय संसारमनित्यमाशु, त्यक्त्वा समस्तं भवदुष्टभोगम् ।
दधार साधुव्रतमिन्द्रपूज्यं, यस्तं सुभक्त्योदयमानतोऽस्मि ॥१॥ (उपजातिः)
अनन्तसौख्यग्रहणे सुयत्नं, दशप्रकारव्रतिधर्मयुक्तम् ।
स्फूर्ज्जत्सुमेधाकिरणप्रभान्तं, गुरुं सुभक्त्योदयमानतोऽस्मि ॥२॥
नयप्रमाणागमधारिमुख्य-माज्ञां गुरूणां सततं धरन्तम् ।
मेधावदोघप्रणतं जयन्तं, गुरुं सुभक्त्योदयमानतोऽस्मि ॥३॥
चारित्रचिन्तामणिरक्षणाय, सदाप्रयासं करुणानिधानम् ।
गुणाकरं संयमिपूगपूज्यं, गुरुं सुभक्त्योदयमानतोऽस्मि ॥४॥
तपःप्रशस्तोरुघनं मुनीन्द्रं, सम्पन्नगाम्भीर्यमनल्पबोधम् ।
विज्ञर्क्षसन्दोहनिशाधिनाथं, गुरुं सुभक्त्योदयमानतोऽस्मि ॥५॥
स्याद्वादसिन्धूल्लसनोडुनाथं, प्रमोदपाथोधिवरं सनाथम् ।
प्रमादपाथोजहिमं महान्तं, गुरुं सुभक्त्योदयमानतोऽस्मि ॥६॥
विज्ञानसौभाग्यधरप्रवीणं, गुर्वङ्घ्रिसेवैकनिविष्टचित्तम् ।
भव्योपकारं रचयन्तमाशु, गुरुं सुभक्त्योदयमानतोऽस्मि ॥७॥
विशारदग्रामनभस्तमोरिं, सद्बोधिबीजोद्भववारिवारम् ।
सद्बोधदायिप्रवरं सदाऽहं, गुरुं सुभक्त्योदयमानतोऽस्मि ॥८॥
निरारम्भव्रातं विमलतरवैराग्यजलधिं, गुणग्रामस्थानं मदनवनवह्निं कृतधियम् ।
कृपापूर्णस्वान्तं नयगममहाम्भोधिभपतिं, स्तुवेऽजस्रं भक्त्या सुगुरु**मुदयं** स्फारधिषणम् ॥९॥

ꩡ✦ꩢ

## ॥ ८. प्रशस्तिः ॥

नाऽस्त्येव सुन्दरतरा बहुकल्पनाऽत्र, नाऽस्त्येव शब्दरचना जनतोषदात्री ।
ग्रन्थो लघुस्तदपि भक्तिवशाज्जिनस्य, निर्बुद्धिना शिशुहिताय मया कृतोऽयम् ॥१॥
नेत्रर्षिनिधिचन्द्राङ्के (१९७२), वर्षे भक्त्या गुरोरयम् ।
नभसः सितसप्तम्यां, ग्रन्थः पूर्णीकृतो मया ॥१॥

॥ इति श्रीज्ञातनन्दन-चरमतीर्थकृन्महावीरशासनपूर्वाचलोष्णमयूखसधर्मसुधर्मचिन्तामणि-देशक-समीपसंसारसिन्धुपार-सकलशास्त्रज्ञशिरोमणि-न्यायनीरनिधिप्रकाशनविधुनिसर्गप्रशान्त-भुवनप्रसिद्ध-मिथ्यात्वसान्द्रध्वान्तवितानप्रणाशसहस्रकिरण-कारुण्यमीनाकरशारदौपधीश्वर-मुखधामभविभव्यधाम-विद्वद्वरभ्रमरभारपूजितप्रशस्तपादपद्मद्वैत-स्वगीर्मेघकवरञ्जित-भव्यनीलकण्ठसमूह-विस्मृतस्मारस्मारस्वरूपस्मरस्वाहापतिज्वालजलसमाज-गुणगणधरवरजगद्बन्धुजगद्धितकारक-तपोगच्छगगनग्रहाधिपपवित्र-चरित्रपरमपूज्यसंविग्नशाखीयभट्टारकाचार्यश्रीमद्विजय-**नेमिसूरि**चरणाम्भोजभ्रमरायमाणानुयोगाचार्यपन्न्या**सोदयविजय**ग-णिशिष्यमुनि**नन्दनविजय**विरचितोऽयं

**॥ स्तोत्रभानुग्रन्थः समाप्तः ॥ श्रीरस्तु ॥**

# स्तोत्रचिन्तामणिः

◆

श्रीविजयपद्मसूरिः

# अनुक्रमः


| | | पृष्ठम् |
|---|---|---|
| १. | मङ्गलाचरणम् | १४२ |
| २. | चतुर्विंशतिजिनचैत्यवन्दनानि | १४३ |
| ३. | पञ्चतीर्थीस्तोत्रम् | १५२ |
| ४. | शत्रुञ्जयप्रभुस्तोत्रम् | १५३ |
| ५. | आदिनाथस्तोत्रम् | १५४ |
| ६. | पार्श्वनाथस्तोत्रसन्दोहः | |
| | त्रिप्रभुस्तोत्रम् | १५५ |
| | पञ्चस्तोत्रम् | १५७ |
| | स्तम्भनपार्श्वचरित्रस्तोत्रम् | १५८ |
| | सेरीसकपार्श्वस्तोत्रम् | १६२ |
| | सेरीसापार्श्वनाथाष्टकम् | १६४ |
| | स्वयम्भूपार्श्वस्तोत्रम् | १६५ |
| | स्वयम्भूपार्श्वस्तुतिः | १६५ |
| | शङ्खेश्वरपार्श्वाष्टकम् | १६५ |
| | शङ्खेश्वरपार्श्वस्तोत्रम् | १६५ |
| ७. | महावीरस्तोत्रे | |
| | महावीराष्टकम् | १६७ |
| | जीवत्स्वामिमहावीरस्तोत्रम् | १६८ |

८. सिद्धचक्रस्तोत्रसङ्ग्रहः
सिद्धचक्रस्तोत्रम् १६९
सिद्धचक्रस्तुतिः १७०
सिद्धचक्राष्टकम् १७०
सिद्धचक्रस्तोत्रम् १७१
सिद्धचक्रषट्त्रिंशिका १७२
सिद्धचक्रशतकम् १७५
सिद्धचक्राष्टकम् १८४

९. शारदास्तोत्रे
शारदालघुस्तोत्रम् १८५
सरस्वतीस्तोत्रम् १८५

१०. गुरुस्तुतयः
गुरुदेवस्तवनम् १८८
विजयोदयसूरिस्तोत्रम् १८९
विजयनन्दनसूरिस्तोत्रम् १९०

११. वैराग्यकाव्ये
वैराग्यषोडशकम्-१ १९१
वैराग्यषोडशकम्-२ १९२

१२ प्रशस्तिः १९४

## ॥ १. मङ्गलाचरणम् ॥

योऽर्च्यः शक्रफणीन्द्रकृष्णवरुणाद्यैर्भूरिसंवत्सरा-
नाचार्याभयदेवदेदसुधियौ यस्याऽनुभावात् क्रमात् ।
लेभाते गदविघ्नशान्तिमतुलां श्रीहेमचन्द्रप्रभु-
दीक्षास्थानविराजितं घनरुचिं श्री**स्तम्भनाधीश्वरम्** ॥१॥

वाचं तीर्थकृतां समस्तसुगमां संशीतिसार्थापहां,
स्थानाङ्गातिशयैर्महर्षिसुलभैश्चङ्गैर्युतं पञ्चभिः ।
स्वीयान्यागमतत्त्वबोधकमहातीर्थोदयाधायकं,
सङ्घस्तुत्यजगद्गुरुं मदधिपं श्री**नेमिसूरीश्वरम्** ॥२॥

वन्दित्वा रचयामि हृष्टहृदयो जैनेन्द्रस्तुत्यादिकै-
र्भावैः सङ्कलितं सदर्थललितं श्री**स्तोत्रचिन्तामणिम्** ।
प्राचीनानि बहूनि यद्यपि महास्तोत्राणि मुद्दानि मा-
मस्मिन् प्रेरयति प्रमाणरहिता भक्तिस्तथापि प्रभोः ॥३॥

# ॥ २. श्रीचतुर्विंशतिजिनचैत्यवन्दनानि ॥

## ॥ श्रीआदिनाथ-चैत्यवन्दनम् - १ ॥

बिन्द्वक्षिप्रमितानि वर्यमहिमास्थानानि सर्वाण्यपि, सेवित्वा जिननामकर्म प्रबबन्धाऽऽनन्दतो यः प्रभुः ।
पश्चादन्त्यभवे सयोगिगुणधाम्नि प्राप्तवर्योदयो, भव्यायां समवसृतौ समुपवेश्येष्टां ददौ देशनाम् ॥१॥
(शार्दूल०)
सद्धर्मादिकरं सुरासुरनताङ्घ्र्यम्भोजमर्हद्वर-मन्तातीतपराक्रमान्वितमहाशैलेशधैर्यास्पदम् ।
रागाद्यर्त्तिविनाशकं त्रिभुवनध्येयाभिधं बोधिदं, श्री**शत्रुञ्जयपार्थिवं** प्रतिदिनं प्रातर्मुदाऽहं स्तुवे ॥२॥
शोभन्ते हरयोऽपि यस्य चरणाब्जे षट्पदाभा भृशं, कृत्वाऽर्च्चां शुभसात्त्विकीं तृणनिभं स्वीयं सुखं मन्वते ।
विघ्नाधायककर्मभूधरमहावज्रं च सोमाननं, तं नाभेयप्रभुं स्तुवन्तु भविनः सन्निर्जराकारणम् ॥३॥

◆

## ॥ श्रीआदिनाथ-चैत्यवन्दनम् - २ ॥

युगलिकमनुजानां योऽनिशं भक्तिभाजा-मुपकृतिमुपचक्रे राज्यमाप्तो युगादौ ।
भवमगणितदुःखं मुक्तिदां च प्रव्रज्यां, लघु मनसि विचार्यैतां मुदाऽङ्गीचकार ॥१॥ (मालिनी)
सममतिमवलम्ब्य स्वानुकूलेऽपरस्मिन्, भविजनहितलब्ध्यै यो धरायां विजह्रे ।
कलितनिखिलभावः केवलेनाऽनुभावात्, समुदितजिननामा घातिकर्मप्रणाशे ॥२॥
हरिभिरमरयुक्तैरर्चितो दिष्टधर्मो, विगलितरिपुवर्गः संस्मृतेर्यस्य नाम्नः ।
समजगदसुमन्तः प्राप्नुवन्तीष्टसिद्धिं, स भवतु मम मुक्त्यै **नाभिसूनु**र्वृषाङ्कः ॥३॥

◆

## ॥ श्रीअजितनाथ-चैत्यवन्दनम् - १ ॥

सुखदजन्मनि यस्य मुदन्विता, निरयवासगता असुशालिनः ।
सुरवरासनमाचलतां गतं, तमभिनौ**म्यजितं** हयचिह्नितम् ॥१॥ (द्रुतविलम्बितवृत्तम्)
भविजनाम्बुजभासनभास्करो, भुवनबान्धव ईहितदायकः ।
प्रणतवासवचक्रिनृपावलि-विजयतामजितोऽत्र जिनाधिपः ॥२॥

खदमिनं खमनोरथनिर्गतं, मदनखं खमिवाऽनघलेपनम् ।
जिनखमप्रतिकारखमारतं, तमजितं भविनीरजखं स्तुवे ॥३॥

◆

## ॥ श्रीअजितनाथ-चैत्यवन्दनम् - २ ॥

दिव्यातुलां सुखततिं विजयेऽनुभूया-ऽयोध्यापुरीं च विजयाशुभकुक्षिशुक्तौ ।
मुक्तोपमो**ऽजित**जिनोऽवततार विज्ञ:, श्वेतत्रयोदशदिनेऽमलमाधवीये ॥१॥ (वसन्ततिलका)
यस्याऽष्टमीवरदिने सितपक्षमाघे, जन्मोत्सवोऽमरवरा: प्रचकार मेरौ (वं सुरवरा विदधु: सुमेरौ) ।
माघे सिते च नवमीशुभवासरे यो, दीक्षां ललौ प्रविशदोन्नतभावनाढ्य: ॥२॥
ध्यानान्तरीयसमये गतघातिकर्मा, संप्राप केवलमनन्तपदार्थबोधम् ।
लेभे शिवं सकलकर्मविनाशकाले, कर्माजिताजितप्रभुं प्रणिदध्महे तम् ॥३॥

◆

## ॥ श्रीतारङ्गतीर्थपति-श्रीअजितनाथ-चैत्यवन्दनम् - ३ ॥

भव्याम्बुजोल्लसनैकदिनपतिनिजगुणौघरमणकरं, निखिलविश्वपदार्थदर्शकबोधरत्नजलाकरम् ।
नाकीशसुरनरचक्रिपूजितविमलपादेन्दीवरं, **तारङ्गतीर्थाजित**प्रभुं प्रणमामि वरतीर्थेश्वरम् ॥१॥
(हरिगीतच्छन्द:)
सद्वाक्यरचनोल्लासबन्धुरप्रगुणगुणगणमन्दिरं, शुभचरणविबुधकदम्बसंस्मृतभावरत्नविकस्वरम् ।
सकलाङ्गिभद्रविधानतत्परविशदधर्मखभास्करं, तारङ्गतीर्थाजितप्रभुं प्रणमामि वरतीर्थेश्वरम् ॥२॥
सद्ध्यानपावकदग्धहास्यविनोदमदनेन्धनभरं, सदतिशय[गुण]गणभूषितं परभावपीडोत्करहरम् ।
सद्देहिवाञ्छितवर्गवितरणकल्पतरुमुत्तमनरं, तारङ्गतीर्थाजितप्रभुं प्रणमामि वरतीर्थेश्वरम् ॥३॥
यद्देशनामुपकर्ण्य भूपकुमारपाल: सुन्दरं, प्रविधापयाञ्चक्रे जिनालयमत्र तीर्थे श्रीधरम् ।
कलिकालसर्वज्ञेन तेनेडितपदं शान्त्याकरं, तारङ्गतीर्थाजितप्रभुं प्रणमामि वरतीर्थेश्वरम् ॥४॥
त्वां [सु]प्रसन्नास्यं प्रणम्य करोमि विज्ञप्तिं हितां, मां [द्राक्] त्वया सदृशं विधेहि जिनेश ! भक्तिसमन्वितम् ।
गुरुनेमिसूरीश**पद्म** एवमुवाच नम्रवचनभरं, तारङ्गतीर्थाजितप्रभुं प्रणमामि वरतीर्थेश्वरम् ॥५॥

◆

## ॥ श्रीसम्भवनाथ-चैत्यवन्दनम् - १ ॥

भुवनाद्भुतभाग्यभरेज्यपदं, भवनीरधिपोतनिभं शमदम् ।
चितकर्मगदौषधमाप्तवरं, प्रणमन्तु जितारिसुतं भविका: ! ॥१॥ (त्रोटकवृत्तम्)
जलदं रुचिपादपपल्लवने, सकलाङ्गिहितप्रदसूक्तिततिम् ।
विमलातिशयर्द्धिसमूहयुतं, नम **सम्भव**नाथजिनाधिपतिम् ॥२॥
जगतीतलभूषणभारहरं, स्वपवर्गसनातनसौख्यकरम् ।
स्थिरशान्तिनिधिं विपुनर्भवनं, प्रणमामि गज(हय)ध्वजदेहमहम् ॥३॥

◆

## ॥ श्रीसम्भवनाथ-चैत्यवन्दनम् - २ ॥

जितारिनृपसेनाया, नन्दनं शान्तिदायकम् ।
अश्वलञ्छनमर्हन्तं, प्रभुं श्री**सम्भवं** स्तुवे ॥१॥ (अनुष्टुब्वृत्तम्)
कल्याणवर्णसद्देहं, सहस्राम्रवने वरे ।
सहस्रपरिवारेण, प्राप्तदीक्षं महोदयम् ॥२॥
कार्तिके कृष्णपञ्चम्यां, केवलज्ञानशालिनम् ।
जगदुद्धारकर्त्तारं, तृतीयं तीर्थपं स्तुवे ॥३॥
गुणस्थानकसोपान-संप्राप्तोत्तमसम्पदम् ।
पूर्वाणि षष्ठिलक्षाणि, यस्याऽऽयुर्नौमि तं विभुम् ॥४॥

◆

## ॥ श्रीअभिनन्दनस्वामि-चैत्यवन्दनम् - १ ॥

दिव्यं सुखं यो विजये विमाने-ऽनुभूय प्रान्ते च भवे विनीता (शुभायाम्) ।
पुर्यां शुभे संवरभूपवंशे, ज्ञानत्रयीयोगविराजितो यः ॥१॥ (उपजातिवृत्तम्)
माघे द्वितीयादिवसे च शुक्ले, मातुः सुकुक्षावततार वर्ये (क्षाववतारमाप)।
क्षणे त्रिलोकीकृतमोदमाल-स्तं नौमि तीर्थाधिपतिं चतुर्थम् ॥२॥
विज्ञाय यस्योद्भवमिन्द्रदेवा, आजग्मुरीशं मुदिता प्रणन्तुम् ।
तेन प्रसिद्धा **स्वभिनन्दना**ख्या, कपिध्वजं तं प्रणमामि भक्त्या ॥३॥

◆

## ॥ श्रीअभिनन्दनस्वामि-चैत्यवन्दनम् - २ ॥

यद् ध्येयं यद् दराराध्यं, यच्च कातरदुर्लभम् ।
तच्चित्पूर्णपदं प्राप्त !, जय त्व**मभिनन्दन** ! ॥१॥ (अनुष्टुप्वृत्तम्)
दूरस्थोऽपि जगन्नाथ !, त्वन्नामस्मृतिकारिणः ।
निर्धौताघमला भव्या, लभन्ते परमं पदम् ॥२॥
त्वद्बिम्बध्यानलीनोऽयं, किङ्करोऽस्मै समर्पय ।
सात्त्विकानन्दसन्दोहं, त्वन्निभत्वं भजेद् यतः ॥३॥

◆

## ॥ श्रीसुमतिनाथ-चैत्यवन्दनम् - १ ॥

सुस्नापितोऽमरगिरौ निजजन्मकाले, यो वज्रिभिर्विविधसत्कलशैः प्रदीप्रैः ।
कल्याणकेषु मुदिताश्च चतुर्षु यस्य, श्वभ्राङ्गिनोऽपि प्रभवन्ति विकासभाजः ॥१॥
(वसन्ततिलका)
नाथ ! त्वदीयचरणाब्जमसेवमानो, बभ्राम भीषणभवेऽहमनन्तकालम् ।
भाग्योदयेन नृभवं समवाप्य भावाद्, भव्यार्चनां विदधतः कुरु मेऽथ रक्षाम् ॥२॥

त्वां भद्रभूमिरुहसेचनवारिवाहं, दृष्ट्वा विकासमयते मम चित्तबर्ही ।
कल्याणकान्ति**सुमते** ! करुणां विधाय, तूर्णं विमोचय च मां बलिमोहपाशात् ॥३॥

◆

## ॥ श्रीसुमतिनाथ-चैत्यवन्दनम् - २ ॥

भुवनप्रकाशनभानुं, कृशानुमतिगाढकर्मवनदहने ।
क्रौञ्चध्वजमेघसुतं, त्रिशतधनुर्देहमभिवन्दे ॥१॥ (आर्यावृत्तम्)
भविजनचित्तकजेन्दुं, विमतिवितानेभवारपञ्चमुखम् ।
खाश्वसुभटजेतारं, वन्दे श्रीमङ्गलातनयम् ॥२॥
पूर्वाणां लक्षाणि, चत्वारिंशच्च यस्य सर्वायुः ।
निजगुणरक्तं **सुमतिं**, नित्यं प्रातः प्रणिदधामि ॥३॥

◆

## ॥ श्रीपद्मप्रभस्वामि-चैत्यवन्दनम् ॥

प्रस्वेदरोगमलहीनशरीरमेवं, रूपं च यस्य प्रवरं शुभदेहगन्धः ।
श्वासोऽपि नीरजसुगन्धसमस्तथैव, मांसासृजौ विमलधेनुपयःसितौ च ॥१॥ (वसन्ततिलका)
नीहारभोजनमनीक्ष्यमवर्यनेत्रै-रुद्दामसद्गुणनिधिर्मरुदर्चनीयः ।
कल्याणसुन्दररुचिर्निहतान्तरारिः, **पद्मप्रभः** स जिनपोऽस्तु ममोदयाय ॥२॥
रामादिसङ्गविकलं यमवीक्ष्य देवा, नीचैर्मुखा हरिहरप्रमुखा भवन्ति ।
शीतांशुशान्तवदनो जगदेकवीर-स्तं शान्तिदं प्रणिदधे सरसीरुहाङ्कम् ॥३॥
सद्ध्यानवातततिनाऽहितकर्ममेघाः, क्षिप्ता अनन्तबलवीर्ययुतेन येन ।
यस्य स्तुतिं विदधते विबुधा विनोदात्, तं संस्मरन्तु भविनो धरराजसूनुम् ॥४॥

◆

## ॥ श्रीसुपार्श्वनाथ-चैत्यवन्दनम् ॥

सुराधिपोपासितपादपद्म !, कृपाम्बुराशे ! समजन्तुजाते ।
सद्वाङ्निरस्ताखिलवादियूथ !, **सुपार्श्व**नाथ ! प्रणमाम्यहं त्वाम् ॥१॥ (उपजातिवृत्तम्)
वशीकृता येन हरादिदेवा, मनोभवेन त्वमनन्तवीर्य ! ।
वैराग्यतो तं विननाश मूला-दतः प्रणम्योऽस्यभिरूपवृन्दैः ॥२॥
चिताघपङ्केन निभं बुधेशं, स्वास्थ्यं सदा यस्य गतावसानम् ।
प्रबोधवार्युद्भवभानुभानुं, प्रतिष्ठपृथ्वीतनयं प्रवन्दे ॥३॥

◆

## ॥ श्रीचन्द्रप्रभस्वामि-चैत्यवन्दनम् ॥

मनश्चिन्तितार्थौघवेत्तारमीशं, निरस्ताघसार्थं त्रिलोकीसमर्च्यम् ।
महासेनपुत्रं सुधासूतिचिह्नं, भजे तीर्थनाथाष्टमं **चन्द्रदेवम्** ॥१॥ (भुजङ्गप्रयातवृत्तम्)

त्रिभागोनदेहाप्तसिद्धिप्रमोदं, जराद्यैर्विहीनं विशुद्धस्वरूपम् ।
युतं शाश्वतानन्दबोधादिभावै-रनङ्गद्रुहं सङ्गतानङ्गभावम् ॥२॥
करोति स्तुतिर्यस्य सन्निर्जरालिं(लिः), कृता सेवना निर्निदाना विमाना ।
प्रदत्तेऽविलम्बं शिवं स्वर्गसौख्यं, तमीडेऽनिशं लक्ष्मणाकुक्षिरत्नम् ॥३॥

◆

## ॥ श्रीसुविधिनाथ-चैत्यवन्दनम् ॥

नयनिक्षेपविभक्ति-प्रसक्तवाचोऽभिरूपनुतियोग्याः ।
वृजिनापहा विशिष्टाः, समस्तभाषानुगा यस्य ॥१॥ (आर्यावृत्तम्)
यो वन्द्यो योगीशै-र्भव्यस्थतमोवितानतपनाभः ।
भुवनावनैकनिरतः, स जयतु **सुविधि**र्जिनेशानः ॥२॥ [युग्मम्]
भवबन्धनमुक्तीच्छा, यदि चेतसि चेतन ! स्खलनहीना ।
रामाङ्गजसुविधिजिनं, ग्राहाङ्कं पूजयाऽक्षेपम् ॥३॥

◆

## ॥ श्रीशीतलनाथ-चैत्यवन्दनम् ॥

संसारारण्याङ्गिनां सार्थवाहो, नीरागोऽपि प्रीणिताङ्ग्योघचितः ।
निर्द्वेषोऽपि प्रास्ततुच्छारिमोहो, निष्कामोऽपीष्टार्थदाने समर्थः ॥१॥ (शालिनीवृत्तम्)
सामान्यार्चां कुर्वतो यस्य पुण्यं, तद् भूयिष्ठं चन्दनेनाऽर्चनेन ।
लक्षाभ्यस्तं मालयाऽनन्तगुण्यं, सम्पद्येतेडाविधानेन पुण्यम् ॥२॥
स्वान्तःप्रीत्या भक्तितो नागकेतो-र्दृष्टान्तेनोपार्ज्यते ज्ञानरत्नम् ।
सद्भावाढ्यां तीर्थकृन्नामलक्ष्मीं, प्राप्नोतीशं तं स्तुवे **शीतले**शम् ॥३॥

◆

## ॥ श्रीश्रेयांसनाथ-चैत्यवन्दनम् ॥

दीप्रसत्क्रमनखैर्विराजितं, सात्त्विकानुभवसार्थदायकम् ।
**विष्णुराजतनयं** महारुचिं, विष्णुहर्षदमनिष्टवारकम् ॥१॥ (रथोद्धतावृत्तम्)
सर्वकर्मगतमर्मभेदकं, विश्वतत्त्वगरहस्यदर्शकम् ।
क्षायिकप्रगुणरत्ननीरधिं, निर्मदं प्रशमिशेखरप्रभुम् ॥२॥
दिव्यशान्तिदपदाब्जपूजनं, वत्सलं प्रणतदेहिसञ्चये ।
शान्तिदं प्रतिदिनं प्रणौम्यहं, कामदं निरुपलेपजीवनम् ॥३॥

◆

## ॥ श्रीवासुपूज्यस्वामि-चैत्यवन्दनम् ॥

गीर्वाणानतमस्तकस्थमुकुटोद्दीप्रोस्ररत्नश्रियो, यस्याऽङ्घ्रिप्रभवोपरक्तनखरश्रीर्वर्यतामानशे ।
बिम्बौष्ठं वरचित्त्रयेण कलितं बाल्येऽप्यबाल्यश्रितं, तं पाथोजनिभद्युतिं प्रणिदधे श्री**वासुपूज्या**धिपम् ॥१॥
(शार्दूल०)

अन्तःस्थावितथप्रमोदनिभृताः कृत्वा शचीशामरा, यत्पादाब्जयुगस्य भक्तिममलां तज्जन्यसौख्याम्बुधेः ।
अग्रे शर्म निजं तृणोपममपि प्राज्यं न ते मन्वते, वन्देऽध्यात्मरसप्रदायकमहं तं श्रीजयानन्दनम् ॥२॥
सच्चित्ताब्जदिनेशकल्पममितैः सल्लक्षणैरन्वितं, व्यस्ताशेषसरोषदोषनिकरं पुण्यद्रुमेघोपमम् ।
शुक्लध्यानकृशानुहेतिनिवहप्रध्वस्तकर्मेन्धनं, नौमि श्रीवसुपूज्यभूपतनयं प्रौढप्रभावाननम् ॥३॥

◆

## ॥ श्रीविमलनाथ-चैत्यवन्दनम् ॥

निखिलाक्षनिरोधकारकं, हरिदेवौघसमर्चितक्रमम् ।
विकलङ्कचरित्रधारकं, **विमलं** स्तौमि जिनं शमीश्वरम् ॥१॥ (वैतालीयवृत्तम्)
यदि चेतसि भद्रवाञ्छना, तव हे जीव ! तदा हितप्रदाम् ।
प्रमुदाऽविचलेन चेतसा, कुरु वर्यां विमलार्चनां सदा ॥२॥
विमला बहवोऽभिधानतो, गुणयुक्ता पुनरत्र दुर्लभाः ।
विमलं गुणतोऽभिधानतः, प्रणमामीशमनन्तसद्गुणम् ॥३॥

◆

## ॥ श्रीअनन्तनाथ-चैत्यवन्दनम् ॥

भव्यचेतश्चकोरेन्दुरीशोऽर्हतां, संस्तुतो भावतो द्योपतीशव्रजैः ।
चित्कलानन्दिताशेषसन्मण्डलो-**ऽनन्त**नाथोऽस्तु मे सर्वसिद्धिप्रदः ॥१॥ (स्रग्विणीवृत्तम्)
शर्मदं कामदं कामदं निर्गदं, विश्वविश्वस्थभव्याङ्गिसंपूजितम् ।
सिंहसेनान्वयव्योमदोषाकरं, त्वामनन्तेश्वरं स्तौमि निस्तारकम् ॥२॥
त्यक्तरामाक्षमालास्त्रसार्थान्वयं, मङ्गलालिप्रदानामरानोकहम् ।
नामसद्ध्यानतो यस्य सिद्धिर्भवेद्, नौमि तं श्येनचिह्नं जिनाधीश्वरम् ॥३॥

◆

## ॥ श्रीधर्मनाथ-चैत्यवन्दनम् ॥

भुवनभव्यकजोन्नतिभास्करं, सकलवाञ्छितदानसुरद्रुमम् ।
विमलमङ्गलकेलिविधायकं, भजत भानुसुतं भुवनाधिपम् ॥१॥ (द्रुतविलम्बितवृत्तम्)
अशनिलञ्छनमुत्तमसुव्रता-ङ्गजमनन्तगुणावलिभूषितम् ।
मथितमन्मथदर्पमनीश्वरं, भजत भानुसुतं भुवनाधिपम् ॥२॥
अमृतभोजिगणस्तुतसद्गुणं, अतिशयाञ्चितदेहजगद्वरम् ।
प्रवरधर्मद**धर्म**जिनेश्वरं, भजत भानुसुतं भुवनाधिपम् ॥३॥
जगति विश्रुतकीर्तियशोभरं, त्रिजगदुत्तमपुण्यचयान्वितम् ।
प्रशमदं परभावनिवारकं, भजत भानुसुतं भुवनाधिपम् ॥४॥
अशरणावनदायकदर्शनं, परमकेवलबोधविराजितम् ।
पुरुषसिंहनिभं पुरुषोत्तमं, भजत भानुसुतं भुवनाधिपम् ॥५॥

◆

## ॥ श्रीशान्तिनाथ-चैत्यवन्दनम् ॥

मतिश्रुतावधीनमुद्भवक्षणात् प्रमोददं, सुरेशचक्रिपूजिताङ्घ्रिवारिजं वराननम् ।
प्रशस्तसंपदावलिप्रदानदक्षसेवनं, वराचिराङ्गजं स्तुवे सदैव **शान्ति**तीर्थपम् ॥१॥ (पञ्चचामरवृत्तम्)
जगत्प्रमोददायकं प्रणष्टमोहसायकं, शमीशचित्तवासिनं परात्मसम्पदाऽन्वितं ।
विशिष्टदेशनातिशायिसिद्धिमार्गदर्शकं, नमाम्यनन्तशर्ममग्नविश्वसेननन्दनम् ॥२॥
भवाब्धियानपात्रसंनिभं प्रदीप्तिधारकं, विशिष्टपुण्यशालिनं मृगध्वजं गुणास्पदम् ।
विशालदेशनाप्रबोधितासुमत्कदम्बकं, सदा स्मरामि चक्रिनाथविश्वसेननन्दनम् ॥३॥

◆

## ॥ श्रीकुन्थुनाथ-चैत्यवन्दनम् ॥

भव्यमनोकजभासनभानुं, श्रीजननीसुतमर्हदधीशम् ।
चन्द्रमुखं दितदोषसमूहं, स्तौमि सदा प्रभुकुन्थुजिनेशम् ॥१॥ (दोधकवृत्तम्)
घातिचतुष्टयकर्मविनाशा-ल्लब्धमहोदयकेवलबोधम् ।
योगनिरोधसमाश्रितमुक्तिं, स्तौमि सदा श्रीकुन्थुजिनेशम् ॥२॥
भावकृपाम्बुसमुद्रशमीशं, सात्त्विकहर्षनिकेतनवक्त्रम् ।
योगिजनस्मृतिगोचरमाप्तं, स्तौमि सदा प्रभुकुन्थुजिनेशम् ॥३॥

◆

## ॥ श्रीअरनाथ-चैत्यवन्दनम् ॥

वार्धिगभीरं सुरगिरिधीरं, शान्तिनिशान्तं सुगुणनिधानम् ।
शस्त्ररमासङ्गरहितदेहं, श्री**अर**नाथं जिनपतिमीडे ॥१॥ (श्रीवृत्तम्)
आत्मिकलक्ष्मीनिवसनगेहं, नागपुरेशं दमितखसार्थम् ।
नष्टकषायं भवदववारिं, श्रीअरनाथं जिनपतिमीडे ॥२॥
कञ्चनवर्णं सदतिशयाढ्यं, विघ्नघनौघापसरणवायुम् ।
विश्वजिनेशं प्रशमदपूजं, श्रीअरनाथं जिनपतिमीडे ॥३॥

◆

## ॥ श्रीमल्लिनाथ-चैत्यवन्दनम् ॥

सुरासुरेशसेवितं, प्रभावतीप्रमोददम् ।
प्रणाशिताखिलापदं, स्मरामि **मल्लि**तीर्थपम् ॥१॥ (प्रमाणिकावृत्तम्)
निशाकरप्रभाननं, मनोज्ञवाचमीश्वरम् ।
मनोरथप्रदायकं, स्मरामि मल्लितीर्थपम् ॥२॥
अमित्रमित्रयो: सदा, समानभावभूषितम् ।
समस्तदोषवर्जितं, स्मरामि मल्लितीर्थपम् ॥३॥

◆

## ॥ श्रीमुनिसुव्रतस्वामि-चैत्यवन्दनम् ॥

अर्हद्वरेण्यं वरसाम्यसिन्धुं, पद्माङ्गजं तीर्थपतिं विमोहम् ।
भव्याननं विश्वप्रकाशभानुं, नित्यं स्तुवेऽहं **मुनिसुव्रते**शम् ॥१॥ (इन्द्रवज्रावृत्तम्)
दु:खौघसंसारपदार्थकाङ्क्षा-मेघापनोदानिलमुत्तमाप्तम् ।
प्रत्यूहकाष्ठौघविदाहनाग्निं, नित्यं स्तुवेऽहं मुनिसुव्रतेशम् ॥२॥
सद्देशनारञ्जितभव्यलोकं, सत्केवलालोकितसर्वभावम् ।
सिद्धं भवाम्भोनिधियानपात्रं, नित्यं स्तुवेऽहं मुनिसुव्रतेशम् ॥३॥

◆

## ॥ श्रीनमिनाथ-चैत्यवन्दनम् ॥

शान्ताकारं भव्यचेतोऽब्जभानुं, संसाराब्धौ यानपात्रं जनानाम् ।
सद्भावाढ्यं चङ्गनीलाब्जचिह्नं, **वप्रापुत्रं** सर्वदा नौमि भावात् ॥१॥ (शालिनीवृत्तम्)
कल्याणौघाधायकं शुद्धबोधं, सद्ध्यानश्रेणिप्रणष्टारिसैन्यम् ।
विश्वापद्विध्वंसिनी यस्य पूजा, वप्रापुत्रं सर्वदा नौमि भावात् ॥२॥
दृष्टे यस्मिन् सात्त्विकानन्दलाभो, ध्यानाद् यस्य प्राज्यसिद्धिप्रसिद्धि: ।
देवाधीशाद्यङ्घ्रिसार्थार्च्यपादं, वप्रापुत्रं सर्वदा नौमि भावात् ॥३॥

◆

## ॥ श्रीनेमिनाथ-चैत्यवन्दनम् ॥

भव्याकारं प्रशमजलधिं शक्रपूज्याङ्घ्रिपद्मं, मेघश्यामं विमलमतिदं भिन्नसंसारचक्रम् ।
संसाराब्धौ प्रवहणनिभं मेघगम्भीररावं, तं शङ्खाङ्कं प्रवरविधिना **नेमि**नाथं स्तुवेऽहम् ॥१॥ (मन्दाक्रान्तावृत्तम्)
यस्त्रिज्ञानी मदनविपदं जन्मतो ब्रह्मचारी, ज्ञात्वाऽन्त:स्थप्रवरमतिना भाववैराग्यधारी ।
त्यक्त्वा रक्तां नृपतितनयां वर्यराजीमतीं तां, दीक्षां गत्वा सपदि जगृहे रैवताद्रौ प्रमोदात् ॥२॥
शुक्लध्यानक्षपकततिसंप्राप्तसत्केवलेन, ज्ञाताशेषद्रविणभवनाशस्थिरत्वादिभावम् ।
शैलेश्यासादितशिवपदं प्रौढलक्ष्मीसमेतं, तं शैवेयं प्रवरविधिना नेमिनाथं स्तुवेऽहम् ॥३॥

◆

## ॥ श्रीपार्श्वनाथ-चैत्यवन्दनम् ॥

प्रसन्नास्य: शक्रामरततिनुतो भव्यचरितो, जगज्जीवध्येय: प्रशमसुखदो यो गुणनिधि: ।
भवाब्धौ वृद्धत्वोद्भवमृतिजलाढ्ये प्रवहणं, स्तुवे तं **वामेयं** जितसुरतरुं भव्यचरणम् ॥१॥ (शिखरिणी)
समं चेतो यस्य प्रणयि धरणेन्द्रे च कमठे, महाद्वेषस्तोमाग्निविसरविदग्धेऽधमतमे ।
मनोऽभीष्टत्यागामरविटपितुल्यो जगति य:, स्तुवे तं वामेयं जितसुरतरुं भव्यचरणम् ॥२॥
जगद्बन्धुं दिव्यातिशयगणसंपत्परिगतं, जगन्नाथं तीर्थाधिपतिममलानन्दशरणम् ।
कृपासिन्धुं मेघध्वनिममलचिद्रूपकलितं, स्तुवे तं वामेयं जितसुरतरुं भव्यचरणम् ॥३॥

◆

## ॥ श्रीमहावीरस्वामि-चैत्यवन्दनम् ॥

यन्नामध्यानयोगाद् भविजननिलये जायते मङ्गलालि-
र्यस्याऽर्चा विघ्नकोटीविलयनकुशलाऽऽत्मीयसंपत्प्रदाना ।
मेरौ जन्मक्षणे यो हरिसुरनिवहैः स्नापितो भक्तितो यः,
स श्री**वीर**प्रभुर्नः प्रतिदिनममदः सिद्धिबुद्धिप्रदोऽस्तु ॥१॥ (स्रग्धरा)
श्रुत्वा यस्योपदेशं सपदि भविजनाः प्राप्तसन्मार्गबोधा,
देशाद् वा सर्वतः संयमममलममन्दोन्नतिं साधयित्वा ।
शीघ्रं संप्राप्नुवन्ति क्षपकततिबलात् साध्यसिद्धिं विशिष्टां,
स श्रीवीरप्रभुर्नः प्रतिदिनममदः सिद्धिबुद्धिप्रदोऽस्तु ॥२॥
निःसीमं यस्य साम्यं वरपदपतिते वासवे च द्विजिह्वे,
वृत्तात् सारं च लब्ध्वा विमलमतिजनाः शान्तिसौख्यं लभन्ते ।
कर्मस्पर्द्धाप्रवीणं जगति विजयिनं सिद्धसिद्धार्थसूनुं,
स श्रीवीरप्रभुर्नः प्रतिदिनममदः सिद्धिबुद्धिप्रदोऽस्तु ॥३॥

ꕥ✦ꕥ

## ॥ ३. श्रीपञ्चतीर्थीस्तोत्रम् ॥

श्रीस्याद्वादसरित्पतीन्दुप्रतिमं भव्याङ्गिभद्रङ्कर-माद्यं क्ष्मापमुनीश्वरार्हदधिपं कृत्वा तपो वार्षिकम् ।
चित्रं पारणकं रसेन विदधे श्रेयांससत्केन यो, वन्दे पूज्यपदारविन्दयुगलं तं श्री**युगादीश्वरम्** ॥१॥
(शार्दूलविक्रीडितम्)

यत्कीर्तिः प्रससार पूर्वसमये श्येनावनेनाऽभितः, कल्याणद्रुमकाननोन्नतिघनं शान्तप्रसन्नाननम् ।
विध्यानार्जितकर्मसार्थमुदिरोत्साराशुगं सन्मतिं, ध्यायामीष्टसुरद्रुमं गतरतिं श्री**शान्तिनाथं** मुदा ॥२॥

यद् दीक्षैकनिबन्धनं सकलविघ्नौघो यतो नश्यति, तद्ब्रह्मव्रतलीनचित्तममदं विज्ञानचूडामणिम् ।
यस्तत्याज रतामपि प्रमुदितां राजीमतीं रङ्गतः, स्वीचक्रे वरसंयमं प्रणिदधे श्री**नेमिनाथं** सदा ॥३॥

हर्यङ्गुष्ठनिवेशितामृतरसाहारेण यो वर्धितः, संशुद्धावधिनाऽवगम्य कमठप्रज्वालिताग्नावहिम् ।
मन्त्रं स्वानुचरेण भव्यगतिदं संश्राव्य कारुण्यतः, सद्दृष्टिं वितताार जिष्णुपदवीं तं **पार्श्वनाथं** स्तुवे ॥४॥

यस्याऽगाधकृपा हि संगमसुरे गोशालके द्वेषिणि, निःसीमा समता रिपौ बलयुते शक्रे नमस्कुर्वति ।
वागध्यात्मरसप्रदा प्रबलमोहस्पर्द्धकं शान्तिदं, सद्भावेन नमामि **वीर**मनिशं तं शासनाधीश्वरम् ॥५॥

೫✦೪

## ॥ ४. श्रीशत्रुञ्जयप्रभुस्तोत्रम् ॥

यः कल्याणरुचिर्गुरुश्च जगतां यं स्तौति देवाधिपो, येन स्थानमनन्तमाप्तमचलं यस्मै च भव्यस्पृहा ।
यस्मात् ख्यातिगताः कला भविजना यस्याऽभिधां ध्यायति, यस्मिन् सिद्धिततिः प्रणौमि तमहं **शत्रुञ्जयाधीश्वरम्** ॥१॥
(शार्दूलविक्रीडितवृत्तम्)

कल्याणद्रुमपल्लवैकजलदः सद्भावसम्पादको, विश्वस्थाङ्गिमनोऽब्जभानुरतुलात्मीयर्द्धिदानक्षमः ।
सद्वाञ्छाघटितार्थसार्थविशदत्यागामरेलारुहः, श्रीनाभेयजिनाधिपोऽस्तु भविनां माङ्गल्यमालाप्रदः ॥२॥

यज्जन्मादिचतुष्टयेऽत्र निरयेऽप्याभाससौख्यं भवेद्, यत्स्थानाचलदर्शनादपि भवेयुर्निर्मला भद्रिकाः ।
तिर्यञ्चोऽपि गताः सुपर्वनिलयं यद्ध्यानमात्रादपि, तं वन्देऽमितभावभावविमलानन्तालयाब्जालयम् ॥३॥

पूर्वानेकभवार्जिताघनिचयप्रोत्सारिणं योगिनं, निःशेषाभ्युदयप्रदाननिपुणं कान्तं निशान्तं श्रियः ।
भव्योद्गीतयशःप्रशस्तिप्रहताशेषान्तरारिव्रजं, वेदेन्दुप्रमितैः कृतार्थमिहितस्थानैर्गुणानां क्रमात् ॥४॥

मोक्षाप्तिर्न यदन्तरेति गदितं श्रीमज्जिनेन्द्रागमे, मूलं बोधितरोर्निधानमसमं यद् गीयते सम्पदाम् ।
यस्माद् बोधसुसंयमेऽपि सफले यत् तीर्थकृत्कर्मदं*, तत् सम्यक्त्वसमर्पकं प्रतिदिनं स्वर्णाद्रिनाथं स्तुवे ॥५॥

अस्मिन् नाटकसंनिभे भवपुरे कालादनादेरहं, रागाद्यैश्चरटैर्विपत्तिदलनात् ते दर्शनादन्तरा ।
कृत्वा मां प्रविडम्बितं करुणया हीनैरहं नाटितो, दृष्टः सात्त्विकहर्षदस्त्वमधुना पुण्यप्रभावान्मया ॥६॥

त्रैलोक्याक्षिचकोरचन्द्रजिनपश्रेणिप्रधानप्रभो !, निष्कर्मा त्वमहं च कार्मणमहास्कन्धान्वयैर्वेष्टितः ।
भेदं किङ्करपूज्ययोर्जनयतः कर्मित्वनिष्कर्मते, शीघ्रं तं तदपाकुरुष्व कृपया यं काङ्क्षते मे मनः ॥७॥

॥ अनुष्टुब्वृत्तम् ॥

मङ्गलं गिरिराजोऽस्तु, श्रीसङ्घे जिनशासने ।
शत्रुञ्जयेशभक्तानां, गृहेऽस्तु मङ्गलावलिः ॥८॥

---

* 'यस्माद् ज्ञानमथो चरित्रमपि च स्यात् सत्फलं निर्मल'मिति स्यात् ।

## ॥ ५. श्रीआदिप्रभुस्तोत्रम् ॥

शुक्लध्यानसमाप्तसाधनतयाऽगण्या पवित्रात्मनः, यस्योपास्तिरता शिवालयगताः सद्यो बभूवुर्जनाः ।
ख्यातो यो भुवनत्रयेऽरिजयनाच्छत्रुञ्जयस्वाख्यया, तत्रस्थः प्रभुनाभिभूपतनयः श्रेयस्करो नोऽस्तु वः ॥१॥
(शार्दूलविक्रीडितम्)

यत्रस्थश्च बभूव केवलिवरः श्रीपुण्डरीको गणी, सिद्धोऽङ्गादिविभावभावरहितः सत्पञ्चकोटीयुतः ।
तेनाऽऽख्यातिमवाप सोऽत्र नितरां श्रीपुण्डरीकाख्यया, जीयात् सोऽमृतभोजिनाथमहितः श्रीपुण्डरीकाचलः ॥२॥

कालेऽस्मिन्नपि यस्य दर्शनमरं सद्भावनावर्धकं, किं भक्तेर्विषयीकृतस्तु न तदाऽभीष्टार्थसम्पादकः ।
दृष्ट्वाऽमर्षसमाकुलोऽपि लभते यं शान्तिभावावलिं, स्वीयात्मोन्नतिकृत् सदा विजयते स श्रीदशत्रुञ्जयः ॥३॥

आनन्दावलिमाप्य सङ्कलिता यत्रैत्य भव्यात्मनो, मन्वाना द्रविणाप्तिमात्मविहितां सन्न्यायमार्गानुगाम् ।
साफल्यान्वयितां गतां भविजना आदीशपादार्चनाद्, धन्यां पल्वलसन्निभं विदधते संसाररत्नाकरम् ॥४॥

ॐ✦ॐ

## ॥ ६. श्रीपार्श्वनाथस्तोत्रसन्दोहः ॥

### ॥ श्रीत्रिप्रभुस्तोत्रम् ॥

श्रीशान्तिनाथतीर्थेशं, नत्वा गुरुपदाम्बुजम् ।
त्रिप्रभुस्तोत्रमाधास्ये, भद्राय स्वपरात्मनाम् ॥१॥
जय श्रीसिद्धचक्रेश ! विघ्नतापशमाम्बुद ! ।
मंगलादिदसन्नाम !, भवाब्धौ पोतसन्निभ ! ॥२॥
चित्रं पश्यत भो भव्याः !, पूजैकाऽपि करोति किम् ।
अस्य श्रीसिद्धचक्रस्य, चतुरर्थप्रसाधिका ॥३॥
दानशीलतपोभाव-भेदतोऽयं जिनोदितः ।
चतुर्विधोऽपि सद्धर्मो, साध्यतेऽर्चाविधायिना ॥४॥
दानं मोहपरित्यागो, न्यायद्रव्यव्ययादयम् ।
पुष्पादिकं प्रभोरङ्गे, ढौकते पूजनक्षणे ॥५॥
शोभनाचारिता शीलं, ब्रह्मचर्यात्मकं तथा ।
साधयेत् स प्रशान्तात्मा, पूजाकाले प्रमोदतः ॥६॥
तावन्नाऽश्नाति भक्तोऽयं, कुरुते यावदर्चनाम् ।
साधना तपसो देशा-देवं दानादिसाधना ॥७॥
पूजोद्यतस्य भव्यस्य, भावनाऽप्युज्ज्वला तदा ।
हेत्वधीनोऽनिशं भावो, जायते शास्त्रगीरिति ॥८॥
आयुषश्चञ्चलत्वेऽपि, सद्भाग्यं मेऽद्य हे प्रभो ! ।
पूजनावसरो लब्धो, यद् मयेत्युत्तमभावना ॥९॥
तव स्नात्रविधानेना-ऽहमप्युज्ज्वलतां गतः ।
पुण्यलभ्यः क्षणोऽप्यस्य, विशुद्धेत्यस्य भावना ॥१०॥
चरित्रं स्मृतिमायाति, तेऽस्य सद्भावनार्चया ।
ततो भेदप्रबोधेन, नरो भवति सिद्धिभाक् ॥११॥

श्रीशङ्खेश्वरनाथाय, महानन्दप्रदायिने ।
कल्याणाङ्घ्रिपमेघाय, चित्रमाहात्म्यशालिने ॥१२॥
सत्प्रातिहार्ययुक्ताय, विश्वदेवातिशायिने ।
अखण्डानन्दरूपायो-ज्जागरस्थितियोगिने ॥१३॥
नयनिक्षेपसद्भङ्गै-र्ध्येयाय शमिनां मुदा ।
नमो देवाधिदेवाय, पदपञ्चकधारिणे ॥१४॥
यस्याऽनुभावतः कृष्णो, जरार्तं कटकं निजम् ।
निरामयं मुदा चक्रे, भक्तिस्तीव्रा न निष्फला ॥१५॥
निश्चलाराधनायोगा-ल्लब्धा सज्जनमन्त्रिणा ।
दुर्लभा निर्विलम्बेन, नैके मन्त्रादिसिद्धयः ॥१६॥
स श्रीपार्श्वजिनाधीशो, साध्यसिद्ध्यभिलाषिणाम् ।
प्रदद्याद् वाञ्छितव्रातं, रक्षतु मां गदापदः ॥१७॥
कर्मजव्याप्यपीडार्तो, दुर्जनशल्यभूपतिः ।
गदध्वंसेच्छया चक्रे, सूर्यबिम्बस्य साधनाम् ॥१८॥
अधिष्ठायकदेवोऽस्यो-वाच प्रत्यक्षगोचरः ।
कर्तुं त्वां गदनिर्मुक्तं, न शक्तिर्मेऽस्ति तादृशी ॥१९॥
याहि शङ्खेश्वरेशान-पार्श्वपार्श्वे स एव ते ।
सर्वाङ्गीणगदान् सर्वान्, अपनेष्यति सत्वरम् ॥२०॥
श्रुत्वेति देववाणी नो, वितथा कर्हिचिद् भवेत् ।
इत्यालोच्य समागत्य, प्रचक्रे वर्यसाधनाम् ॥२१॥
प्रभावादर्हतः सोऽभूत्, निर्गदो हर्षवानपि ।
कदापि निश्चला श्रद्धा, निष्फला न भवेद् यतः ॥२२॥
खेचरेन्द्रौ रविश्चन्द्रः, शक्रः पद्मावती तथा ।
नागेन्द्राद्या मुदोपास्तिं, चक्रिरेऽस्य वरे स्थले ॥२३॥
अन्ये वितेनिरे भक्तिं, ममतां निजसम्पदाम् ।
विहाय बहुमानेना-ऽवञ्चका भद्रकाङ्क्षिणः ॥२४॥
तदनुकृतिमाधाय, विधेयं भव्यभाविभिः ।
श्रीशङ्खेश्वरपार्श्वस्य, स्तुतिध्यानार्चनादिकम् ॥२५॥
जीयात् स्तम्भनतीर्थेशः, पार्श्वनाथो जगद्विभुः ।
यस्तद् दते न यद्दाने, समर्थो नाकिपादपः ॥२६॥
ऐतिहासिकशास्त्रादौ, वर्णनं यस्य वर्णितम् ।
यं श्रुत्वा विबुधाः सर्वे, चित्रमायान्ति चेतसि ॥२७॥
करालभवपाथोधौ, बद्धकर्मनिमज्जताम् ।
जन्तूनां पोतसङ्काशं, स्तौति यः स्तुत्य एव सः ॥२८॥

गुणिनां गुणसङ्गेन, निर्गुणोऽपि गुणीभवेत् ।
तदुत्पत्तिर्विभुस्तोत्रा-दतस्तत् कार्यमङ्गिभिः ॥२९॥
पूजनाज्जायते पूज्यो, ध्यानतो ध्यानगोचरः ।
वन्दनाद् वन्दनीयश्च, दर्शनीयोऽवलोकनात् ॥३०॥
गदितं स्तवनादीनां, फलमेवं जिनश्रुते ।
तथा व्यावर्णितं श्रुत्वा, को न स्याद् भक्तितत्परः ॥३१॥
नश्वरं जीवितं भव्या !, विपाकः कर्मणां तथा ।
भयङ्करः क्षणादूर्ध्वं, भावि किं तन्न बुध्यते ॥३२॥
भोगतृष्णां धिया बुद्ध्वा, श्वभ्रक्लेशप्रदायिनीम् ।
भजतैनं मुदा पार्श्वं, नोचितोऽन्यत्र विभ्रमः ॥३३॥

॥ आर्यावृत्तम् ॥

बाणनिधाननवेन्दु(१९९५)-प्रमिते संवत्सरे च मधुमासे ।
सितपक्षे पञ्चम्यां, त्रिप्रभुस्तोत्रं च **पद्मेन** ॥३४॥
रचित**महमदाबादे**, करणादेतस्य यन्मया लब्धम् ।
पुण्यं तेनाऽस्तु सदा, मङ्गलमाला च सङ्घगृहे ॥३५॥

◆

## ॥ श्रीपञ्चस्तोत्रम् ॥

सिद्धचक्रं मुदा नत्वा, नेमिसूरिपदाम्बुजम् ।
पञ्चस्तोत्रं प्रकुर्वेऽहं, भक्तिभावार्थसङ्गतम् ॥१॥ (अनुष्टुब्वृत्तम्)
पद्मावतीन्द्रवरुण-रामकृष्णादिदेहिभिः ।
पूजितं बहुधा भावात्, **स्तम्भनेशं** सदा स्तुवे ॥२॥
प्रभावाद्भुतलावण्य-निधानं सम्पदां पदम् ।
स्तुतं सद्भिः स्वसिद्ध्यर्थं, नौमि शङ्खेश्वरं प्रभुम् ॥३॥
वन्दे **चारूप**तीर्थेशं, पार्श्वनाथं वरप्रभम् ।
प्रणामादपि यस्य स्युः, सफलाः सन्मनोरथाः ॥४॥
शुक्लध्यानप्रयोगेणा-ऽऽसादितज्ञानसम्पदम् ।
**पञ्चासर**प्रभुं पार्श्वं, प्रणमामि प्रगेऽनिशम् ॥५॥
कर्मबन्धोदयापेतं, सत्तातीतं महाबलम् ।
क्षायिकैश्वर्यसंपन्नं, स्तौमि **सेरीसक**प्रभुम् ॥६॥
चतुर्भङ्गी श्रुते प्रोक्ता, भक्तिप्रणययोरिह ।
त्रिभङ्गपरिहारेण, आद्यो भङ्गः सुखप्रदः ॥७॥
परस्तु मध्यमो ज्ञेयः, परित्यागोऽन्त्ययोर्द्वयोः ।
श्रीमत्तीर्थकृतां पूजा-गोचरेयं विचारणा ॥८॥

त्रिधा दानमिवाऽर्चाऽपि, सात्त्विकी प्रथमा परा ।
राजसी तामसी चाऽन्त्या, भाव्याऽऽराध्यादिमा परम् ॥९॥
गुरूणां नेमिसूरीणां, पूज्यानां सत्प्रभावत: ।
**पद्म**सूरि: महानन्दात्, पञ्चस्तोत्रं व्यधान्मुदा ॥१०॥

◆

## ॥ श्रीस्तम्भनपार्श्वनाथचरित्रस्तोत्रम् ॥

श्रीशङ्खेश्वरपार्श्वेशं, महानन्दार्थदायकम् ।
नत्वा श्रीनेमिसूरीशं, स्तुवे श्रीस्तम्भनाधिपम् ॥१॥ (अनुष्टुब्वृत्तम्)

आचार्याभयदेवसूरेरगदापेतो बभूवाऽम्बुभि-र्यत्स्नात्रस्य च देदसाधुरपि यद्ध्यानादभूद्धर्षभाग् ।
भक्त्याऽऽखण्डलनाकिभूमिपतयो यं काश्यपीमण्डन-मानर्च स्मृतिमात्रतोऽप्यसुभृतां यस्याऽनपाया: श्रिय: ॥२॥
(शार्दूलविक्रीडितवृत्तम्)

अज्ञानोपचिताघसंहतिहरं यस्याऽस्ति सद्दर्शनं, यत्सान्निध्यबलेन विघ्नविकला सत्साध्यसिद्धिर्द्रुतम् ।
तस्याऽनेकमहाप्रभावकलितश्रीपार्श्वनाथप्रभो-र्वृत्तान्तं रचयामि कर्णसुखदं प्रोल्लाससम्पादकम् ॥३॥
धन्यास्ते त्रिदशाधिपामरनृपा अन्येऽपि येऽनारतं, स्वात्मोन्नत्यभिलाषया विदधते ध्यानावगाहं मुदा ।
पूजां विघ्नविदारिणीं सुमनसां भेदप्रभेदानुगां, नाट्यं रावणवज्जिनेशपददं स्तोत्रं सुपर्वेशवत् ॥४॥
बिम्बं तेऽनुपमानुभावललितं भावापहं शावहं, ज्ञात्वा सद्बहुमानपूर्णवरुणो वर्यामरो हर्षत: ।
भक्त्यैकादशलक्षवर्षसमयं संस्थाप्य सिंहासने, वर्यं सात्त्विकपूजनं प्रविदधे सद्दर्शनाधायकम् ॥५॥
सोऽयं पश्चिमलोकपाल इति सन्नाम्ना श्रुते विश्रुत:, श्लाघ्य: किं न वरेण्यविज्ञगुणिभिर्यस्याऽऽस्पदेऽयं प्रभु: ।
स श्रीदाशरथि: प्रमोदकलितो वर्यं चकाराऽर्चनं, मासान् सप्त दिनान् नवैव पुरुषादेयार्हत: श्रीविभो: ॥६॥
अब्दाशीतिसहस्रवर्यसमयं सेवां निवासे स्वके, चक्रे श्रीधरणेन्द्र आप्तप्रणयी प्रीतामृतानुष्ठिति: ।
चित्तोल्लासयुतोऽथ भूरिसमयं शक्रो विधायाऽर्हणां, मेने स्वर्गजशर्म तुच्छतृणवत् पर्यन्तखेदावहम् ॥७॥
श्रीमन्नेमिविभुर्भवत्वविकलानन्दाय भव्यात्मनां, यस्याऽऽस्याम्बुजतो निशम्य विशदां पार्श्वप्रभावस्थितिम् ।
कृष्ण: क्षायिकदर्शनोऽथ निलये मूर्तिं निधायोत्तमे, दध्यौ चित्रकरं स्वरूपममलं कृत्वा सपर्यां विभो: ॥८॥

चतुर्विंशतिनामादौ, प्रबन्धे नाम वीक्ष्यते ।
कृष्ण इत्यभिधानस्य, स्थाने नेमिप्रभो: पितु: ॥९॥ (अनुष्टुब्वृत्तम्)
इत्थं स्वर्गिविमानादौ, प्रभुस्थित्यादिदर्शक: ।
प्राप सम्पूर्णतामाद्यो-ऽधिकारो हर्षदायक: ॥१०॥
श्रेष्ठिसागरदत्तेन, त्रिदशाधिष्ठितोत्तमा ।
मूर्ति: श्रीपार्श्वनाथस्य, कथं प्राप्ताऽतिशायिनी ॥११॥
तस्य प्रौढप्रतापेन, श्रीनागार्जुनयोगिन: ।
कथं काञ्चनसिद्धिश्च, प्रकारान्तरगर्भिता ॥१२॥
सान्यग्रन्थपरामर्श:, पूर्वोक्तार्थनिवेदक: ।
अधिकारो द्वितीयोऽयं, वर्ण्यते विधिया मया ॥१३॥

चक्रे हास्यमृषेः कुतूहलरतास्ते यादवा मद्यपाः, क्रोधाच्छापमदात् स येन सपदि श्रीद्वारिका ज्वालिता ।
प्राकारात्ययतश्च वार्धिकजलैस्तन्मदिरं मज्जितं, श्रीबिम्बं तदवस्थमब्धिनिलयं जज्ञे तदा स्वास्थ्यदम् ॥१४॥
श्रेष्ठी सागरदत्त इत्यभिधया ख्यातः स पोतव्रजं, लात्वाऽम्भोधिपथा जगाम निभृतं पण्यैरभीष्टस्थलम् ।
देवः कोऽप्यचलं चकार सुरुचिस्तं मध्यभागेऽम्बुधे-र्दृष्ट्वैतां भयदां स्थितिं स विदधे तत्कारणान्वेषणम् ॥१५॥
अत्राऽर्हत्पतिबिम्बमेवममरः स्पष्टं बभाषे तदा, तच्छ्रुत्वाऽमरवाग् भवेन्नवितथेत्यालोच्य हर्षं दधौ ।
तन्निष्कास्य सरित्पतेरनुपमं सप्तामसूत्रैर्बहि-र्भक्तः पोतवणिङ् मुमोच विनयात् कूलेऽथ वामाङ्गजम् ॥१६॥
बिम्बं स्वप्रभयाऽद्भुतं गतमलं श्रेष्ठी निरीक्ष्याऽमिता-नन्दस्तत्र सिषेच भद्रविटपिन्यर्चाम्बुधारा विधेः ।
नीत्वा कान्तिपुरीं स्वधामप्रवरं संस्थाप्य हर्यासने, प्रोल्लासाद् द्विसहस्रवर्षसमयं मेहुर्मुदेभ्यादयः ॥१७॥
प्रापुस्तत्फलमुन्नतं यदुत पूर्वं वर्यभावावली-रासाद्याऽशुभकर्मतीव्ररसविध्वंसं द्रुतं चक्रिरे ।
सत्कर्मापचयं प्रवाहपतितं भेदोपलब्धिं वरां, योगावञ्चकतां विभावदलनं मूलस्वभावस्थितिम् ॥१८॥
सान्निध्येन सुनाकिनश्च तदितो नागार्जुनः स्थानत, आनीयाऽथ निधाय पावनतमे सेढीतटीये स्थले ।
तस्याऽनादिमलापनोदबलवन्माहात्म्यबिम्बस्य सद्-ध्यानार्चादिमतिश्चकार विशदां गाङ्गेयसिद्धिं वराम् ॥१९॥

प्रभावकचरित्रेऽयं, विशेषोऽत्र निरीक्ष्यते ।
भव्यास्तं श्रुणुताऽऽह्लादा-दैतिहासिकबोधदम् ॥२०॥ (अनुष्टुब्वृत्तम्)

श्राद्धः कान्तिपुरीनिवास इह यो नाम्ना धनेशोऽभवत्, सन्नौकामुपविश्य सोऽन्यविषयं वाणिज्यकार्थं ययौ ।
चक्रे तामथ निश्चलामिह सुरोऽधिष्ठायको भक्तिमान्, तत्पूजाधिगतस्य तस्य वचसा निष्कास्य बिम्बत्रयम् ॥२१॥
(शार्दूलविक्रीडितवृत्तम्)
तत्रैकं वरपत्तने स्थितिगतं नेमिप्रभोर्मन्दिरेऽ-न्यत्पुण्योदयदर्शनं प्रशमदं चारूपतीर्थे वरे ।
भाग्यासाद्यमतिष्ठिपद्धितकरं सेढीतटे चाऽन्तिम-माचार्याभयदेवसूरिविशदव्यावर्णनात् तद् ब्रुवे ॥२२॥

हिरण्यसिद्धावन्योक्तिः, श्रीनागार्जुनयोगिनः ।
तद्देशवासिलोकेभ्यो, भाष्यते या मया श्रुता ॥२३॥ (अनुष्टुब्वृत्तम्)

श्रीपेशावरसन्निधौ जनपदस्तत्तायफादेहिनां, श्रीपार्श्वस्य च तत्र मन्दिरमभून्नागार्जुनाख्ये गिरौ ।
सा सेढी च तदन्यमार्गगतिका पार्श्वप्रभावात् खलु, मन्ये वन्दनछद्मना सरिदकार्षीत् तीर्थपावग्रहम् ॥२४॥
(शार्दूलविक्रीडितवृत्तम्)
तत्रोपास्तिविधौ नितान्तनिरतो योगी द्विधा निश्चलो, लेभेऽष्टापदसिद्धिमिष्टफलदामन्यासुभृद्दुर्लभाम् ।
श्रीमत्स्तम्भननामतीर्थममलं भूरिप्रसिद्धिं ययौ, भक्तानां यदभीष्टसार्थममलं दातुं सदा प्रत्यलम् ॥२५॥

कामकुम्भादयोऽप्यर्था, ऐहिकाभीष्टदायिनः ।
श्रीपार्श्वस्तूभयार्थानां, दायकोऽन्यन्निरर्थकम् ॥२६॥ (अनुष्टुब्वृत्तम्)
तस्य प्रादुष्कृतौ शास्त्रे, प्रोक्तमस्ति मतद्वयम् ।
तत्राऽऽदौ प्रथमं वक्ष्ये, सङ्क्षिप्तं भक्तिगर्भितम् ॥२७॥

पुण्यं चेत् प्रबलं करोति पशुरप्याश्चर्यदां कां कृतिं, गौरेकेह चचार निश्चितहिता यत्र स्थिताऽर्चा विभोः ।
सेयं पांशुजराशिना विपिहिता नाऽऽलोक्यते चक्षुषा, कर्तुं स्नात्रमिवाऽतनीदिह पयोधाराः स्तनेभ्योऽसिता ॥२८॥
(शार्दूलविक्रीडितवृत्तम्)

गोपस्तां च यदा दुदोह समये गेहागतां नो तदा, दुग्धं प्राप च बिन्दुमात्रमपि स श्रान्तो विपद्भागभूत् ।
अप्यन्तर्मम धेनुमुत्तमतमां को दोग्धि दध्याविति, तस्येत्थं परिचिन्तनार्त्तमनसः काले प्रभूते गते ॥२९॥
तत्पश्चाद्गतिना प्रबुद्धमखिलं तेन प्रशान्तोऽभव-न्मीमांसामकरोदितीह किमिदं चित्रं गतश्चेतसि ।
वर्यार्हत्प्रतिमां ददर्श विदधानस्तत्स्थलं निर्मलं, कोऽर्थोऽयं मम हर्षदोऽस्ति नितरां पप्रच्छ विज्ञानिति ॥३०॥
श्रीमत्स्तम्भनतीर्थपार्श्व इति निश्चिक्यौ तदुक्ते रय-मन्यत्र प्रससार वर्णनमिदं तस्य प्रयत्नाद् द्रुतम् ।
जातो मेऽभ्युदयोऽद्य जन्म सफलं संपन्नमालोकना-दस्याऽग्रे त्रिदशद्रुमोऽपि लघुतां धत्तेऽत्र नो संशयः ॥३१॥
निःशेषाण्यपि कामितानि नितरां पूर्णानि तूर्णं द्विधा, दौर्भाग्याधिगदादयोऽप्यशुभदा भावा विनष्टा मम ।
प्रोद्दामाद्भुतसत्प्रभावविसरं वक्तुं प्रभोरस्य नो, शक्तिर्नाकिगुरोरपीह न भवेद् दध्याविदं चेतसि ॥३२॥
तस्याऽऽश्चर्यविधायकस्य जगति श्रीपार्श्वनाथप्रभो-राचार्याभयदेवसूरिरिह स प्रादुष्कृतेः कारकः ।
आचार्येशजिनेश्वरोऽप्रवरसद्व्याख्यानकर्ता श्रुतः, तच्छिष्यत्वमिहोल्लिलेख रचिताङ्गीयासु टीकासु यः ॥३३॥

इत्यन्ये कथयन्तीति, बिम्बं प्रादुश्चकार सः ।
कथमित्युत्तरं दातु-मथ वक्ष्ये मतं परम् ॥३४॥ (अनुष्टुब्वृत्तम्)

सूरिः सोऽनशनं चकाङ्क्ष समये पीडात्ययो मे यथे-त्याकूतात् स्वमनोरथश्च प्रकटीचक्रे दिनान्ते पुरः ।*
सूरिः सोऽनशनेच्छुरित्यनुचितं कुष्ठोपशान्तिर्मया, कार्यैष्यत्यगदो यतो गुरुरयं धर्मो ममाऽखण्डितः ।
एवं चाऽऽशु विचार्य रात्रिसमये प्रादुर्बभूवाऽमरी, स्वप्ने द्योतितदिक् प्रसन्नवदनाऽवादीद् गुरुं भक्तितः ॥३६॥
कार्यं नोऽनशनं मुनीश! भवता तीर्थैकरक्षाकृता-ऽहं ज्ञात्वाऽवधिना ब्रुवेऽमृतकराद् वो शासनस्योन्नतिः ।
भव्यानन्दकरी भविष्यति तथा सद्देशनावारिभि-र्भव्यान् कर्मविपाकभूरिमलिनानाधास्यथ प्रोज्ज्वलान् ॥३७॥
एताः कोक्कडिका नवोद्यत! विधावुत्खेलय श्रीगुरो!, देहो मेऽस्त्यधुनाऽमयार्तिहुतभुग्दंदह्यमानो भृशम् ।
शक्तिश्चालयितुं न येन करमप्यल्पाऽपि संवर्तते, तेनोत्खेलनमादधातुमबलस्तासां गुरोर्वागिति ॥३८॥
साऽथोवाच नवाङ्गवृत्तिकरणं काले मुदा भाविनि, स्वाधीनं तव भव्यबोधललितं तस्याऽग्र एतत्कियत् ।
दीर्घायुर्भवतो न कापि भवता चिन्ता विधेया हृदि, मौनीन्द्रागमवृत्तिसाधनबलं मे नाऽधुनेति(?) च गुरुः ॥३९॥
देवी वक्ति वरेण्यनम्रवचनं खेदो न कार्यस्त्वया-ऽऽयाताऽस्म्यामयनाशहेतुममलं वक्तुं च पार्श्वे तव ।
तत् तं स्वास्थ्यमुपागतः शृणु मुदा भाषेऽहमानन्ददं, षण्मासावधिकं विधेयममलाचाम्लाभिधं सत्तपः ॥४०॥
इत्युक्त्वा प्रणतिं विधाय निजकं स्थानं जगामाऽमरी, आचम्लानि चकार हृष्टहृदयो सूरिः क्रमेणाऽगदः ।
सद्वृत्तीः प्रणिनाय वर्यविमलाङ्गानां नवानां ततः, ता अस्मिन् समयेऽङ्गिबोधकुशला दैवीयसांनिध्यजाः ॥४१॥
देहे साऽभयदेवसूरिसुगुरोः प्रादुर्बभूवैकदा, नागेन्द्रोऽपजहार तं प्रबहुमानीदं बभाषे पुनः ।
सेढीभूस्थितपार्श्वबिम्बममलं प्रादुष्कुरु त्वं मुदा, यच्चिन्तामणिरत्नतोऽप्यधिकसत्प्रौढप्रभावान्वितम् ॥४२॥
तस्य स्नात्रजलेन कुष्ठविलयो देहः समर्थस्तथा, चिह्नं तत्र वदामि धेनुरमलैका च स्वभावात् पयः ।
धारा यत्र विधास्यति प्रमुदिता बिम्बस्थलं तद् वरं, श्रुत्वेदं धरणेन्द्रभक्तिवचनं हृष्टा अभूत् सूरयः ॥४३॥
श्रीसङ्घं सकलं गुरुश्च कथयामासोपश्रुत्याऽथ सः, प्रोल्लासाच्च जगाद तत्र गमनेच्छा नोऽधुना वर्त्तते ।
सानन्दाः समुपाजगाम (समुपाययुः सु)गुरवः सङ्घान्वितास्तत्स्थले,
यत् सत्किंशुकवृक्षसन्निधिगतं गोपालबाला जगुः ॥४४॥

* प्रथमावृत्तौ ३५तमश्लोकस्योत्तरार्धं न मुद्रितम् ।

जयत्रिभुवनस्तोत्रं, प्राणैषीत् सूरिशेखरः ।
त्रयस्त्रिंशत्तमं काव्यं, पठन् पार्श्वं ददर्श च ॥४५॥ (अनुष्टुब्वृत्तम्)
दृष्ट्वा जहर्ष नीरोगो-ऽभूत् सङ्घो बिम्बवर्णनम् ।
श्रुत्वा संवासयाञ्चक्रे, तत्र स्तम्भनकं पुरम् ॥४६॥
ऋषिकायाग्निचन्द्राङ्क(१३६७)-प्रमितान् वत्सरानिह ।
स्थितं वामेयसद्बिम्बं, तदनूपद्रवात् पुनः ॥४७॥
गजकायात्रिचन्द्राङ्क(१३६७)-प्रमिते वत्सरे च तत् ।
स्तम्भतीर्थवरोत्तंसं, सञ्जातं बिम्बमद्भुतम् ॥४८॥
उज्जयन्तगिरेर्लेखाद्, ज्ञायते प्रोक्तवर्णनम् ।
काले श्रीहेमचन्द्रादे-स्तदभूत् स्तम्भनस्थितम् ॥४९॥
चतुर्विंशतिकायां चा-ऽतीतायां षोडशप्रभुः ।
तीर्थेशो नमिनाथाह्वः, सञ्जातस्तस्य मुक्तितः ॥५०॥
द्वाविंशतिशताब्देषु, द्वाविंशत्यधिकेषु च ।
गतेषु श्रावको जात, आषाढी धार्मिकोत्तमः ॥५१॥
पार्श्वबिम्बत्रयं तेन, कारितं हितकाङ्क्षिणा ।
तत्राऽऽदिमं चारुपाख्ये, तीर्थे शङ्खेश्वरे परम् ॥५२॥
नीलद्युति तृतीयं च, स्तम्भनाख्यपुरे वरे ।
स्थापितं वर्त्तते तच्च, स्तम्भतीर्थेऽधुना वरे ॥५३॥
श्रीमत्स्तम्भनपार्श्वेश-पार्श्ववर्त्तिप्रभोरिमम् ।
वामेयस्य वरं लेखं, प्रेक्ष्य सम्भाषितं मया ॥५४॥
परमन्येषु शास्त्रेषु, प्रोक्तं दामोदराभिधः ।
चतुर्विंशतिकायां चा-ऽतीतायां तीर्थनायकः ॥५५॥
समये तस्य चाऽऽषाढी, मूर्तिं शङ्खेश्वरार्हतः ।
पार्श्वस्य कारयामास, भव्याब्जाहर्मणेर्वराम् ॥५६॥
तस्येत्थं वर्णनं बोध्यं, श्रीदामोदरतीर्थपम् ।
अप्राक्षीदेवमाषाढी, प्राञ्जलिर्मुदिताशयः ॥५७॥
कमालम्ब्य कदा कस्मिन्, तीर्थेऽहं मुक्तिसम्पदम् ।
प्राप्स्यामीति तदोवाच, श्रीमानर्हंस्तदुत्तरम् ॥५८॥
चतुर्विंशतिकायां च, भाविन्यां पार्श्वशासने ।
श्रुत्वाऽर्हद्देशनां भूत्वा, गणभृत् तवं गुणोत्तमः ॥५९॥
सिद्धो भविष्यसीत्येवं, स्मृत्वोपकृतिमर्हतः ।
श्रीमत्पार्श्वस्य सद्बिम्बं, कारयामास भक्तितः ॥६०॥
हरिखेचररात्रीशाः, श्रीभानुसज्जनादयः ।
चक्रिरे द्विविधां भक्तिं, कृष्णोऽकार्षीद् बलं निजम् ॥६१॥

सज्जं सोऽरिं जिगायाऽतः, श्रीशङ्खेश्वरनामतः ।
पुरं संवासयामास, पार्श्वबिम्बं च मन्दिरे ॥६२॥
उल्लासात् स्थापितं तेन, तत् प्रसिद्धं पुराख्यया ।
ऐतिहासिकग्रन्थेभ्यः, सङ्गृह्येदं प्रकीर्त्तितम् ॥६३॥
उपदेशसप्ततिका-ग्रन्थे चैवं निरीक्ष्यते ।
अस्यादिर्ज्ञायते नैव, इत्थमप्यपरे जगुः ॥६४॥
श्रीकुन्थुनाथतीर्थेश-वारके मम्मणाभिधः ।
श्रेष्ठी पप्रच्छ विश्वेशं, कदा लप्स्ये शिवास्पदम् ॥६५॥
उवाचाऽर्हन् महाभाग!, सत्तीर्थे त्वमनागते ।
श्रीपार्श्वनाथदेवस्य, मुक्तिं प्राप्स्यसि निश्चयात् ॥६६॥
एवमाकर्ण्य हर्षेण, कारितं तेन तत्प्रभोः ।
न्यायोपात्तार्थजातेन, बिम्बं वाञ्छितदायकम् ॥६७॥
जय त्वं स्तम्भनाधीश!, प्रातिहार्यविभूषित! ।
निजानन्दरमारक्त!, विश्वबन्धो! जिनेश्वर! ॥६८॥
प्राचीना ग्रन्थकारा ये, साध्यसिद्धिप्रदायकम् ।
त्वां मत्त्वा ते प्रकुर्वन्ति, ग्रन्थादौ तव मङ्गलम् ॥६९॥
सद्भक्तिभावसंपन्नाः, कुर्वते वन्दनाः स्तुतीः ।
त्वन्निश्चलाश्रिताः षट्सु, मासेषु स्युः कृतार्थकाः ॥७०॥
आसाद्य त्रिपुटीशुद्धं, धर्मं कर्मविचित्रताम् ।
ज्ञात्वा हेयादिनिःस्यन्दं, विवेकिसात्त्विकाशयाः ॥७१॥
भो भव्या! भावतो त्यक्त्वा, विषयान् काचसन्निभान् ।
अप्रमत्तस्वभावेन, श्रीमत्पार्श्वजिनेशितुः ॥७२॥
भक्तिं कुर्वन्तु धैर्येण, स्वकीयाः सम्पदो यतः ।
दासीभवेयुरल्पेन, कालेनाऽऽपत्तिसंक्षयः ॥७३॥
बाणनिधाननवेन्दु(१९९५)-प्रमिते वर्षेऽक्षयतृतीयायाम् ।
श्रीमदहमदाबादे, जैनपुरी**राजनगरा**ख्ये ॥७४॥ (आर्यावृत्तम्)
श्री**नेमिसूरि**चरणा-म्भोजालिसमान**पद्म**सूरिरिदम् ।
स्तम्भनपार्श्वचरित्र-स्तोत्रं प्रणिनाय मोदेन ॥७५॥

◆

## ॥ श्रीसेरीसकपार्श्वनाथस्तोत्रम् ॥

सिद्धं सिद्धिनिदानमीज्यमसमं श्रीसिद्धचक्रं तथा, विद्वद्वर्यसमर्च्यपादकमलं श्रीनेमिसूरीश्वरम् ।
वाचं तीर्थकृतां पदत्रयमिति स्वाभीष्टसम्पादकं, वन्दित्वा वितनोमि शान्तिसुखदां सेरीसकार्हत्स्तुतिम् ॥१॥
(शार्दूलविक्रीडितवृत्तम्)

चित्रार्हं विदुषां विधेयमिह मे यद्यप्यबुद्धेरपि, नाऽशक्यं महनीयभक्तिवशतो मन्ये तथापीप्सितम् ।
प्रायासश्च शुभे यथार्हमखिले कार्यः सदा सिद्धये, आलोच्येत्युचितं स्वचेतसि मुदाऽहं संप्रवर्त्तेऽत्र च ॥२॥
अन्याभाजनशिष्टसंस्थविदिताचाराप्तसन्माननं, भव्यानां हितकाङ्क्षयोन्नतिकरं मार्गं दिशन्तं प्रभुम् ।
संसृत्यागतिबीजसार्थविकलं स्वाभाविकाब्जालयं, भव्याम्भोजविकासनेनमखिलाप्ताधीशपार्श्वं स्तुवे ॥३॥
भाग्याभावबलान्न याथ विभवो! यूयं ममाऽक्ष्णोः पथं, मूर्तिः साऽऽत्मिकहर्षदा तदपि वो मादृग्जनोद्धारिणी।
या नीचैःकृतकामकुम्भसुरशाख्याद्योपमा मुक्तिदा, ये तां नाऽत्र विलोकयन्त्यपि वराकास्ते कृपार्हा मम ॥४॥
ध्यात्वा त्वां परिणाशितान्तररिपुं भावाम्बुजाल्याश्रयं, नाऽन्यत्र व्रजति प्रकोपविरहं चेतश्चलं मेऽधुना ।
त्वद्ध्यानं दुरितापहं शिवलताकन्दं तदा भासते, चेतश्चेतयतेऽनिशं मम मतं तच्चारु संपद्यताम् ॥५॥
भक्तिं भावभराद् विधाय विशदां भ्राजिष्णुनाकीश्वराः, तेऽकामस्य निजर्द्धिमोहविकला धन्याः पवित्राशयाः।
मत्वा तं समयं महोदयमयं तां कामयांचक्रिरे, तत् सत्यं हि सुधां विहाय जलधेर्नीरं क इच्छेन्नरः ॥६॥
सत्यानन्दजगद्गुरो! जिनपते! गीर्वाणपूज्यक्रम !, विज्ञाताखिलभावसार! खदमिन्! तुभ्यं नमस्ते नमः।
साफल्यं समभूत् नोरिह ममाऽद्येत्थं तवोपास्तितः, शस्यं तत्र विनश्वरं च सकलं वित्तादिसार्थं तथा ॥७॥
संप्राप्याऽवसरं निजात्महितगाः संविग्नभव्या जना, धर्माराधनसारमानुषभवं लक्ष्मीं तथा चञ्चलाम् ।
मत्वाऽर्चाविनियोगहृष्टकरणाः त्वां पूजयित्वाऽऽदरात्, प्रीते रङ्गतरङ्गसङ्गकलितास्तन्वन्ति सद्भावनाम् ॥८॥
संसाराम्बुधिमग्नतारक! विभो! किं विस्मृतस्ते जनः, सद्भावान्वितकिङ्करस्य विहितो लोकत्रयानन्दन!।
येन ख्यातदयालुनोद्धृतिविधावर्हन्! विलम्बस्त्वया, युक्तं तन्न भवादृशां शरणमेवाऽऽप्ते विधातुं जने ॥९॥
मां यूयं न च तारयिष्यथ तदाऽन्ये तारका सन्ति के, लोभान्धा अपरेऽङ्गनारतरता लब्धा पराधीनताम् ।
केचिच्छत्रुविघातनेऽतिनिपुणाश्चापादियुक्तास्तथा, प्रोक्तादेकमपि प्रमोदहरणं युष्मासु नो वीक्ष्यते ॥१०॥
संपद्येत यथा तडागकमलोल्लासो न सूर्यं विना, अन्ये नो वितरन्ति शुद्धसमयस्याऽर्थं न सूरिं विना ।
दत्ते वाचकमन्तरेण न परे सूत्रस्य सद्वाचनां, नो मे विश्वनिरीहयोगिपरमं सिद्धिस्तथा त्वां विना ॥११॥
दोषोऽयं किमु कर्मणां किमथवा कालस्य मेऽभव्यता, सद्भक्तिस्त्वयि तादृशी न भुवनालङ्कार! किंवाऽचला।
लीलानिर्दलितोद्धताहितततेः! गाम्भीर्यवीर्यान्वित !, यन्नाऽद्यापि करोषि नाथ! सफलां त्वं प्रार्थनां मत्कृताम्॥१२॥
जानीथ स्फुटमेव नाऽन्यशरणं त्यक्त्वा मम त्वां प्रभो !, त्वं माता च पिता त्वमेव सुगुरुस्त्वं मेऽधिपो जीवितम्।
बन्धुस्त्वं दुरितावको यतिपते! कल्याणमित्रं तथा, ध्येयस्त्वं रिपुजापकस्त्वमनिशं पूज्योऽपि निस्तारकः ॥१३॥
भूमौ मीन इव म्रियेऽवगणितो दीनस्त्वयाऽऽशाहतः, विश्वत्राणविधायक! त्वमधुना त्रायस्व कृत्वा कृपाम्।
चित्तं मेऽब्जनिभं त्वयीश! तरणौ दृष्टे महानन्ददे, प्राप्नोत्याशु विकासमर्हपरिणामौघं समासादयत् ॥१४॥
बर्ही कृष्णघटाकुलाभ्रनिचयान् दृष्ट्वा यथा मोदते, वीक्ष्याऽनुष्णरुचिं प्रपूर्णकिरणं लोके चकोरो यथा ।
मच्चेतो विशदाननं ननु तथा त्वां तथ्यमोदावहं, मूर्खोऽयं मुखरो जनोऽत्र भवतीक्षित्वा प्रमोदान्वितः ॥१५॥
नाथाऽयुक्तिगभाषिणं न जिनपोपेक्षध्वमेनं जडं, मत्त्वोत्तानधियो हि यूयमधिपा नम्रे बुधा वत्सलाः ।
आज्ञां तव मेऽपि किं विमलसद्वृत्ते विकल्पो विभो !, येनैवं गदतो न चापि विबुधान्तःस्थोत्तरं दीयते ॥१६॥
सूनुः किं न करोत्यलीकमुखरोऽपीशाऽऽलजालं पठन्, तातं विस्तृतबोधवर्य! नितरां नन्दातिरेकाकुलम् ।
जल्पाकोऽनुचिताभिलापनिकरैः किं ते जनोऽयं तथा, तोषं वर्धयते नवेति करुणामाधाय संकथ्यताम् ॥१७॥
संसारान्तमुपागते त्वयि महाभागासितुं वीक्षित, आसक्तिः क्षणमेकमप्यप्रशमे संपद्यते नो भवे ।
किं त्रातर्करवाणि किन्तु रिपवो मां संरुणद्ध्यान्तरा, मोहद्वेषरतिप्रहास्यमदनक्रोधप्रपञ्चादयः ॥१८॥

स्वामिन्! तान् विनिवारयाऽऽन्तररिपून् कारुण्यमाधाय मे, येनाऽऽयामि तवान्तिकेऽहममदोऽनन्तोल्लसद्वीर्यवान्।
स्वाधीनोऽस्ति भवोऽपि धीर! तव चाऽऽयत्तं भवोत्तारणं, निस्तारे च विधीयतेऽत्र विफलः क्षेपः किमेवं स्थिते ॥१९॥
एवं चाऽनवसानप्रौढगुणसम्भारेश! पार्श्वप्रभो!, सोऽयं ते स्तवने वदिष्यति कियन्मन्दावबोधो नरः ।
देवं त्वां तव वर्यशासनमहं श्रीनेमिसूरिं गुरुं, याचित्वेति भवे भवेऽथ विरमे यावन्न मुक्तिर्मम ॥२०॥
श्रीमद्वीरपरम्पराध्वविदिते गच्छे तपानामनि, पूज्यश्रीगुरु**नेमिसूरि**चरणाम्भोजप्रसादान्मया (दात् शिशुः) ।
संवद्बाणनवाङ्कचन्द्र(१९९५)गतवैशाखे तृतीयातिथौ, स्तोत्रं पार्श्वविभोश्चकार विशदं श्री**पद्मसूरी**ष्टदम् ॥२१॥

◆

## ॥ श्रीसेरीसापार्श्वनाथाष्टकम् ॥

स्मृतेर्नाम्नो यस्य प्रभवति महासिद्धिरखिला, प्रभावाढ्या मूर्त्तिः प्रशमविशदास्तिक्यफलदा ।
सदाऽर्च्या देवेन्द्रैर्नरपतिभिरानन्दनिवहैः, स्तुवे श्री**सेरीसापति**महमनन्तार्थकलितम् ॥१॥ (शिखरिणीवृत्तम्)
वरेण्यलक्षणाञ्चितेष्टवाग्गुणालिभूषितं, विशुद्धबोधमालिनं प्रशस्तवर्णभासुरम् ।
भवाब्धिपारदायिनं परोपलक्ष्यभावनं, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥२॥ (पञ्चचामरवृत्तम्)
गुणालयक्रमाप्तदर्शनादिमुक्तिसाधनं, सुदृष्टिभावभावितं सुनिश्चितार्थदेशकम् ।
समीष्टदानकल्पपादपं मनोमलापहं, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥३॥
सदष्टप्रातिहार्यशोभितातिशायिसद्गुणं, समस्तविघ्नवारकं सुसम्पदालिधारकम् ।
दयासुधर्मदाननीरसात्त्विकप्रमोददं, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥४॥
समानसं समानमिज्यपाददिव्यदर्शनं, विशिष्टभावनाबलाप्ततीर्थकृत्त्वसम्पदम् ।
चरित्रसाद्यनन्तभङ्गसिद्धिसौधसङ्गतं, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥५॥
विवर्णवर्यमध्यमोरुवैखरीवचोगतं, विदेहजीवनं परात्मभावसम्पदं गतम् ।
विपत्तिदानवीरमोहवार्धिमग्नतारकं, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥६॥
विनष्टदोषसन्ततिं चिताष्टकर्मशोधकं, जगत्स्वरूपभासकं समोपसर्गवारकम् ।
विनाथनाथलोकबन्धुदेशनोपकारकं, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥७॥
अहं तवाऽस्मि किङ्करो मम त्वमेकनायकः, न भास्करादृते यमीश! वारिजौघबोधनम् ।
यथा तथा त्वयाऽन्तरा ममाऽपि निर्वृतिः कथं ?, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥८॥
जगद्गुरौ विलोकिते त्वयि प्रमोददायके, चलं मनः स्थिरं भवेत् किमत्र संशयास्पदम् ।
स्वभावसिद्धिलाभदो भवेशपार्श्व! सर्वदा, भजामि पार्श्वनाथमिष्टदायिनं तमन्वहम् ॥९॥

॥ प्रशस्तिश्लोकद्वयम् ॥

इत्थं गीतगुणावलिर्विजयते सेरीसकस्थप्रभुः, स्तोत्रं मङ्गलसिद्धिवृद्धिकरणं भव्याः पठन्तु प्रगे ।
पूज्यश्रीगुरु**नेमिसूरि**चरणाम्भोजानुभावाद् वरे, **धोलेरा**भिधबन्दरे प्रविदिते प्राचीनतासुन्दरे ॥१॥
(शार्दूलविक्रीडितवृत्तम्)
नन्दद्वीपनिधीन्दुमानप्रमिते(१९७९) संवत्सरे वैक्रमे, धन्ये पावनमार्गशीर्षप्रथमाहन्येकभक्त्या मया ।
विज्ञप्त्या **विजयो**त्तरस्य शमिनोऽर्हद्भक्त**वाचस्पतेः**, ध्येयार्हत्पदपद्म[भृङ्ग]गणिना पार्श्वाष्टकं निर्मितम् ॥२॥
(युग्मम्)

◆

## ॥ श्रीकार्पटहेटकतीर्थमण्डन-स्वयम्भूपार्श्वनाथस्तोत्रम् ॥

विमलकेवलचिद्वरभूषितो, सकलकर्मलयाप्तमहोदयः ।
विषमवृत्तिविलासपराङ्मुखो-ऽमितविशिष्टगुणव्रजशोभितः ॥१॥ (द्रुतविलम्बितवृत्तम्)
भविमनोऽब्जविकासनभास्करः, सकलसङ्कटकाष्ठभरानलः ।
जिनवरेण्यभुजङ्गफणाञ्चितो-ऽगणितशर्मदमुक्तिनिकेतनः ॥२॥
भवकरालपयोनिधिनौनिभः, समसमीहितदानसुरद्रुमः ।
मरुविभूषणकार्पटहेटके, मम स पार्श्वजिनोऽस्तु सदा मुदे ॥३॥
सद्बोधास्पदतीर्थनाथसुरवारेज्यक्रमेन्दीवरो, भव्यप्राणिकलापदिव्यगुणसंपत्त्यागसंप्रत्यलः ।
भावव्याधिनिदानसर्वदुरितप्रोत्कर्षनिर्णाशको, श्रीमत्**कार्पटहेटक**स्थजिनपः **पार्श्वो**ऽस्तु मे श्रेयसे ॥४॥
(शार्दूलविक्रीडितवृत्तम्)

◆

## ॥ श्रीस्वयम्भूपार्श्वनाथस्तुतिः ॥

॥ इयं स्तुतिर्देववन्दनकायोत्सर्गचतुष्टये गीयते ॥

इडे कार्पटहेटकस्थजिनप-श्रीपार्श्वनाथं मुदा, विश्वार्हन्त इहाऽऽशु पान्तु भविनो रागादिरिप्वर्दितान् ।
भूयान्नः शिवदो जिनेन्द्रसमयः सार्वीयचङ्गोक्तिगो, देवाः शासनपालका मयि मुदा सन्तु प्रसन्नाः सदा ॥१॥

◆

## ॥ श्री शङ्खेश्वरपार्श्वनाथाष्टकम् ॥

वन्दित्वा शासनाधीशं, श्रीवीरं स्वगुरुं तथा ।
तं श्रीशङ्खेश्वरं पार्श्वं, संस्तुवे भक्तिभावतः ॥१॥ (अनुष्टुब्वृत्तम्)
दिव्यज्ञानयुताय दिव्यपरमस्वर्गाम्बुजाभ्राजिने, सल्लोकोत्तरपुण्यसञ्चयवते मुद्दायिने श्वभ्रिणाम् ।
सन्मेरौ परिपूजिताय ससुरैरिन्द्रैर्महोल्लासतः, श्रीशङ्खेश्वरपार्श्वतीर्थपतये तस्मै नमोऽनारतम् ॥२॥
पार्श्वस्तीर्थपतिर्वरातिशयभृत् पार्श्वं नतोऽहं मुदा, पार्श्वेणोरगरक्षणं च विहितं पार्श्वाय सम्यङ्नमः ।
पार्श्वादाप्तवरः परो न सुयशः पार्श्वस्य लोकोत्तरं, श्रीपार्श्वेऽचलधैर्यलब्धिरथ मे श्रीपार्श्व! रक्षां कुरु ॥३॥
बाह्यं तुच्छमनित्यभावकलितं राज्यादिकं वैभवं, त्यक्त्वाऽऽदायि यदा त्वयेश! परमा दीक्षाङ्गनाभिस्तदा ।
वृद्धाभिः चरणानुकूलरसिका वाचः प्रयुक्ता वराः, स्वाशक्तावनुमोदना प्रतिदिनं कार्येति ता बोधदाः ॥४॥
शुक्लार्धेन विनाश्य घातिगहनं ध्यानान्तरीयं क्षणं, संप्राप्याऽऽवरणप्रणाशसमये त्वं निश्चयाकूततः ।
ज्ञानं सद्व्यवहारतोऽथ समये लब्ध्वा सयोग्यादिमे, अज्ञासीदखिलार्थसार्थसकलोत्पत्त्यादिभावान् मुदा ॥५॥
वृत्तीस्तामसराजसीश्च भविनां सद्देशनायोगतो, दूरीकर्तुमुपायसार्थमुपदर्श्याध्वानमीष्टार्थदम् ।
कृत्वा सात्त्विकमार्गरक्तभविकानन्तर्मुहूर्तेऽन्तिमे, शैलेशीकरणं विधाय विशदं स्वाभाविकानन्ददम् ॥६॥
मूलोद्घातकशेषकर्मविरहान्मुक्त्यङ्गनासङ्गमं, लेभे सौख्यमनुत्तरं प्रकृतिजं यत् साद्यनन्तस्थितिम् ।
मन्यन्ते परवादिनोऽथ परमानन्दात्मकं शब्दतः, पार्यन्तेऽपि न वक्तुमर्थबहुलात् तद् विश्वदर्शीश्वरैः ॥७॥

स्वाधीनं प्रतिकारहीनमुपमातीतं सदा निर्भयं,
सौख्यं तद्विपरीतभावकलितं सांसारिकं चञ्चलम् ।
तद् याचे न कदापि शाश्वतसुखं हे नाथ! तद् दीयतां,
यच्छुद्धं च निरञ्जनं न पुनरावृत्यन्वितं क्षायिकम् ॥८॥
गुरूणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
स्तोत्रं शङ्खेश्वरेशस्य, **पद्म**सूरिर्व्यधान्मुदा ॥१०॥

◆

## ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

शश्वद्भावविशिष्टमोदकलिता याऽसङ्गतामागता, सत्स्वास्थ्यानुभवेष्टभावचरणैकाङ्गीयरूपान्विता ।
चिन्तारत्नमिव प्रसादविकलाऽपीष्टार्थसार्थप्रदा, श्री**शङ्खेश्वरपार्श्व**मूर्तिरनिशं साऽस्मत्समाधिप्रदा ॥१॥
सद्भाग्योन्नतिरद्य देव! समभूत् संसर्गसंहारिणी, मालिन्यं मनसो ननाश नितरां स्वामिंस्त्वदादर्शतः ।
वर्यानन्दतरङ्गलोललहरी चित्ते ममाऽऽविष्कृता, नाऽस्मिन् पौद्गलिके रतिं वितनुते भावेऽङ्घ्रयं सर्वतः ॥२॥
संसृत्यब्धिनिमग्नतारक! विभो! ते विस्मृतः किं जनः, सद्भावान्वितकिङ्करस्य च विलम्बस्तारणे यत् कृतः ।
युक्तं तन्न भवादृशां विगतसज्ज्ञाने प्रभो! प्राणिनि, कान्तारे मृगसूनुवद् विनिहितो भीमेऽहमेकोऽत्र किम् ॥३॥
मीनोऽसून् विजहेद् यथा विचलितान् वार्यन्तरेणाऽऽशु च, नश्याम्याश्रितिमन्तरेण च तथा ते नाथ! विक्षेपगः ।
मामुत्तार्य भवाटवीं कुरु कृपां कृत्वा प्रभो! निर्भयं, मुक्तिर्मे च तथा यथाऽब्जनिकरोद्भासोऽहरीशांशुना ॥४॥
अस्मै प्रार्थयते शिवं च तदपि त्वं यद् ददातीति न, दोषः किं हतकालकर्मनिजकस्योताऽत्र मे नाऽर्हता ।
सद्भक्तिस्त्वयि नेति किं भुवनप! प्रेमापकर्षो यतो, भद्रं किं न वदाऽर्हदीश! करुणाब्धे! तारय त्वं च माम् ॥५॥
दृष्टे मे न रतिर्जिन! क्षणमपि त्वय्यासितुं संसृतौ, कुर्वे क्लिश्यति किन्तु किं जिनप! मां मोहाद्यमित्रव्रजः ।
येनैमीश! तवाऽन्तिके च करुणां कृत्वैनमावारय, त्वं निस्सीमकृपालुरिष्टफलदस्तेऽहं कृपाभाजनम् ॥६॥
गुरूणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
शङ्खेश्वरविभुस्तोत्रं, **पद्मसूरि**र्व्यधान्मुदा ॥७॥

꧁✦꧂

## ॥ ७. श्रीमहावीरस्तोत्रे ॥

### ॥ श्रीमहावीराष्टकम् ॥

श्रीवामेयं जनादेयं, प्रणम्य स्वगुरुं तथा ।
संस्तुवे श्री**महावीरं**, समासन्नोपकारिणम् ॥१॥ (अनुष्टुब्वृत्तम्)
लब्धा भूरिगुणाः प्रभोऽत्र मयका संप्राप्य ते शासनं, तेन त्वं परमोपकारिपरमश्चित्ते मया निश्चितः ।
दुर्वार्य प्रसृतिः सुभक्तिरमलाऽऽविर्भाविता सङ्गता, सद्बुद्ध्या रहितोऽपि सत्स्तुतिमहं कुर्वे तया प्रेरितः ॥२॥
(शार्दूलविक्रीडितम्)
यद्वन्मेघघटाः प्रयान्ति विलयं वायोर्महावेगतः, दुष्कर्माणि लयं प्रयान्ति भविनां नाम्नस्तथा ते स्मृतेः ।
पूज्यानामपि पूज्य ! शासनपते ! श्रीवीरनाथ ! प्रभो !, ते सद्दर्शनमन्तरेण रुचिरं मन्येऽत्र नाऽहं परम् ॥३॥
ते वर्यार्थगतामशेषगुणगां सर्वाङ्गिबोधप्रदां, सत्सौख्यातिशयैर्युतां च वियुतां दोषैः प्रभा ! देशनाम् ।
ये शृण्वन्ति वरादरेण विमलज्योतिर्भृतोऽसुभृतो, धन्यास्ते सफलोद्भवादिविधयो लोकोत्तरार्थश्रिताः ॥४॥
भानोर्भानुततेर्यथा क्षितितले विस्तारणात् किं भवेद्, गाढाऽपीह तमःस्थितिर्विकृतिदा प्राज्ञेतरार्हाङ्गिनाम् ।
अज्ञानात्मतमस्तथेह मलिनां सच्चेतनां व्यादधत्, किं स्थानं लभते दिनाधिपनिभे भावात् त्वयि प्रेक्षिते ॥५॥
हंसो यद्यपि हन्ति रश्मिबलतो बाह्यान्धकारस्थितिं, शक्तो नो तदपि प्रभुर्दलयितुं नाऽन्तस्तमिस्रोत्करम् ।
हेलाप्रोज्झितसर्वदोषवितते ! बाह्यान्तरस्थं तमो, निर्मूलं प्रतिहंसि सर्वमिति नो पूषोपमस्त्वं प्रभुः ॥६॥
भेदाभेदमयेऽपि वस्तुनि गताभेदं यदा वादिनो, नित्यानित्यमयेऽपि वस्तुनिचये ध्रौव्यं गतास्ते यदा ।
दृष्टान्तं गुडनागरस्य गदितं ते श्रीश्रुतोक्तेस्तदा, नम्राः शुश्रुवुरापुरप्यनुपमं हर्षं नयौघश्रिताः ॥७॥
किं कल्याणमवाप्नुवन्ति नहि ते सन्न्याय्यमार्गानुगा, नो किन्तु प्रभवेदुपास्तिनिरतास्ते मार्गबोधं विना ।
सत्पुण्यं करुणा तपोऽतिविमलं निर्यामकत्वान्वितं, धैर्यं धर्मकथित्वमेतदिह ते ज्ञात्वा भवेयुस्तथा ॥८॥
श्रीतीर्थङ्करनामबन्धसमये याऽऽसीद् वरा भावना, लब्धा भावनया तयैव विशदा सा साध्यसिद्धिस्त्वया ।
सत्संस्कारवती क्रिया न विफला तेनैतदज्ञासिषं, सर्वे दार्शनिका न यस्य विषयेऽङ्गीकुर्वते भिन्नताम् ॥९॥
सोऽहं शासनतीर्थभक्तिरसिको निर्धीषणो निर्गुणी, त्वत्पादाम्बुजसंश्रितोऽपि निरतो लब्धोपकारस्मृतौ ।
कर्तव्योऽस्य कृपां विधाय विधिनोद्धारो ममाऽतो विभो !, नोपेक्षां शरणागतस्य गुरवो भव्या यतो कुर्वते ॥१०॥
गुरूणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
**पद्मसूरि**श्चकारेदं, श्रीमद्वीराष्टकं मुदा ॥११॥

## ॥ श्रीजीवत्स्वामि-महावीरस्तोत्रम् ॥

सिद्धचक्रं मुदा नत्वा, नेमिसूरीश्वरं गुरुम् ।
श्री**जीवत्स्वामिनः** स्तोत्रं, करिष्ये भक्तिभावतः ॥१॥ (अनुष्टुब्वृत्तम्)
जगद्बन्धुं जिनाधीशं, प्रमोदान्नाकिभिः स्तुतम् ।
सच्चिदानन्दनिर्लीनं, श्रीवीरस्वामिनं स्तुवे ॥२॥
श्रमणं सात्त्विकं धीरं, नीरं मोहाग्निशान्तये ।
कलितं कान्तबोधेन, वन्देऽहं शान्तिदाननम् ॥३॥
यस्य भक्तिप्रभावेण, विलयं यान्ति सत्वरम् ।
दीर्घस्थितीनि कर्माणि, निष्फलोपासना न हि ॥४॥
यदीयं शासनं लब्ध्वा-ऽद्यापि भव्याः प्रमोदिनः ।
विधायाऽऽराधनां शक्त्या, लभन्ते लाभमीप्सितम् ॥५॥
तं श्रीवीरं नरा भव्याः, स्थिता **मधुमती**पुरे ।
पश्यन्ति परया भक्त्या, पूजयन्ति स्तुवन्ति च ॥६॥
प्रातरुत्थाय नाथाऽहं, भावयामि निरन्तरम् ।
शासनं ते विमुच्याऽन्य-न्न याचेऽत्र भवान्तरे ॥७॥
रागोऽपि शासनस्येह, सर्वकामितदायकः ।
आराधना कथं न स्यात्, भववारिधिपारदा ॥८॥
जय त्वं जगदालम्ब !, जगदुद्धारतत्पर ! ।
परमात्मा श्रियोपेत !, निष्कलङ्कस्वरूपतः ॥९॥
लब्ध्वा पुण्योदयेनाऽद्य, दर्शनं वीरनाथ ! ते ।
दूरीकृता मया पीडाः, सर्वाश्चित्तशरीरयोः ॥१०॥
भवन्तु भद्रकार्याणि, श्रीवीरस्य प्रसादतः ।
श्रीसङ्घे मङ्गलं भूया-देवं मधुमतीस्थले ॥११॥
यदर्जितं मया पुण्य-मेतत्स्तोत्रविधानतः ।
तेन पुण्येन श्रीसङ्घे, भूयान्मङ्गलविस्तरः ॥१२॥
गुरूणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
**पद्मसूरि**र्महोल्लासा-न्महावीरस्तुतिं व्यधात् ॥१३॥

# ॥ ८. श्रीसिद्धचक्रस्तोत्रसङ्ग्रहः ॥

## ॥ श्रीसिद्धचक्रस्तोत्रम् ॥

परमेष्ठिमहामन्त्रं, नेमिसूरीश्वरं तथा ।
प्रणम्य प्रणयाम्यद्य, सिद्धचक्रस्तुतिं मुदा ॥१॥
सिद्धचक्रस्य माहात्म्यं, न गिराऽप्यभिधीयते ।
तत्त्वत्रयाराधनाऽत्र, सम्पूर्णा धर्मसाधना ॥२॥
व्रताराधनमप्यत्र, केनाऽप्यंशेन गीयते ।
फलं भावानुसारेण, भाव उल्लासहेतुकः ॥३॥
क्रियाया अपि प्राधान्यं, ज्ञेयमित्थं द्वयोरपि ।
कूपखननतुल्या हि, क्रियाभावो शिरानिभः ॥४॥
शिरा नाऽऽविर्भवत्येव, कूपखननमन्तरा ।
शिरामृते वारि नैव, बहु तत्राऽवतिष्ठते ॥५॥
अतः प्रवचने प्रोक्ता, द्वयोरप्युपयोगिता ।
न चेदेकं तदा नैव, स्वेष्टं कार्यं प्रसिद्ध्यति ॥६॥
अल्पनिद्रोऽल्पभोजी च, निरीहो निष्कषायकः ।
अनन्यनिन्दको धीरो, गुरुभक्तिपरायणः ॥७॥
कर्मक्षयाभिलाषी च, मन्दरागादिवान् नयी ।
दयालुर्विनयी प्रोक्तः, सिद्धचक्रस्य साधकः ॥८॥
विज्ञायेत्थं गुरोः पार्श्वे, सिद्धचक्रविधिं वरम् ।
साधनां येऽत्र कुर्वन्ति, ते लभन्तेऽचलालयम् ॥९॥
गुरूणां **नेमिसूरीणां**, प्रज्ञांशोऽयं प्रसादतः ।
**पद्म**नामा गणी भक्त्या, सिद्धचक्रस्तुतिं व्यधात् ॥१०॥

◆

## ॥ श्रीसिद्धचक्रस्तुतिः ॥

यन्नामस्मृतिमात्रेण, भव्यानां दुरितक्षय: ।
पूजा यस्य महानन्द-दायिनी विघ्नवारिणी ॥१॥ (अनुष्टुब्वृत्तम्)
तस्य श्रीसिद्धचक्रस्य, माहात्म्यं सूक्ष्मधीरपि ।
वर्णयितुं न शक्त: स्यात्, चित्रानन्तार्थभावत: ॥२॥
सोऽपि साधनसम्पन्न:, यदि नो सबलो भवेत् ।
प्रभवेयं कथं तत्र, तदाऽहं स्थूलधीषण: ॥३॥
अस्य पूर्णप्रभावेन, श्रीश्रीपालो नराधिप: ।
चक्रे कुष्ठात्ययं प्राप, प्रौढराज्यं जयावहम् ॥४॥
पुण्यं लोकोत्तरं लेभे, पितृव्यमपि स यत: ।
जिगायाऽल्पेन कालेन, पुण्यं बलवदेव हि ॥५॥
धन्यास्ते लघुकर्माणो, जन्मत्रितयपावना: ।
अल्पबन्धा महोत्साहा:, सदोपशमशालिन: ॥६॥
ये चित्तगुप्तिमाधाय, मोक्षलाभेऽप्यनीच्छव: ।
अमृतानुष्ठितिप्रीता, भीता कर्मानुबन्धत: ॥७॥
समेता द्रव्यसामग्र्या, साम्यरङ्गतरङ्गिण: ।
वर्यवैराग्यसद्भावा, निशान्ता योगनिश्चला: ॥८॥
कुर्वते तस्य मन्त्रस्या-ऽऽराधनां भावसाधनाम् ।
अपूर्वाह्लादतो त्यक्त्वा, निदानांशं च सर्वत: ॥९॥
आस्कन्दन्ति पराभूतिं, गदादिभ्यो न ते नरा: ।
लभन्ते विजयं नित्यं, यश:कीर्तिमहाबलम् ॥१०॥
इत्यालोच्य मुदा कुर्वे-ऽहमपि ध्यानसंस्तुतिम् ।
कुरु वासं प्रभो! चित्ते, तेन मे विशदेऽमदे ॥११॥
यन्न जातं भवद्भक्त्या, तन्न केनापि जायते ।
इति निश्चयसम्पन्न:, त्वद्भिन्नं न स्मराम्यपि ॥१२॥
गुरूणां **नेमिसूरी**णां, प्रज्ञांशोऽयं प्रसादत: ।
**पद्म**नामा गणी भक्त्या, सिद्धचक्रस्तुतिं व्यधात् ॥१३॥

◆

## ॥ श्रीसिद्धचक्राष्टकम् ॥

ध्यात्वा श्रीपार्श्वनाथस्य, पदद्वन्द्वं हितप्रदम् ।
नत्वा श्रीनेमिसूरीशं, सिद्धचक्रमभिष्टुवे ॥१॥ (अनुष्टुब्वृत्तम्)

चङ्गातिशयसंयुक्तं, भ्राजिष्णुं भासुरैर्गुणैः ।
अर्हन्तं नयनिक्षेपै-र्ध्येयं तं प्रणिदध्महे ॥२॥
सिद्धं कर्माष्टकापेतं, निष्कलङ्कं निरञ्जनम् ।
अखण्डानन्दनिर्मग्नं, सिद्धिनाथं नमाम्यहम् ॥३॥
षट्त्रिंशत्सद्गुणोपेतं, सारणादिविधायकम् ।
पायकं भवभीतानां, वन्दे सूरीश्वरं मुदा ॥४॥
विवेकभृन्मुनीशानां, वाचनादायकं सदा ।
सदभ्यासविधौ रक्तं, वाचकं समुपास्महे ॥५॥
मूलोत्तरगुणोद्याने, रमन्ते भ्रमरा इव ।
भावनावासिताः सन्तः, साधवः सन्तु मुक्तये ॥६॥
निःशङ्कं तदसत्यं नो, वचनं यज्जिनोदितम् ।
एवमध्यवसायो यो, दर्शनं तत् सुखावहम् ॥७॥
बोधो जीवादितत्त्वानां, सम्यग्ज्ञानं तदीष्यते ।
चारित्रं सत्फलं यस्या-ऽनेकभेदमभिष्टुवे ॥८॥
त्यागः सावद्ययोगानां, चारित्रं पञ्चधा श्रुतम् ।
आराध्यं मुनिभिर्हर्षात्, तद् वन्देऽनन्तशोऽन्वहम् ॥९॥
युक्तं द्वादशभेदेन, कर्मेन्धनहुताशनम् ।
तपोऽनिदानभावेन, विधेयं भावमङ्गलम् ॥१०॥
नवानां सत्पदानां ये, हृदि ध्यानं वितन्वते ।
भावपाशविनिर्मुक्तं, ते लभन्ते शिवास्पदम् ॥११॥
गुरुणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
**पद्मसूरि**र्महोल्लासात्, सिद्धचक्रस्तवं व्यधात् ॥१२॥

◆

## ॥ श्रीसिद्धचक्रस्तोत्रम् ॥

शङ्खेश्वरपुराधीशं, पार्श्वं पार्श्वोपसेवितम् ।
नेमिसूरिं गुरुं नत्वा, सिद्धचक्रं स्तवीम्यहम् ॥१॥ (अनुष्टुब्वृत्तम्)
मन्त्रं श्रीसिद्धचक्राख्यं, विमलेश्वरपूजितम् ।
चक्रेश्वरीसुरीध्यातं, ध्यायामि हृदि सर्वदा ॥२॥
द्वादशाऽष्टौ क्रमेणाऽथ, षट्त्रिंशत् पञ्चविंशतिः ।
सप्तविंशतिरग्रेऽथ, षष्टिः सप्ताधिकैव च ॥३॥
एकपञ्चाशदेवेह, सप्ततिरष्टमे दिने ।
पञ्चाशत् स्वस्तिकादीनां, मानं ज्ञेयं यथाक्रमम् ॥४॥

प्रदक्षिणाया अप्येवं, क्षमाश्रमणकस्य च ।
सङ्ख्या पूर्ववदेवोक्ता, कायोत्सर्गस्य सैव च ॥५॥
द्विः प्रतिक्रान्तिरर्चा च, त्रिकालं श्रीमदर्हताम् ।
नव चैत्यवन्दनानि, त्रिसन्ध्यं देववन्दनम् ॥६॥
द्विसहस्रप्रमाणोऽथ, जापो द्विः प्रतिलेखनम् ।
वर्णानुसारतो कार्य-माचामाम्लाभिधं तपः ॥७॥
श्रीमद्गुर्वाननेनैव, अर्हदादिपदस्य च ।
श्रुत्वा स्वरूपमानन्दाद्, ध्यातव्यं निजमानसे ॥८॥
ध्येयं नवपदध्यानं, सर्वध्येयेषु सुन्दरम् ।
यत्प्रभावेण नश्यन्ति, सर्वोपद्रवहेतवः ॥९॥
श्रीपालमदनाभ्यां तत्, सिद्धचक्रस्य साधनम् ।
विहितं बहुमानेन, येन वृद्धिसमृद्धयः ॥१०॥
चैत्रे तथाऽऽश्विने मासे, भो भव्या! महदादरात् ।
कुर्वन्त्वाराधनं तस्य, भवन्तु स्थिरताश्रयाः ॥११॥
गुरूणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
**पद्मसूरिः** प्रमोदेन, सिद्धचक्रस्तुतिं व्यधात् ॥१२॥

◆

## ॥ श्रीसिद्धचक्रषट्त्रिंशिका ॥

प्रणम्याऽर्हमिति ध्येयं, श्रीगुरुं सम्पदां पदम् ।
सिद्धचक्रं महामन्त्रं, भक्त्या स्तोतुमुपक्रमे ॥१॥ (अनुष्टुब्वृत्तम्)

अर्हन्निष्कलसिद्धसूरिगणिपोपाध्यायसत्साधुभिः, सम्यग्दर्शनबोधसंयमतपोभिः सिद्धचक्रोद्भवः ।
श्रीश्रीपालनिदर्शनेन भविभिः पीयूषकर्मोद्यतैः, सम्पल्लब्धिसुसिद्धिदोऽस्तु विधिना मन्त्रः समाराधितः ॥२॥
(शार्दूलविक्रीडितवृत्तम्)

लब्ध्वा क्षायिकदर्शनं शिवपदं कार्याणि पञ्चाऽष्टमे, कृत्वाऽस्मिन् नवमे स्थले च दशमे लोभक्षयं सर्वथा।
कृत्वा क्षीणकषायकेऽन्त्यसमये प्रध्वंस्य कर्मत्रयं, प्रादुर्भावितकेवलर्द्धिजिनपो ध्यानान्तरीयस्थितः ॥३॥
पूज्यश्चेह जघन्यतोऽप्यमरकोट्याऽऽह्लादसम्पूर्णया, युक्तो द्वादशभिर्गुणैरतिशयभ्राजिष्णुपञ्चोपमः ।
भव्यानां समवसृतौ सरलया वाचोपवेशं दद-दर्हन् केवलदोऽस्तु भव्यभविनां जैनेन्द्रनामोदयी ॥४॥
ते धन्या कृतपुण्यका अपि नराः प्रौढप्रभावोन्नता, वन्दन्ते हरयोऽपि नाकिकलितास्तान् सद्गुणग्राहिणः।
सद्ध्यानस्तवनार्चनाद्युदयदं हर्षादवस्थात्रिकं, ध्यात्वाऽर्हत्पदपद्मभक्तिनिरता येऽवञ्चका आदरात् ॥५॥
प्रध्वंस्याऽन्त्यगुणाश्रयद्विचरमे द्वासप्ततिं यः क्षणे, शुक्लेन प्रकृतीरपास्य समये तिस्रो दशश्चाऽन्तिमे ।
ऋज्वा हेतुचतुष्टयोर्ध्वगतिना प्रापाऽपवर्गश्रियं, (जातः) सत्स्वास्थ्याष्टगुणस्थिरत्वचरणानित्थंस्थसंस्थानकः ॥६॥

चन्द्राग्नि(३१)प्रमितैर्गुणैरुपगतः सच्चित्रधर्मैरपि, दीपोदाहृतिधामशालिविहितस्वार्थस्वभावस्थितिः ।
सत्यानन्दनिरन्तराज्यनृपतिर्भेदव्युदासायतं, सिद्धीशानमरूपभावविधिना ध्यायन्तु भव्याङ्गिनः ॥७॥
द्रव्याख्याकृतिभावभङ्गविविधानेकप्रकारव्रजै-र्विज्ञेयार्हविमर्शभावविसरो यस्याऽस्त्यनेकागमे ।
आयोपायविचक्षणः स्वपरसिद्धान्तार्थविज्ञानभृत्, सद्भव्योद्धृतिकर्मठः प्रवचनप्रोद्दामयोगाश्रयः ॥८॥
अर्थानां श्रुतगामिनां करुणया सद्वाचनादायकः, पञ्चप्रस्थितिसूरिमन्त्रबहुमानाराधनातत्परः ।
कायाग्नि(३६)प्रमितैर्गुणैरुपगतः सत्स्मारणाद्युद्यतः, सद्भावातिशयैश्चतुर्भिरसमैः स्थानोक्तिगै राजितः ॥९॥
निस्तन्द्रो जिनशासनावनविधौ स्वर्णाभदेहाकृति-र्भावारातिनिपीडिताङ्गिनिवहोल्लाघत्वकृत् सद्भिषक् ।
सद्वादीतरवादिवर्गहरिणस्तोमेषुवक्त्रोपमो, भावाचार्यवरं करोतु विषयं भक्तेर्मुदा देहिनः ! ॥१०॥
निक्षेपैरधिकैश्चतुर्भिरपि यं नोआगमान्योक्तिभिः, शास्त्रज्ञाः परिचिन्तयन्ति नितरां धीसम्पदा राजितः ।
पञ्चाङ्गाङ्गविभिन्नवित् समुचितान्तेवासिचिद्भूरुहं, नित्यं पल्लवयन् प्रमादविगतः सद्वाचनाम्भोभरैः ॥११॥
मोहाद्यावृतचेतनार्थमनुजेभ्यश्चेतनादायको, शास्त्रे गारुडिकोपमोऽपि गदितो यो वर्यधन्वन्तरिः ।
दुर्मत्यामययातनानिगडितभव्या(श्रेष्ठा)ङ्गिनां सत्त्वरं, श्रीमच्छास्त्ररसायणेन प्रमुदा सत्सज्जतापादकः ॥१२॥
प्रोद्योताक्षरचन्दनाघतपनस्वेदप्रशान्त्याकरो, दीप्तोऽनुग्रहजीवनेन गणचिन्ताधायको विस्पृहः ।
चित्सन्तोषितशिष्यसङ्घजनतासद्भावसंवर्धको, मार्गोद्भासनदीपमुज्ज्वलपदं तं स्तौमि श्रीवाचकम् ॥१३॥
यः सत्साम्यवराशयः श्रुतधरः क्षान्त्यादिधर्मालयः, श्रद्धादित्रिकसाध्यसाधकसदाचारार्तरौद्रापहः ।
शिक्षाधारकतोषशालिनिजभावालीनभद्रङ्करो, निर्मोहापरिणामभूरिपरिणामग्रन्थिमिथ्यामतिः ॥१४॥
पञ्चानां पदधारिणां विनयकृज्ज्येष्ठोऽपि पर्यायतः, तत्सद्भावनवन्दनाविधिकरः स्वाध्यायवर्योद्यमी ।
षट्कायावनमुक्तिदप्रवचनाम्बाराधकोऽनारतं, जैनाज्ञाप्रणयी कषायविकथाशल्यप्रमादापहः ॥१५॥
चक्रीन्द्रानधिगम्यरम्यप्रमदो येनाऽऽप्यते त्यागजो, यः कर्ताऽत्यतिवर्धमानपरिणामेनाऽमृतानुष्ठितेः ।
संवासं विदधाति सद्गुरुकुले गीतार्थनिश्रानुगः, पूज्यं कल्पविहारिणं तमनिशं वन्देऽनगारं मुनिम् ॥१६॥
निःशङ्कं वितथं न तीर्थपतिभिः प्रोक्तं स्वरूपं समं, निर्ग्रन्थागम एव वा हितकरः सत्यः परार्थस्ततः ।
अन्योऽनर्थक इत्यनर्थदलना सद्भावना दर्शनं, नामाद्यैः परिभावनीयमनिशं नोआगमान्योक्तिभिः ॥१७॥
अमितपुण्यमहोदयशालिनः, प्रवरसाधनपञ्चकभाविनः ।
प्रकृतिसप्तकशान्तिलयोभयाद्, भवति दर्शनलाभ इहाऽमलः ॥१८॥ (द्रुतविलम्बितवृत्तम्)
भ्राम्यन् भीमभवे महीध्रतटिनीतत्प्रस्तरन्यायतः, सप्तानां हि यथाप्रवृत्तिकरणादल्पां स्थितिं कर्मणाम् ।
कृत्वा ग्रन्थिमथोच्छिनत्ति करणेनाऽन्येन कश्चिज्जनो, गत्वाऽन्त्यं करणं त्रिपुञ्जविधिमाधायाऽश्नुते दर्शनम् ॥१९॥
(शार्दूल०)
सिद्धान्ते तदनेकभेदततिगं प्रोक्तं प्रणीतागमैः, कर्मग्रन्थमतं तदौपशमिकं मिथ्यामतेरादितः ।
श्रीसिद्धान्तमतेन शान्तिलयजं सद्दर्शनं प्राप्यते, वर्यं साधनमस्तदोषविसरं प्रौढर्द्धिदेवायुषः ॥२०॥
चिन्तारत्ननिभं वरेण्यपददं सल्लक्षणैर्लक्षितं, यद्युक्तोऽधमभिक्षुकोऽप्यधिकतामभ्येति सच्चक्रिणः ।
यद्धीनोऽधमयाचकादपि मतः श्रीसार्वभौमोऽप्यथ, तत्सद्दर्शनमाभजन्तु गुणिनस्तत्त्वार्थसूत्रोदितम् ॥२१॥
भावानामखिलस्वरूपयमलं यत्तोऽङ्गिना ज्ञायते, ज्ञानं तद् द्विविधं परोक्षमपरं प्रत्यक्षमाद्यं तथा ।
चारित्रैकनिबन्धनं निरुपमा यत्तो वरा लब्धयः, यद्धीना न विपालयन्ति भविनो धर्मप्रदां सत्कृपाम् ॥२२॥

निक्षेपैरधिकैश्चतुर्भिरपि यन्नोआगमान्योक्तिभिः, मीमांसाध्वगतं क्षयोपशमजं निर्दूषणं क्षायिकम् ।
भान्वाच्छादकवारिवाहकटसद्दृष्टान्तगम्यं वरं, लब्धिस्थानमशेषपापदलनं भेदैरनेकैर्युतम् ॥२३॥
माता पुत्रबुधार्यरक्षितमतथ्यज्ञानसार्थान्वितं, भूपाद्यैरपि भूरिसत्कृतमपि प्रानन्दमापैव न ।
मिथ्याज्ञानमपास्य भीमभववार्धावश्मनौसन्निभं, सत्यज्ञानमभङ्ग्यत्नविनयाद् ग्राह्यं सुधीभिस्ततः ॥२४॥
नामाद्यैरधिकैश्चतुर्भिरपि यन्नोआगमान्योक्तिभिः, चिन्त्यं सञ्चितकर्मकल्मषचयप्रध्वंसकं श्रीप्रदम् ।
चित्साध्यं निरुपाधिकस्थिरमहानन्दाश्रयापादकं, विश्वाखण्डलनाकिनामपि महर्द्धीनां परं दुर्लभम् ॥२५॥
सल्लोकोत्तरवाञ्छितार्थनिवहप्रादेशनप्रत्यलं, कर्मौघक्षयशान्तियुग्मभवनोपायोद्भवं निर्भयम् ।
व्यावृत्तीतररूपमव्ययगुणं मैत्रीचतुष्काञ्चितं, पूज्यैः साधितमर्पितं करुणयाऽन्येभ्यो मुदा भाषितम् ॥२६॥
पूर्वं या वरदर्शनाप्तिसमये शेषा बभूव स्थितिः, सा चेत् पल्यपृथक्त्वकेन रहिता तद् देशतः संयमम् ।
सङ्ख्येयाब्धिविहानिना च लभते तत् संयमं सर्वतः, सङ्ख्यातीतभवान् लभेत प्रथमं चारित्रमष्टौ भवान् ॥२७॥
संक्लेशाध्रुवबाह्यशर्मकलितः सांसारिकार्थव्रज, इत्यालोच्य सुचक्रिणोऽपि सुखदं बभ्रुर्मुदा संयमम् ।
पूज्यास्तद्भवमुक्तिगामिजिनपा अप्यादधुस्तद्धित-मालस्य परिहाय भव्यचरणं ज्ञात्वैतदङ्गीकुरु ॥२८॥
दुर्भव्या अपि जातिभव्यभविनो भावाल्लभन्ते न यत्, तद्भव्या अपि प्राप्नुवन्ति खलु ये पुण्योदयोत्कर्षिणः ।
ते धन्याः पुरुषोत्तमाश्च विधिना लब्ध्वाऽपि पारङ्गता, यस्मादाप्तिरिहाऽस्य विश्वसुलभा सत्पालना दुष्करा ॥२९॥
नामाद्यैरधिकैश्चतुर्भिरपि यन्नोआगमान्योक्तिभि-र्ध्येयं स्वज्वलनात्महाटकमलव्युच्छेदकं श्रीप्रदम् ।
काङ्क्षासंवरनिर्निदानपरमज्ञानोत्तमार्थार्पकं, चक्र्याखण्डलवर्यदेवपदवीसिद्धिप्रदानक्षमम् ॥३०॥
दुष्कर्माणि निकाचितान्यपि लयं प्राप्नोति यत्तो द्रुतं, सामग्रीसहितादपायसमवायोज्जासनं मङ्गलम् ।
विश्वाश्चर्यकरप्रभावललितं स्वर्गापवर्गौ यतः, प्रद्युम्नास्यपिधानमिन्द्रियदमं भद्राम्बुजाहर्मणिम् ॥३१॥
शास्त्रज्ञानप्रकाण्डनाककुसुमब्रह्मप्रवालाञ्चितं, सत्कारुण्यदलेन्द्रियोद्दमनशाखं तोषमूलोद्गतम् ।
श्रेयोधामफलं प्रभावजनतामेयप्रमोदावहं, तन्मन्दारनिभं तपोऽतिशयभृत् पुण्योदयादाप्यते ॥३२॥
चक्रुस्तद्भवमोक्षयायिजिनपा अप्यैतदानन्दतः, ते गण्या न भवा अतोऽपि विधिना तत् साधनीयं त्वया ।
यावत् षष्टिसहस्रवर्षमतनीत् सा सुन्दरी सत्तप, एवं पाण्डवचन्द्रभूपमदनाश्रीपालभूपादयः ॥३३॥
लब्धीः श्रीगणधारिगौतमविभुर्लेभे विशिष्टास्ततः, स्वर्गं प्राप दृढप्रहारिभयदस्तेनश्चतुर्घातकः ।
आचाम्लात् तपसो विपत्तिरहितास्ते यादवा जज्ञिरे, स्यन्दिन्याऽथ सनत्कुमारनृपतिश्चक्रे तनुं निर्मलाम् ॥३४॥
ते नागार्जुनपादलिप्तमुनिपश्रीबप्पभट्टादयः, संप्रापुर्विशदस्वभावतपसः सल्लब्धिसिद्धीर्वराः ।
ज्ञात्वैतद् रसगृद्धिमुन्नतिकरं त्यक्त्वा विधेयं तपो, देहः शोक्ष्यत एव रोगततिना चेत् तेन नो शुष्यते ॥३५॥
सद्भाग्याधिगमस्य निर्मलतमश्रीसिद्धचक्रप्रभोः, पूज्यश्रीगुरु**नेमिसूरि**चरणाम्भोजप्रसादादिदम् ।
पूर्वोक्तं स्वबलाधरीकृतमहारत्नप्रभावव्रजं, ज्ञात्वा ये बहुमानभक्तिनिरतास्तेभ्यो नमोऽनारतम् ॥३६॥
वर्षे बाणनिधाननन्दशशिसंमाने(१९९५) वरे कार्त्तिके, श्रीमद्गौतमकेवलाप्तिदिवसे श्रीनेमिसूरिक्रमे ।
पद्मे षट्पद**पद्म**सूरिरमलश्रीसिद्धचक्रप्रभोः, चक्रे श्रीमति वर्य**राजनगरे** सत्तत्त्वषट्त्रिंशिकाम् ॥३७॥

*॥ समाप्ता विजयपद्मसूरिप्रणीता श्रीसिद्धचक्रषट्त्रिंशिका ॥*

◆

## ॥ श्रीसिद्धचक्रशतकम् ॥

श्रीसेरीसकतीर्थेशं, नेमिसूरिं गुरुं तथा ।
वन्दित्वा सिद्धचक्रस्य, शतकं विदधाम्यहम् ॥१॥
सच्चिदानन्दसाम्राज्यं, प्राप्यते यत्प्रभावतः ।
सिद्धचक्रं तदुल्लासाद्, भव्याः सेवन्तु सत्त्वरम् ॥२॥
अर्हन्तोऽपुनरावृत्ताः, सूरयो वाचका अपि ।
मुनयो दर्शन-ज्ञाने, चारित्रं निर्मलं तपः ॥३॥
सिद्धचक्रमिति ज्ञेयं, ध्येयं नवपदात्मकम् ।
आलम्बनं परं प्रोक्तं, मनोनिग्रहसाधनम् ॥४॥
भावप्रतिष्ठितो धर्म, उपदिष्टो जिनेश्वरैः ।
न जायते शुभो भावः, मनोनिग्रहमन्तरा ॥५॥
निर्ममत्वं भवेद् भावात्, शुभात् साम्यं ततोऽपि च ।
रागादेर्विजयः साम्यात्, चेतःशुद्धिः ततो भवेत् ॥६॥
तयेन्द्रियजयस्तेन, कषायाणां जयो भवेत् ।
तेनैव भवनाशोऽतो, भावप्राधान्यमिष्यते ॥७॥
एतदेवाऽभिसन्धाया-ऽर्हदादीनां विचारणा ।
विधिना गुणिभिः कार्या, सात्त्विकोल्लाससङ्गतैः ॥८॥
उपार्ज्य तीर्थकृन्नाम, विंशतिस्थानसाधनात् ।
स्वर्गं वा नरकं गत्वा, बद्धायुरनुसारतः ॥९॥
पुण्यसम्भारसंयुक्तं, ज्ञानत्रयसमन्वितम् ।
मानुष्यं येन सम्प्राप्तं, पूर्वायुःक्षयतः ततः ॥१०॥
यस्य जन्मनि सञ्जातः, प्रकाशो नरकेष्वपि ।
आद्ये सूर्यप्रकाशाभः, किञ्चिदूनस्ततः परे ॥११॥
तृतीये चन्द्रसंकाशः, किञ्चिदूनश्चतुर्थके ।
ग्रहाभः पञ्चमे श्वभ्रे, षष्ठे नक्षत्रसन्निभः ॥१२॥
ताराभः सप्तमे श्वभ्रे, ज्ञेयमेवमनुक्रमात् ।
प्रमोदश्चाऽपि सर्वत्र, पञ्चकल्याणके मतम् ॥१३॥
उत्सवो दिक्कुमारीणां, सुरेन्द्राणां सुराचले ।
अङ्गुष्ठामृतपायित्वं, स्तन्यपत्वं न शैशवे ॥१४॥
गार्हस्थ्यं भोगकर्माप्तं, भुक्त्वा दत्त्वा च वार्षिकम् ।
ज्ञात्वोचितं क्षणं लब्ध्वा, चारित्रं ज्ञानसंयुतम् ॥१५॥
विहृत्योग्रविहारेण, प्रायो मौनं विधाय च ।
क्षपकश्रेणिमारुह्य, पराजित्य परीषहान् ॥१६॥

विशुद्धं केवलं प्राप्य, मङ्क्षु ध्यानान्तरे क्षणे ।
सयोगी भगवान् पूज्यो, भव्येभ्यो देशनां ददौ ॥१७॥
वरेण्यातिशयाः पुण्याः, चतुर्थाङ्गे प्रकीर्तिताः ।
वाणीगुणाश्च तत्रैव, यस्य तस्मै नमो नमः ॥१८॥
उपमापञ्चकं यस्य, विशिष्टभावगर्भितम् ।
प्रदर्शितं सप्तमाङ्गे, यस्य तस्मै नमो नमः ॥१९॥
यस्याङ्गुष्ठमितं रूपं, देवा नो कर्तुमीश्वराः ।
योगीन्द्रैरपि ध्येयाय, तस्मै भक्त्या नमो नमः ॥२०॥
निर्दोषाः शत्रुहन्तारः, समर्च्या वासवैरपि ।
श्वेता देवाधिदेवाश्च, अर्हन्तो जगदीश्वराः ॥२१॥
गुणा भानुमिता येषां, श्रीजैनागमवर्णिताः ।
सत्त्वे मन्दरसंकाशा, गाम्भीर्ये सागरोपमाः ॥२२॥
लभन्ते ध्येयरूपत्वं, मरुदेवेव ध्यायकाः ।
अर्हत्पदमिति ध्येय-मागमादिविचारतः ॥२३॥
शुक्लध्यानान्त्यभेदाभ्यां, योगरोधं विधाय ये ।
अस्पृशद्गतिना सिद्धाः, तेभ्यो नित्यं नमो नमः ॥२४॥
अष्टकर्मवियोगेन, गुणाष्टकविराजिताः ।
अनित्थंस्थस्वरूपाप्ताः, स्वतन्त्रानन्दसङ्गताः ॥२५॥
त्रिभागोनावगाहस्थाः, सिद्धशिलाविराजिताः ।
एरण्डादिकदृष्टान्तात्, समयेनोर्ध्वगामिनः ॥२६॥
यत् सुखं वासवादीनां, ततोऽनन्तगुणं सुखम् ।
अव्ययपदप्राप्तानां, सिद्धानां शाश्वतं मतम् ॥२७॥
कदलीस्तम्भसंकाशं, सुखं सांसारिकं समम् ।
अप्येतद् दुःखसम्भिन्नं, तेषां लेशोऽपि तस्य न ॥२८॥
ज्ञेयमप्यत्र नो वक्तुं, शक्यं केवलिनाऽपि च ।
उपमाभावतो म्लेच्छः, यथा पुरसुखं तथा ॥२९॥
आत्मारामरताः शुद्धाः, स्थिता ये दीपदीप्तिवत् ।
साद्यनन्तविभङ्गस्थाः, पुनरावृत्तिवर्जिताः ॥३०॥
कृतार्थाः सच्चिदानन्दाः, निष्कलात्ममहोदयाः ।
रूपारूपस्वभावस्था, निर्बीजाः पारमार्थिकाः ॥३१॥
अनङ्गस्थितिमन्तो ये, अनङ्गनाशका अपि ।
पूर्णतापूरितात्मानः, स्थैर्यसंयमशालिनः ॥३२॥
अन्नादीनां फलं स्वास्थ्यं, तत् त्वत्र क्षणिकं मतम् ।
तेषां सिद्धात्मनां शुद्धा, शाश्वती स्वस्थता मता ॥३३॥

कर्माभावान्न सिद्धाना-मन्नादिग्रहणं मतम् ।
किं लोहाकर्षणं क्वाऽपि, लोहचुम्बकमन्तरा ॥३४॥
भोगिनोऽपीतभोगा ये, अवर्णा अपि साक्षराः ।
तेषां ध्यानानुभावेन, भेदभावो विनश्यति ॥३५॥
रक्तवर्णविचारेणा-ऽसंप्रज्ञातसमाधिना ।
सिद्धाभिधं पदं ध्येय-मागमादिविचारतः ॥३६॥
षट्त्रिंशद्गुणसंयुक्ताः, पञ्चातिशयशोभिताः ।
पीतवर्णा यथा स्वर्णं, स्मारणादिविधायकाः ॥३७॥
गच्छाधीशाः प्रदीपाभाः, पूज्या धर्मधुरन्धराः ।
निधयो लब्धिसिद्धीनां, निःस्पृहा भवचारके ॥३८॥
जातिकुलादिभिः श्रेष्ठा, भवकूपस्थिताङ्गिनाम् ।
वितत्य देशनारज्जूः, सम्यगुद्धारकारकाः ॥३९॥
शिष्येभ्यो वाचनादाने, अर्थतश्च परायणाः ।
प्रस्थानाराधकाः सूरि-सन्मन्त्राराधनोद्यताः ॥४०॥
कल्पादावनुयोगे च, दशवैकालिके तथा ।
संक्षेपात् कथिता येषां, पञ्चविंशतिसद्गुणाः ॥४१॥
यानकल्पा भवाब्धौ ते, वैद्यवद्धितकारकाः ।
एवं सूरिपदं ध्येय-मागमादिविचारतः ॥४२॥
उपसमीपमागत्य, येभ्यः शास्त्रमधीयते ।
गम्यते स्मर्यते येभ्यो, द्वादशाङ्गोपदेशकाः ॥४३॥
येषां पार्श्वे श्रुतस्याऽऽयो-ऽध्ययनाध्यापनोद्यताः ।
विबुधास्ते निरुक्तार्था-दुपाध्यायाश्च वाचकाः ॥४४॥
निर्मलध्यानकर्तारः, प्राप्तान्तेवासिपाठकाः ।
उपायका उपायानां, चिन्तकाः स्वान्यभद्रयोः ॥४५॥
सूत्रार्थोभयवेत्तारः, संयमादिषु तत्पराः ।
वाचनादायकाः सूत्रात्, शिष्येभ्यो गुणसम्भवात् ॥४६॥
सूत्रार्थस्थिरताऽन्योप-कारो मोहजयस्तथा ।
आयत्यप्रतिबद्ध(न्ध)श्च, ऋणमोक्षो गुणा इति ॥४७॥
स्वरादिशुद्धसूत्रार्थाः, सदा योगोपयोगिनः ।
गच्छस्योपग्रहे रक्ताः, पञ्चविंशतिसद्गुणाः ॥४८॥
मोहाहिविषवेगानां, महागारुडिकोपमाः ।
ध्येयं तुर्यपदं नित्य-मागमादिविचारतः ॥४९॥
संयमाराधनोद्युक्ता, द्विधा शिक्षापरायणाः ।
पदस्थपूजका मान्या, निर्ग्रन्थाः समतान्विताः ॥५०॥

शमिनो वर्णतो श्यामाः, निरारम्भा गतस्पृहाः ।
शान्ता दान्ताश्च सद्भावाः, सप्तविंशतिसद्गुणाः ॥५१॥
गुप्ता भ्रमरसंकाशा, नवकल्पविहारिणः ।
मुनयोऽपि सदा ध्येया, आगमादिविचारतः ॥५२॥
करणत्रयसंसिद्धं, पञ्चभेदं च दर्शनम् ।
पञ्चलिङ्गं सदा श्वेतं, शुभभावात्मकं तथा ॥५३॥
बह्वाकर्षसंयोगं(?), देवत्वसिद्धताप्रदम् ।
सद्दर्शनं सदा ध्येय-मागमादिविचारतः ॥५४॥
तत्त्वावबोधरूपं यद्, भूरिभेदसमन्वितम् ।
करुणासाधनं सिद्धं, कर्तव्यादिविवेचकम् ॥५५॥
मूलं च धर्ममूलस्य, संयमोत्कर्षकारकम् ।
क्रियायाः करणं नित्यं, सर्वत्र पूज्यताप्रदम् ॥५६॥
सत्यक्रमगतं शास्त्रे, जननीहर्षदं परम् ।
अध्यात्मयोगसम्पन्नं, सत्प्रियं नयनाङ्कुशम् ॥५७॥
मलयासुन्दरी येनै-केनाऽपि धैर्यमाहिता ।
ध्येयं ज्ञानं तदेवेष्ट-मागमादिविचारतः ॥५८॥
शक्त्याविर्भावकं शुद्धं, चितापचयकारकम् ।
मोहरज्जुलवित्रं च, सत्या(परमा)नन्ददायकम् ॥५९॥
मुहूर्तपर्यायेणाऽपि, युञ्च(?) वैमानिकाः सुराः ।
मुक्तोऽपि मरुदेवीवै-वंविधं यस्य वर्णनम् ॥६०॥
क्रमलभ्यं च मान्द्येन, कषायाणामनेकधा ।
बह्वाकर्षयुतं पूज्यो, यतो भिक्षुरपि भवेत् ॥६१॥
यल्लीना मुनयो नित्यं, वन्द्यन्ते वासवैरपि ।
श्रद्धादि सफलं येन, प्रवृत्तीतरभावितम् ॥६२॥
मैत्र्यादिभावना अष्टौ, मातरो यस्य साधनम् ।
आगमादिविचारेण, ध्येयं चारित्रमन्वहम् ॥६३॥
तुष्टिर्मूलं श्रुतं स्कन्धो, दमाः शाखाः प्रवालकाः ।
शीलं चाऽभयपर्णानि, पुष्पं स्वर्गसुखं तथा ॥६४॥
फलं मुक्तिसुखं यस्य, कल्पवृक्षनिभं तपः ।
निदानातीतबोधेन, वर्धनीयं क्षमाम्भसा ॥६५॥
शीलवृक्षोन्नतौ यस्य, साधना मेघसन्निभा ।
पिधानं तृष्णावदने, यानं स्वर्गापवर्गयोः ॥६६॥
अग्निर्विघ्नलताध्वंसे, सद्भावाम्बुजभास्करम् ।
इन्द्रियाश्वरज्जुनिभं, लब्धिसिद्धिविधायकम् ॥६७॥

निराहारपदास्वादं, स्थैर्यभावसहायदम् ।
अहिंसासाधनं वर्यं, सद्वैराग्योन्नतिप्रदम् ॥६८॥
साध्यते वासवादित्वं, येनर्द्धिरप्यनर्गला ।
विहाय विकृतौ गृद्धिं, कुरु बाहुबलीव तत् ॥६९॥
जलेन कृतमप्यच्छं, वासः स्यान्मलिनं पुनः ।
तपसा निर्मलो जातो, न देहो मलिनो भवेत् ॥७०॥
सर्षपाक्षतदध्यादौ, परमं मङ्गलं तपः ।
स्निग्धान्यपि हि कर्माणि, दह्यन्ते येन लीलया ॥७१॥
तपसेत्यादिनिर्युक्तौ, प्रोक्तमावश्यके खलु ।
श्रुतकेवलिना श्रीम-त्स्वामिना भद्रबाहुना ॥७२॥
रसपाको विना नाऽग्निं, न घटोऽपि मृदं विना ।
न पटोऽपि विना तन्तून्, नाऽघनाशस्तपो विना ॥७३॥
क्षारो वस्त्रस्य देहस्य, जलं स्वर्णस्य पावकः ।
नयनस्याऽञ्जनं हेतु-र्नैर्मल्ये तप आत्मनः ॥७४॥
जिनेन्द्रैरपि यत् तप्तं, तद्भवे मुक्तिगामिभिः ।
अज्ञातभवसङ्ख्यानै-र्युष्माभिस्तु विशेषतः ॥७५॥
अत एवाऽस्य प्राधान्यं, मुक्त्यङ्गेषु प्रवेदितम् ।
'तवसा संजमेणं' ति, भगवत्यादिसम्मतिः ॥७६॥
भेदा द्वादश पञ्चाशत्, संक्षेपाच्च विशेषतः ।
विधेयं तपसो ध्यान-मागमादिविचारतः ॥७७॥
ज्ञानं प्रकाशकं प्रोक्तं, शोधकं तप इत्यपि ।
गुप्तिकृच्चरणं ज्ञेयं, त्रियोगात् परमं पदम् ॥७८॥
स्वरूपं सिद्धचक्रस्य, एवं किञ्चिद् विवर्णितम् ।
विधिपूर्वफलं तस्माद्, विधिरादौ फलं ततः ॥७९॥
चतुर्घटीशेषरात्रा-वुत्थाय स्वरमान्यतः ।
प्रतिक्रान्तिं वा विधाय, कायोत्सर्गं यथापदम् ॥८०॥
आसूर्योदयतः कार्यं, प्रतिलेखनमित्यथ ।
देववन्दनमाधाय, यन्त्रपूजाऽप्यनन्तरम् ॥८१॥
नवचैत्यवन्दनानि, तथैव गुरुवन्दनम् ।
व्याख्यानश्रवणं चैव, प्रत्याख्यानविधिस्ततः ॥८२॥
सप्तधा निर्मलो भूत्वा, कुर्यात् स्नात्रं च पूजनम् ।
यथागुणं स्वस्तिकादि, कुर्यादुल्लासपूर्वकम् ॥८३॥
पूर्ववद् विधिना कार्यं, मध्याह्ने देववन्दनम् ।
प्रत्याख्यानं पारयित्वा, चाऽऽमाम्लं च ततः पदम् ॥८४॥

नोच्छिष्टं भोजनं धार्यं, स्थालीं कुर्याच्च निर्मलाम् ।
पीत्वाऽच्छां वाटिकां कृत्वा, स्थाप्येयं जलभाजने ॥८५॥
अन्यथा जीवहिंसा स्यात्, संमूर्च्छिमविनाशतः ।
उच्छिष्टभोजनादौ हि, जीवोत्पत्तिः प्रकीर्तिता ॥८६॥
तत्रैव त्रिविधाहार-प्रत्याख्यानं विधाय च ।
चैत्यवन्दनमप्येवं, ततः कुर्याद् गुणस्मृतिम् ॥८७॥
देवानां वन्दनादर्वाक्, प्रतिलेखनमित्यपि ।
द्वयं सूर्यास्तकालाद्धि, पूर्वं कार्यं विधीच्छुभिः ॥८८॥
मन्दिरे दर्शना रात्रि-मङ्गलादि ततः परम् ।
प्रतिक्रमणमित्येवं, कृत्वा विंशतिसंमिता ॥८९॥
नमस्कारावलिर्गुण्या, स्थैर्यात् श्रीपालरासकः ।
श्रोतव्यः प्रहारदूर्ध्वं, पठित्वा पोरिसीं ततः ॥९०॥
अल्पा निद्रेति सङ्क्षेपा-देवं साधारणो विधिः ।
वर्णितो विस्तरो ज्ञेयो, गीतार्थगुरुयोगतः ॥९१॥
सम्पूर्णो मण्डलस्याऽस्य, चरित्रे प्राकृते विधिः ।
प्रोक्तस्तदनुसारेण, विज्ञेयो हर्षदायकः ॥९२॥
सिद्धचक्रसमं नान्य-दुत्तमं जगतीतले ।
रहस्यं जैनधर्मस्य, पूर्णमत्र प्रतिष्ठितम् ॥९३॥
ये सिद्धा ये च सेत्स्यन्ति, सिद्ध्यन्त्यन्यत्र येऽपि च ।
ते सर्वे सिद्धचक्रस्य, साधनान्नैव संशयः ॥९४॥
एकस्याऽपि पदस्याऽत्रा-ऽनेके ध्यानात् शिवं गताः ।
भवेन्नवपदध्याना-न्मुक्तिः तत्र किमद्भुतम् ॥९५॥
मन्त्रेषु परमो मन्त्रः, तत्त्वेषु तत्त्वमुत्तमम् ।
अर्थेषु परमार्थोऽयं, पदेषु परमं पदम् ॥९६॥
तामसी राजसी हेया, सात्त्विकी भक्तिरुत्तमा ।
विधेयाऽवञ्चकत्वेन, सैव सर्वार्थसिद्धिदा ॥९७॥
क्षान्तो दान्तो निरारम्भो, निर्निदानो विधिप्रियः ।
आराधकोऽस्य विज्ञेयो, विपरीतो विराधकः ॥९८॥
आराध्यं परया भक्त्या, शान्त्या शीलादियुक्तया ।
हन्तुं प्रभवति नैवा-ऽऽराधकं शत्रुरत्र च ॥९९॥
दिनानि नव प्रत्येक-माश्विनचैत्रमासयोः ।
एकाशीतिदिनान्येवं, सार्धवर्षचतुष्टये ॥१००॥
विधिनोद्यापनं कार्यं, तपसोऽन्ते प्रमोदतः ।
चरित्रात् प्राकृतात् सोऽयं, विज्ञेयो रासकादपि ॥१०१॥

स्वाधीनाः सम्पदोऽनेन, ज्वरादिरोगसङ्क्षयः ।
पूर्वोत्पन्ना विनश्यन्ति, दास्यत्वादि भवन्ति न ॥१०२॥
अन्धत्वं जुङ्गितत्वं च, दौर्भाग्यं विकलाङ्गता ।
काणत्वं वामनत्वं च, न स्यादस्य प्रभावतः ॥१०३॥
वन्ध्यत्वं विषकन्यात्वं, वैधव्यं दुष्टरण्डता ।
मृतवत्सत्वदोषोऽपि, न स्यादस्य प्रभावतः ॥१०४॥
प्रेष्यत्वं पिङ्गलत्वं च, मूलतोऽपि प्रणश्यति ।
भूताद्युपद्रवाभावो, जायते नाऽत्र संशयः ॥१०५॥
मुनिसुव्रतनाथस्य, तीर्थे श्रीपालभूपतिः ।
जातस्तेनेदमाराद्धं, मदनादियुतेन च ॥१०६॥
सङ्क्षेपाराधनं पूर्वं, ततो विस्तरतो कृतम् ।
भक्तिः शक्त्यनुसारेण, जिनाज्ञाऽप्येवमास्थिता ॥१०७॥
नववर्षशते पूर्णे, स्वायुषस्तस्य भूपतेः ।
तद्ध्यानान्नवमे कल्पे, सुरः जातः सुरप्रभः ॥१०८॥
एकविंशतिवार्ध्यायु-स्तत्र भुक्त्वाऽत्र मानवः ।
पुनस्तत्रैव गत्यैवं, सेत्स्यति नवमे भवे ॥१०९॥
इत्थमेव क्रमो ज्ञेयो, जननीमदनादिषु ।
न भेदो नवसु ज्ञेयो, नवसंख्याऽप्यनुत्तरा ॥११०॥
गुणितोऽङ्केन केनापि, नवाङ्को नैव भिद्यते ।
गुण्यसङ्ख्यासमानं यद्, गुणाकाराङ्कमेलनम् ॥१११॥
वीरतीर्थे नवाऽऽत्मानः, तीर्थकृन्नामबन्धकाः ।
गुप्तयो नव शीलस्य, तत्त्वानि निधयो नव ॥११२॥
अर्हन् पार्श्वनाथोऽपि, नवहस्तोच्छ्रयोऽभवन् ।
नव नेमिभवाः प्रोक्ताः, श्रीवीरस्य गणा नव ॥११३॥
पारिहारिकसाधूनां, गणोऽपि नवसङ्ख्यकः ।
न चैकान्तोऽत्र लेशेन, विविधा बोधहेतवः ॥११४॥
दुर्लभा धर्मसामग्री, दुर्लभो मानवो भवः ।
दुर्लभः समयोऽप्यस्य, मन्त्रोऽयमपि दुर्लभः ॥११५॥
अद्य मे सफलं जन्म, पावना रसना कृता ।
समयः सार्थको जातः, सिद्धचक्रस्य साधनात् ॥११६॥
सुलभा भोगसामग्री, नियमाद् भवसाधिका ।
न तथाऽऽराधना चेयं, विश्वविघ्नविदारिणी ॥११७॥
धन्यानां पूर्णपुण्यानां, सात्त्विकोत्साहशालिनाम् ।
जायते निर्मला भक्तिः, सिद्धचक्रस्य साधने ॥११८॥

मूल्येनैवाऽऽप्यते सर्व-मध्यक्षं यन्निरीक्ष्यते ।
साधना सिद्धचक्रस्या-ऽमूल्या निर्वाणदायिनी ॥११९॥
त्रितत्त्वाराधनाऽप्यत्र, सद्व्रताराधनाऽपि च ।
दानाद्याराधना शुद्धा, मोक्षमार्गाधिसेवना ॥१२०॥
निर्जरासंवरौ तत्त्वे, द्वे निःश्रेयसकारके ।
तन्निबन्धनयोगेषु, सिद्धचक्रस्य मुख्यता ॥१२१॥
शाश्वतं शर्म मोक्षस्य, साधनाऽप्यस्य शाश्वती ।
अष्टाह्निकाद्वयं चाऽपि, शाश्वतं नाकिनामपि ॥१२२॥
तस्मिन् काले सुराः सर्वे, द्वीपे नन्दीश्वराभिधे ।
विधायाऽष्टाह्निकानन्दं, लभन्ते कर्मलाघवम् ॥१२३॥
मिथ्यात्वाविरतियोगाः, कषाया इति हेतवः ।
संसारस्य निरुद्ध्यन्ते, सिद्धचक्रस्य साधनात् ॥१२४॥
सम्यग्दर्शनसंशुद्धिः, संहारोऽविरतेरपि ।
उपशान्तिः कषायाणां, प्रवृत्तिः शुभवर्त्मनि ॥१२५॥
नवानां कर्मणां रोधः, सञ्चितानां च निर्जरा ।
क्रमादात्मस्वरूपं च, निर्मलं स्फटिकाश्मवत् ॥१२६॥
शुक्लध्यानप्रतापेन, घातिकर्मचतुष्टयम् ।
दग्ध्वाऽऽप्नुवन्ति कैवल्यं, वर्णः श्वेतोऽर्हतां ततः ॥१२७॥
श्रेष्ठध्यानाग्निना शीघ्रं, कर्मकाष्ठविदाहकाः ।
सिद्धा रक्तोऽनलो वर्णो, रक्तः सिद्धीशितुर्मतः ॥१२८॥
विषापहं विनीतं च, मङ्गलं सद्रसायणम् ।
प्रदक्षिणावर्त्तमेव-मदाह्यानिन्द्यकं गुरु ॥१२९॥
कञ्चनाष्टगुणा एते, घटन्ते सूरिषु क्रमात् ।
यथा स्वर्णं विषं हन्ति, घ्नन्ति मोहविषं तथा ॥१३०॥
स्वर्णं विनयसम्पन्नं, विनीताः सूरयस्तथा ।
गीयते मङ्गलं स्वर्णं, सूरयो मङ्गलात्मकाः ॥१३१॥
तीव्ररोगापहं स्वर्णं, तत उक्तं रसायणम् ।
भावरोगांश्च प्रघ्नन्ति, सूरयस्तेन सन्निभाः ॥१३२॥
स्वर्णं प्रदक्षिणावर्त्तं, सङ्घभद्रानुगाश्च ते ।
चतुर्विधसङ्घभद्रा-नुकूलाः सूरयो मताः ॥१३३॥
नाऽग्निना दह्यते स्वर्णं, विकटापत्तिवह्निना ।
दह्यन्ते सूरयो नाऽतोऽ-दाह्यास्तेऽत्र प्रभाषिताः ॥१३४॥
निन्दापात्रं न च स्वर्ण-मनिन्द्याः सूरयस्तथा ।
स्वर्णं धातु गुरु प्रोक्तं, सूरयो गुरवस्तथा ॥१३५॥

एवमष्टगुणप्राप्ताः, पीताः श्रीसूरयो मताः ।
ध्येयास्तत् पीतवर्णेन, सूरयो धर्मनायकाः ॥१३६॥
मेघवृक्षोपमानेन, शिष्यान् पाषाणसन्निभान् ।
दत्वा पल्लवितान् बोधं, कुर्वन्ति वाचका अमी ॥१३७॥
तदादिकारणेभ्यस्ते, पाठका नीलवर्णतः ।
ध्येयाश्चित्तस्थिरत्वेन, सिद्धचक्रस्य साधकैः ॥१३८॥
श्यामं स्याद् भानुतापेन, यथा वस्तु तथा मताः ।
तपसो श्रमणाः श्यामाः, तद्ध्यानं श्यामवर्णतः ॥१३९॥
श्वेता गुणस्वरूपेण, अन्तिमा दर्शनादयः ।
तद्ध्यानं श्वेतवर्णेन, तस्मात् कार्यं विवेकिभिः ॥१४०॥
कारणान्तरमीमांसा, वर्त्ततेऽत्राऽप्यनेकधा ।
वर्णानां वर्णनं प्रोक्तं, तेभ्यः सङ्गृह्य देशतः ॥१४१॥
आसन्नमुक्तिभव्यानां, सदैव विधिभावना ।
अभव्यादिकजीवानां, विधित्यागोऽविधौ रतिः ॥१४२॥
ऐहिकार्थाभिलाषेणा-ऽनुष्ठानं यद् विधीयते ।
विषानुष्ठानमेतत्तु, शुभान्तःकरणापहम् ॥१४३॥
पारलौकिककाङ्क्षाजं, गरानुष्ठानमुच्यते ।
गरं संयोगजं तद्वत्, समयान्तरपुण्यहृत् ॥१४४॥
अननुष्ठानमेतत्तु, शून्यचित्तेन या क्रिया ।
अकामनिर्जरा चात्रो-पयोगव्यतिरेकतः ॥१४५॥
अनुष्ठानगताद् रागा-दसुमद्भिर्विधीयते ।
ज्ञेयं तद्धेत्वनुष्ठानं, परमार्थप्रदायकम् ॥१४६॥
जिनमार्गं प्रति प्रीतः, श्रद्धालुर्विधिरागवान् ।
सात्त्विकोल्लाससम्पन्नः, करोति यामनुष्ठितिम् ॥१४७॥
साऽमृतानुष्ठितिर्ज्ञेया, कर्त्ता तद्गतमानसः ।
क्रियाकालविधायी च, भाववृद्धिसमन्वितः ॥१४८॥
पुलकितो विस्मयी च, भवभीतः प्रमोदभाग् ।
लक्षणैर्लक्ष्यते लक्ष्यं, साधना बहुलाभदा ॥१४९॥
भो भव्या! एतदाकर्ण्य, सम्यक् चित्तेऽवधार्य च ।
कार्या साधनसम्पत्त्या, सिद्धचक्रस्य साधना ॥१५०॥

॥ प्रशस्तिः ॥

बाणनिधाननवेन्दु(१९९५)-प्रमिते वर्षेऽक्षयतृतीयायाम् ।
श्री**नेमिसूरि**सुगुरोः, विनेयलघु**पद्मसूरि**रहम् ॥१५१॥ (आर्यावृत्तम्)
माहात्म्यान्वितभावं, नवपदमयसिद्धचक्रसार्धशतम् ।
श्रीम**दहमदाबादे**, स्तोत्रं चक्रे प्रमोदेन ॥१५२॥

◆

## ॥ श्रीसिद्धचक्राष्टकम् ॥

श्रीपार्श्वं स्तम्भनाधीशं, प्रणम्य स्वगुरुं तथा ।
स्तुवे श्रीसिद्धचक्रेशं, सकलाभीष्टदायकम् ॥१॥
नमः श्रीसिद्धचक्राय, सिद्धमाहात्म्यशालिने ।
अनन्तार्थस्वरूपाय, पायकाय भवाम्बुधेः ॥२॥
साध्यसिद्धिसमीहानां, विघ्नध्वंसविधायिने ।
चिन्ताव्याधिसमेतानां, विशालानन्ददायिने ॥३॥
कवीनां कविताशक्ते-र्भव्यानां भावसन्ततेः ।
सम्पदां सम्पदिच्छूनां, मुक्तेर्मुक्त्यभिलाषिणाम् ॥४॥
दायकं सिद्धचक्रेशं, भव्या भाविमहोदयाः ।
भजन्तो भावतो नैव, स्पृश्यन्ते रिपुपीडया ॥५॥ युग्मम् ॥
धर्मिणः पञ्च चत्वारो, धर्मा नव पदाश्रये ।
एकभक्त्या द्वयोर्भक्ति-र्दानादीनां तथैव च ॥६॥
अर्हत् सिद्धाश्च सूरीशाः, पाठकाः श्रमणास्तथा ।
दर्शनज्ञानचारित्रं, तपो नवपदात्मकम् ॥७॥
सिद्धचक्रं परं तत्त्वं, शासने जिनभाषिते ।
परमार्थो न तद्भिन्नः, कल्पशाखी कलावपि ॥८॥
मङ्गलं परमं ध्यानं, क्रियेयं मङ्गलप्रदा ।
मङ्गलं भावतो ध्याता, मङ्गलं साधनाक्षणः ॥९॥
सिद्धाः सिद्ध्यन्ति सेत्स्यन्ति, सिद्धचक्रप्रभावतः ।
भव्यानां क्षीणदोषाणां, साधनेच्छा प्रजायते ॥१०॥
विद्याप्रवाहनिःस्यन्दं, महासिद्धिप्रदायकम् ।
भव्याः ! संसेव्य भावेन, लभध्वं सिद्धिसम्पदम् ॥११॥
गुरूणां **नेमिसूरी**णां, पादसेवाप्रभावतः ।
**पद्मसूरिः** प्रमोदेन, सिद्धचक्रस्तुतिं व्यधात् ॥१२॥

✦

# ॥ ९. शारदास्तोत्रे ॥

## ॥ श्रीशारदालघुस्तोत्रम् ॥

सदतिशयान्वितरूपा, जिनपतिवदनाब्जवासिनी रम्या ।
नयभङ्गमानभावा, प्रभुवाणी बोधदा वोऽस्तु ॥१॥ (आर्या)
तदधिष्ठायकभावं, प्राप्ता श्रीशारदा चतुष्पाणिः ।
श्रीगौतमपदभक्ता, विज्ञानोत्कर्षदा भवतु ॥२॥
प्रस्थानस्मृतिकाले, भावाचार्या निधाय यां चित्ते ।
कुर्वन्ति स्वान्यहितं, स्तवीमि तां शारदां नित्यम् ॥३॥
ॐ ह्रीँ क्लीँ वाग्वादिनि !, वद वद मातः ! सरस्वति ! प्रौढे ! ॥
तुभ्यं नमो जपन्त्वि-त्येतन्मन्त्रं सदा भव्याः ॥४॥
मन्त्रानुभावसिद्धा, मलयगिरिर्हेमचन्द्रदेवेन्द्रौ ।
श्रीवृद्धमल्लमुख्या, जाता जिनधर्मखदिनकराः ॥५॥
ते पुण्यशालिसुधियो, विशालकीर्त्तिप्रतापसत्त्वधराः ।
ये त्वत्पद**पद्म**रताः, प्रभातकाले स्तुवन्ति नराः ॥६॥

◆

## ॥ श्रीसरस्वतीस्तोत्रम् ॥

श्रीस्तम्भनपतिपार्श्वं, नत्वा गुरुवर्यनेमिसूरिवरम् ।
प्रणयामि भक्तिभावः, सरस्वतीस्तोत्रमुन्नतिदम् ॥१॥
सदतिशयान्वितरूपा, जिनपतिवदनाब्जवासिनी रम्या ।
नयभङ्गमानभावा, प्रभुवाणी साऽस्तु वो वरदा ॥२॥
तदधिष्ठायकभावं, प्राप्ता श्रुतदेवता चतुष्पाणिः ।
श्रीगौतमपदभक्ता, सरस्वती साऽस्तु वो वरदा ॥३॥
प्रवचनभक्ता भव्या, यां स्मृत्वा प्राप्नुवन्ति वरबुद्धिम् ।
कमलासने निषण्णा, सरस्वती साऽस्तु वो वरदा ॥४॥

विघ्नोत्सर्जननिपुणा-मज्ञानतमोऽपहां विशदवर्णाम् ।
सितवस्त्रमालिनीं तां, प्रणौम्यहं भारतीं भव्याम् ॥५॥
विशदाभरणविभूषां, निर्मलदर्शनविशुद्धबोधवराम् ।
सुरगीतरतेर्महिषीं, नमाम्यहं शारदाजननीम् ॥६॥
यस्या ध्यानं दिव्या-नन्दनिदानं विवेकिमनुजानाम् ।
सङ्घोन्नतिकटिबद्धां, भाषां ध्यायामि तां नित्यम् ॥७॥
प्रस्थानस्मृतिकाले, भावाचार्याः निवेश्य यां चित्ते ।
कुर्वन्ति सङ्घभद्रं, वाणीं तां प्रणिदधेऽनुदिनम् ॥८॥
श्रुतसागरपारेष्ट-प्रदानचिन्तामणिं महाशक्तिम् ।
दिव्याङ्गकान्तिदीप्तां, मरालवाहनां नौमि ॥९॥
पुस्तकमालालङ्कृत-दक्षिणहस्तां प्रशस्तशशिवदनाम् ।
पङ्कजवीणालङ्कृत-वामकरां भगवतीं नौमि ॥१०॥
वागीश्वरि ! प्रसन्ना, त्वं भव करुणां विधाय मयि विपुलाम् ।
येनाऽश्नुवे कवित्वं, निखिलागमतत्त्वविज्ञानम् ॥११॥
ॐ ह्रीँ क्लीँ वाग्वादिनि !, वद वद मातः ! सरस्वति ! प्रौढे ! ।
तुभ्यं नमो जपन्त्वि-त्येतन्मन्त्रं सदा भव्याः ॥१२॥
मन्त्रानुभावसिद्धा, मलयगिरिर्हेमचन्द्रदेवेन्द्रौ ।
श्रीवृद्धमल्लपूज्यौ, षष्ठो श्रीबप्पभट्टगुरुः ॥१३॥
त्वत्करुणामृतसिक्ता, एते षट् सभ्यमान्यसद्वचनाः ।
जाताः शासनभासन-दक्षास्तत् त्वामहं स्तौमि ॥१४॥
त्वत्पदसेवायोगो, हंसोऽपि विवेकवान् महीविदितः ।
येषां हृदि तव पादौ, भाषे पुनरत्र किं तेषाम् ॥१५॥
स्पष्टं वद वद मातः !, हंस इव त्वत्पदाम्बुजे चपलम् ।
हृदयं कदा प्रसन्नं, निरतं सम्पत्स्यते नितराम् ॥१६॥
रससंचारणकुशलां, ग्रन्थादौ यां प्रणम्य विद्वांसः ।
सानन्दग्रन्थपूर्त्ति-मश्नुवते तां स्तुवे जननीम् ॥१७॥
प्रवराजारीग्रामे, शत्रुञ्जयरैवतादितीर्थेषु ।
राजनगररांतेजे, स्थितां स्तुवे पत्तनेऽपि तथा ॥१८॥
अतुलस्तव प्रभावः, सुरसन्दोहस्तु ते मया बहुशः ।
अनुभूतो गुरुमन्त्र-ध्यानावसरे विधानाढ्ये ॥१९॥
ते पुण्यशालिधन्या, विशालकीर्त्तिप्रतापसत्त्वधराः ।
कल्याणकान्तयस्ते, ये त्वां मनसि स्मरन्ति नराः ॥२०॥
विपुला बुद्धिस्तेषां, मङ्गलमाला सदा महानन्दः ।
ये त्वदनुग्रहसाराः, कमला विमला भवेत् तेषाम् ॥२१॥

गुणनन्दनिधीन्दुसमे(१९९३), श्रीगौतमकेवलाप्तिपुण्यदिने ।
श्रीजिनशासनरसिके, जैनपुरी**राजनगर**वरे ॥२२॥
विज्ञानपुञ्जलाभा, श्रुतदेवीविंशिका विशालार्था ।
प्रणवादिमन्त्रबीजा, श्रुतार्थिभव्याङ्गिपठनीया ॥२३॥
रचिता सरलरहस्या, पूज्यश्री**नेमिसूरि**शिष्येण ।
श्री**पद्मसूरि**णेयं, मुनि**मोक्षानन्द**पठनार्थम् ॥२४॥

**ဢ✦ဢ**

# ॥ १०. गुरुस्तुतयः ॥

## ॥ श्रीगुरुदेवस्तवनम् ॥

अर्हद्भास्करकेवलीन्दुविरहेऽस्मिन् भारते विश्वसत्, तत्त्वाविष्कृतितत्परः प्रविशदाकूतप्रकाशान्वितः ।
उद्दध्रे भविकान् भवान्धुपतितान् सद्देशनारज्जुतो, यस्तं मद्गुरु**नेमिसूरि**ममदं वन्दे मुदाऽहर्निशम् ॥१॥
(शार्दूलविक्रीडितवृत्तम्)
प्राप्यन्तेऽनुपमोत्सवाः प्रतिदिनं भव्यैर्यदाख्यास्मृतेः, सच्चारित्रपवित्रदेहमसुभृद्भद्रङ्करं सर्वदा ।
कर्मस्तम्बलवित्रसाम्यनिलयं प्रस्थानसंसाधकं, तं श्रीमद्गुरुनेमिसूरिमनिशं ध्यायामि सद्भावतः ॥२॥
योगक्षेमकरं सदैव विधिना नव्यार्थलब्धार्थयोः, प्राप्तित्राणविधौ क्रमेण भुवने दीपं प्रदीप्राननम् ।
पञ्चाचारप्रपालनैकनिपुणं श्रीमत्तपागच्छपं, निस्तन्द्रं प्रगुरुं नमामि सततं श्रीनेमिसूरीश्वरम् ॥३॥
सत्त्वे यस्य निरस्तवीर्यप्रसरास्तीर्थान्वयास्तस्कराः, सतत् सत्यं खलु भास्करे समुदिते चन्द्रादितेजः कियत्।
सौभाग्यादिगुणावलिं गणयितुं शक्तो न वाचस्पतिः, तं चिन्तामणिजित्वरं प्रणिदधे श्रीनेमिसूरीश्वरम् ॥४॥
योऽनिर्मान्यपि मान्यकोविदकुलैः सन्मानितां प्रापितः, योऽनङ्गरतिकारकोऽपि विमलानङ्गार्थसंसाधकः ।
निःसङ्गोऽप्युपकारदीनकरुणाद्यैः सद्गुणैः सङ्गवान्, तं कुर्वे प्रणिधानगोचरमहं श्रीनेमिसूरीश्वरम् ॥५॥
कालेऽस्मिन् गणधारिगौतम इव प्रौढप्रभावाञ्चितः, भूपालेभ्यगुणैः गुणैकरसिकैरीज्योऽपि नम्रश्च यः ।
आयोपायविचक्षणः श्रमणसङ्घापायनिस्फेटकः, तं वन्दे ममतावितानरहितं श्रीनेमिसूरीश्वरम् ॥६॥
न्यायव्याकरणादिबोधकलिता यस्य प्रभावाद् ध्रुवं, सम्यग्दृष्टिमहाव्रतादिसहिता दीनानुकम्पाभृतः ।
सप्तक्षेत्रधनव्ययादिनिरता जाता ह्यनेकेऽङ्गिनः, तं भक्त्या सततं मुदा प्रणिदधे श्रीनेमिसूरीश्वरम् ॥७॥
विज्ञातः स्वपरार्थशास्त्रविसरो येनाऽशु बुद्धेर्बलात्, यः पञ्चातिशयैर्युतोऽत्र जयति स्थानाङ्गपाठानुगैः ।
चित्तं सद्गुणनिर्गुणेऽपि समतां यस्याऽन्वहं सङ्गतं, नित्यं वै वितनोतु मङ्गलततिं श्रीनेमिसूरीश्वरः ॥८॥
प्राक् पर्वण्यपि यो बभूव सबलो नैकाशनेऽपि व्रते, सञ्जातोऽखिलशास्त्रयोगकुशलो यस्याऽनुभावादहम् ।
सिद्धान्तार्थरहस्यमप्यवगतं भक्त्या मयाऽन्तःस्थया, तं नौमीप्सितदानकल्पविटपिश्रीनेमिसूरीश्वरम् ॥९॥
वक्तुं शक्तिमती न मेऽपि रसना यस्योपकारावलिं, ध्येयो यो मयि निर्गुणेऽपि प्रगुणो भद्रोन्नतौ सर्वदा ।
आत्मोद्धारक एक एव मम सोपाधेर्भवाम्भोधितः, तीर्थोद्धारपरायणो जयतु स श्रीनेमिसूरीश्वरः ॥१०॥

◆

विद्यागुरु-श्रुतादिपाठक-परमोपकारि-आचार्य-महाराजश्री-

## ॥ श्रीविजयोदयसूरीश्वरस्तोत्रम् ॥

नत्वा कदम्बतीर्थेशं, नेमिसूरीश्वरं गुरुम् ।
श्रुत**दोदयसूरी**शं, संस्तवीम्युपकारिणम् ॥१॥ (अनुष्टुब्वृत्तम्)

सज्ज्ञानादिगुणाय कोविदसभाविख्यातसत्कीर्त्तये, मान्यप्राज्ञसमूहवन्द्यचरणाम्भोजाय सद्योगिने ।
सद्व्याख्यानकलाय तीक्ष्णमतये पूज्याय पूज्यैरपि, गच्छेशोदयसूरये प्रशमिने तस्मै नमोऽनारतम् ॥२॥
(शार्दूलविक्रीडितवृत्तम्)

निःशेषस्वपरागमार्थगहनैदम्पर्यसद्वेदिनं, श्रीसङ्घोन्नतिकारकं मुनिततिज्येष्ठं मनोज्ञक्रियम् ।
भव्योद्धारसमीहया श्रुतमहादानं ददानं सदा, निर्मानं गुरुभक्तितीव्रधिषणाचार्योदयं संस्तुवे ॥३॥
दक्षं दातुमुदारशास्त्रगहनप्रश्नोत्तरान् प्रस्फुटान्, निर्देशं त्रिदशेन्द्रचक्रिविनुताङ्घ्र्यम्भोजपूज्यार्हताम् ।
कार्यौघं विदधानमस्तकलुषं हर्षात् पुरस्कृत्य च, सद्ध्यानप्रणयं प्रमादरहितं सद्भावनाभावितम् ॥४॥
उत्सर्गेतरमार्गयोग्यघटनान्यासादिषड्दर्शने, नैपुण्योपगतं स्वधर्मरसिकं वादीभकण्ठीरवम् ।
गूढार्थानुगतानुयोगरचनाऽऽविर्भावकं निःस्पृहं, भाषातत्त्वविवेचकं निजगुणारामे नितान्तं रतम् ॥५॥
कल्याणाभिनिवेशसाध्यकुशलं सत्स्मारणाद्युद्यमं, शिष्टाचारमशेषदोषरहितं प्राराधयन्तं मुदा ।
भीमेऽस्मिन् भववारिधौ प्रगतिमद्भव्याङ्गिनां श्रेणये, यच्छन्तं च तरीनिभां करुणया सद्देशनां पेशलाम् ॥६॥

परमसंयममण्डनभूषितं, प्रमुदिताशयशान्तिगृहाननम् ।
जिनपशासनभासनतत्पर-मुदयसूरिमहं सततं स्तुवे ॥७॥ (द्रुतविलम्बितवृत्तम्)

संज्ञावेदनिधीन्दु(१९४६)-प्रमिते संवत्सरे सिते पौषे ।
श्रीमत्स्तम्भनतीर्थे, ये जाता द्वादशीदिवसे ॥८॥ (आर्या)
दीक्षां देवाग्रामे, युगलेश्यानिधिविधु(१९६५)प्रमितवर्षे ।
वैशाखे सितषठ्यां, तेभ्योऽदुर्नेमिसूरिवराः ॥९॥
निधिलेश्यानन्दशशि(१९६९)-प्रमिते संवत्सरे शुभाषाढे ।
श्वेतनवम्यां येभ्यः, कर्पटवाणिज्यके गुरुणा ॥१०॥
दत्तं प्रज्ञाशपदं, नेत्राम्बुधिनिधिनिशाकर(१९७२)प्रमिते ।
वर्षे कृष्णे पक्षे, शुद्धतृतीयादिने गुरुणा ॥११॥
वाचकपदं प्रदत्तं, मरुधरदेशीयसादडीग्रामे ।
मृगशीर्षकृष्णपक्षे, चङ्गमुहूर्ते तृतीयायाम् ॥१२॥
श्रीमत्स्तम्भनतीर्थे, निधिवार्धिनवेन्दु(१९७९)वर्षवैशाखे ।
असिते पक्षे वर्ये, उत्तमदिवसे द्वितीयायाम् ॥१३॥
गुणगुरुणा श्रीगुरुणा-ऽऽचार्यश्रीनेमिसूरिणा प्रमुदा ।
ये सद्गुणसम्पन्ना, आचार्यपदान्विता विहिताः ॥१४॥
तानुदयसूरीशान्, धन्या बहुमानतो प्रसेवन्ते ।
तत्त्वपरीक्षाप्रमुखा, यैर्ग्रन्था विरचिता बहवः ॥१५॥

शिल्पज्योतिर्योग-ग्रन्थानुभवा कृपालवो विज्ञाः ।
ते सूरयो जयन्तु, विहितानेकाञ्जनशलाकाः ॥१६॥
इषुनन्दनिधानेन्दु(१९९५)-प्रमिते नाभेयपारणादिवसे ।
श्रीमदहमदाबादे, रचितं **पद्मे**न स्तोत्रमिदम् ॥१७॥

◆

## ॥ श्रीविजयनन्दनसूरिस्तोत्रम् ॥

पणमिय थंभणपासं, वंदिय गुरुनेमिसूरिचरणकयं ।
थुणिमो णंदणसूरिं, गुणरयणसमुद्दसारिच्छं ॥१॥ (आर्या)
इसुकरणणिहिंदु(१९५५)समे, वरकत्तियकण्हपक्खणुगयाए ।
इक्कारसीवरदिणे, भावनयरपंतमज्झगए ॥२॥
वरबोटादग्गामे, धम्मिय सा.हेमचंदजणयस्स ।
सिरिजमणामाआए, कुच्छीए जो समुप्पण्णो ॥३॥
सिट्ठ-णरुत्तमणामं, जणणीजणयाइएहि संठवियं ।
कमसो विहियब्भासो, जाओ सो पंचदसवरिसो ॥४॥
गयणिसिणंदिंदु(१९७०)समे, माहबिईयाइ पुण्णवेरग्गा ।
वरदिक्खं गिण्हित्ता, णंदणविजया पसीसत्तं ॥५॥
सिरिनेमिसूरिगुरुणो, तवगच्छगयणदिणेससरिसस्स ।
पण्णासोदयगणिणो, संपडिवण्णा विणेयत्तं ॥६॥
णहकरिणिहिंदु(१९८०)वरिसे, माहवमासे समुज्जले पक्खे ।
इक्कारसीइ पुण्णो-च्छवे पवररायणयरंमि ॥७॥
सिरिनेमिसूरिगुरुणा, गणिपयमेसिं पहाणगुणकलियं ।
दिण्णं सुहछट्ठीए, पण्णासपयं च किण्हाए ॥८॥
गुणकरिणिहिंदु(१९८३)वरिसे, माहवसियपंचमीइ सुहयाए ।
वायगपयं पदिण्णं, जइणउरीरायणयरम्मि ॥९॥
आयरियपयं दिण्णं, रायणयरसाहिबागमज्झंमि ।
णंदणसूरी जाया, विजओदयसूरिपट्टंमि ॥१०॥
विहियाणेगग्गंथा, कइरयणोवाहिभूसिया विउहा ।
णिच्चं णंदणसूरी, पगइपसंता पणंदंतु ॥११॥
सरणिहिणंदिंदु(१९९५)समे, पढमजिणेसवरपारणादियहे ।
णंदणसूरित्थवणं, विहियं पोम्मेण हिट्ठेणं ॥१२॥

★

## ॥ ११. वैराग्यकाव्ये ॥

### ॥ श्रीवैराग्यषोडशकम् - १ ॥

भव्याऽऽसाद्य जिनेशानं, देवं त्यागिगुरुं तथा ।
त्रिपुटीशुद्धधर्मं च, प्रमादाचरणं त्यज ॥१॥ (अनुष्टुब्वृत्तम्)
कालेऽनन्ते गते शुभ्रां, सामग्रीं पुण्ययोगतः ।
लब्ध्वा तां निष्फलीकुर्युः, प्राज्ञाः के भद्रकाङ्क्षिणः ॥२॥
उत्तमां धर्मसामग्रीं, येऽत्र कुर्वन्ति निष्फलाम् ।
दुर्जना निन्दनीयास्ते, सद्भिर्धर्मपरायणैः ॥३॥
त्यक्त्वाऽनुकृतिमेषां च, मत्वा दुर्गतिसाधनम् ।
सद्भावनाविवेकेन, सत्कृतिं परिभावय ॥४॥
साधनाद् दर्शनादीनां, दोषाणां परिहारतः ।
सन्तोऽनवद्यसाध्यस्य, सिद्धिमश्नुवतेऽञ्जसा ॥५॥
सन्मार्गाश्रयणं श्रेय-स्तस्मादित्युक्तिरर्हताम् ।
एवं चोक्तविधानेन, सद्भावात् परमं पदम् ॥६॥
एकोऽहं नास्ति मे कश्चि-न्नाऽहमप्येवं कस्यचित् ।
ममाऽऽत्मा शाश्वतो युक्तः, सज्ज्ञानादिगुणैस्तथा ॥७॥
संयोगलक्षणा बाह्याः, पदार्था दुःखदायिनः ।
यतोऽङ्गिना तेभ्य एव, भुक्ता दुःखावलिर्मुहुः ॥८॥
सुखमार्गः स्पृहाभावो, महद्दुःखं परस्पृहा ।
साधनं दुःखनाशाय, परमं धर्मसाधना ॥९॥
दुग्धं पिबन् च मार्जारो, गणयेन्नैव ताडनाम् ।
भुञ्जाना विषयानेवं, भविनो भाविनीं मृतिम् ॥१०॥
नीरपूरसमो देहो, जीवितं वायुचञ्चलम् ।
लावण्यं क्षणिकं रामा-नयनाञ्चलसन्निभं ॥११॥

यौवनं स्वप्नसंकाशं, स्वाम्यं चापि विनश्वरम् ।
चले प्रेमसुखे चैव-मिन्द्रचापसमाः श्रियः ॥१२॥
अनित्यभावनाभावी, संयोगादौ न शोचति ।
विपरीतस्तुच्छनाशे, क्रन्दनं कुरुतेऽन्वहम् ॥१३॥
दृष्टान्तं भरतश्चक्री, देहादीनामनित्यताम् ।
भावयन् केवलं प्रापा-ऽऽदर्शगेहे शिवप्रदम् ॥१४॥
एवं भव्यैर्मुदा भाव्या, मोहनाशाय भावना ।
पावनेयं क्रमाद् दत्ते, शैलेशी सुखसम्पदम् ॥१५॥
गुरुणां **नेमिसूरी**णां, पूज्यानां सत्प्रसादतः ।
प्रणिनाय **पद्मसूरिः**, सद्वैराग्याष्टकद्वयम् ॥१६॥

◆

## ॥ श्रीवैराग्यषोडशकम् - २ ॥

येषां संहननं बभूव सबलं वज्रर्षभाद्यं तथा-ऽऽयुश्चैवं निरुपक्रमं गतगदं तेऽनित्यतालिङ्गिताः ।
सम्प्राप्ता मरणं विचारय तदा रे जीव ! का ते कथा ?, ते देहः सबलो न किन्तु कदलीगर्भैः समोऽल्पस्थितिः ॥१॥
किम्पाकप्रतिमाः समस्तविषया निःसीमदुःखप्रदाः, सौख्यं किञ्चिदवास्तवं च मनुते मोहीजनोऽज्ञानतः ।
मार्जारश्च पयो गृहीतलकुटं नोत्पश्यति स्वादयन्, भुञ्जाना विषयान् यमं विषयरागाढ्यस्तथा मोहतः ॥२॥
भुक्तं हन्ति विषं स्मृता अपि च ते मृत्यर्तिदाः सर्वतो, दुःखान्यत्र बहून्यवाप सुसतीसीतेच्छया रावणः ।
कन्दर्पोऽपि जहावसूंश्च मलयां काङ्क्षन् महामोहतो, विज्ञायैवमनन्तकालसुखदे धर्मे विधेया रतिः ॥३॥
विष्ठामूत्ररसास्थिमेदकुणिमासृग्रक्तशुक्रादिभिः, सम्पूर्णं रमणीशरीरमशुचि प्रीत्यर्हमेतन्न तद् ।
रोगोत्पादककारणेषु नवसु स्थानाङ्गगेषूदिता, भोगासक्तिरनिष्टरोगततिदा हेयो विकल्पोऽस्य तत् ॥४॥
आयुर्वायुतरङ्गसन्निभमिदं सोपक्रमं वाऽस्थिरं, प्रत्यक्षं च निरीक्ष्यतेऽत्र जननीगर्भे मृताः केचन ।
केचिज्जन्मगताश्च बाल्यसमये केचिन्मृता यौवने, कार्या धार्मिकसाधनाऽत इह संत्यक्त्वा प्रमादं सदा ॥५॥
स्वाम्यं वारणकर्णसन्निभमिदं विद्युच्चला सम्पदो, नारीलोचनचञ्चलं भवसुखं स्वप्नोपमं यौवनम् ।
सर्वे स्वार्थपरायणा निजजनाः स्नेह्यादिरागोऽस्थिरः, सिद्धे स्वार्थ इहाऽपयान्ति निजकाः कार्या रतिस्तेषु न ॥६॥
यत्सम्बद्धमिदं शरीरमधुना रे जीव ! ते जन्मन-स्त्यक्त्वा त्वं तदपि प्रयास्यसि परं लोकं च मोहं त्यज ।
शब्दादीन् प्रविहाय मोहविषयान् प्रत्याव्रजन्तीक्षितुं, नो केऽपीति विचारणीयमसकृत् के के स्मरन्तीति तान् ॥७॥
एकोऽहं मम कोऽपि नो भववने कस्याऽप्यहं नो कदा, शिक्षां चेतसि धारय प्रमुदितस्त्वं दर्शनाद्यात्मकः ।
नित्यस्त्वत्परवस्तुजातमखिलं बाह्यं विभावात्मकं, भुक्ता दुःखततिस्त्वयाऽत्र सततं संयोगमूला भवे ॥८॥
उक्तामेवमनित्यतां प्रतिदिनं ये भावयन्त्यादरात्, ते शोचन्ति सुतादिके न मरणं प्राप्तेऽपि प्राणप्रिये ।
सर्वं नित्यमिति ग्रहार्त्तमनुजा भग्ने कुटीरेऽपि चा-ऽबोधान्नित्यमपारशोकजलधिं मज्जन्ति धर्मोज्झिताः ॥९॥
धर्मोऽर्हत्प्रभुभाषितोऽतिविशदस्त्राणं परस्मिन्निह, कर्माणि प्रलयं प्रयान्त्यनुदिनं घोराणि यद्भक्तितः ।
यं संसाध्य गताः शिवं च भविनः सेत्स्यन्ति सिध्यन्ति च, जीवेनाऽत्र मृतेन गच्छति परं लोकं स सार्धं सदा ॥१०॥

ये स्वीयोन्नतिसाधकाः प्रशमदाः संसाधयेस्तान् मुदा, साध्यादूर्ध्वमनिष्टमिष्टमिति वा चैष्यत्फलं संस्मरेः ।
कृत्याभासनिबन्धनप्रतिविधानोपायमालोचये, रागद्वेषलयो यथा भवति सङ्कुर्याः प्रवृत्तिं तथा ॥११॥
सम्प्रीतो भव सर्वदा निजगुणारामे रतस्त्वं मुदा, कर्माधीनदशागताश्च भविनश्चित्रं बुधानां कथम् ? ।
त्वं कस्याऽपि न कोऽपि तेऽत्र न भवे पार्श्वे त्वदीयं तव, त्वद्भिन्नं तव नास्ति पुद्गलरतित्यागी भव त्वं मुदा ॥१२॥
रागद्वेषरिपू प्रशान्तिघनवायू तीव्रदुःखप्रदौ, तौ त्यक्त्वाऽतुलसात्त्विकोन्नतिगतेलेशः सदा त्वं भव ।
त्वां खिन्नं च विधास्यतीह परकीयाशा महाक्लेशदा, आशादास्यमुपागताश्च मनुजाः संस्युर्जगत्किङ्कराः ॥१३॥
न्यायाधीशदशः कदापि विमती रोगी निरोगः कदा, इभ्यस्त्वं च कदापि निर्धनदशस्त्वं दूरुची रूपवान् ।
शक्तस्त्वं च कदाप्यशक्तिकलितोऽप्येवं स्थितीः कर्मणां, ज्ञात्वा त्वं भव जीव ! साम्यनिरतः शुद्धोपयोगी सदा ॥१४॥

निष्कामवृत्तिभिर्भव्यै-र्भाव्याऽतो ममतापहा ।
यतोऽर्हद्धर्मनिर्विघ्ना-राधना सफला भवेत् ॥१५॥ (अनुष्टुब्वृत्तम्)

बाणनिधाननवेन्दु(१९९५)-प्रमिते वर्षेऽक्षयतृतीयायाम् ।
श्रीमद**हमदाबादे**, विशदं वैराग्यकुलकमिदम् ॥१६॥ ॥ (आर्या)

श्री**नेमिसूरि**शिष्यो, गुर्वनुभावेन **पद्मसूरि**रहम् ।
प्रणिनायाऽतो पुण्यं, यत् तेन सुखी भवतु सङ्घः ॥१७॥

## ॥ १२. प्रशस्तिः ॥

बाणनवनिधिसुधांशु(१९९५)-प्रमिते वर्षेऽक्षयतृतीयायाम् ।
पुर्यां श्री**मधुमत्यां**, विशिष्टनररत्नपूर्णायाम् ॥१॥
परमोपकारिसुगुरोः, तपगच्छप**नेमिसूरि**वर्यस्य ।
शिष्याणु**पद्मसूरिः**, **प्रकाशविजय**स्य विज्ञप्त्या ॥२॥
श्री**स्तोत्रा**दिम**चिन्ता-मण्या**ख्यं स्तोत्रविविधसङ्कलनम् ।
ग्रन्थं चकार सोऽत्रा-ऽऽतनोतु जिनशासने नन्दीम् ॥३॥
यदुपार्जितं सुपुण्यं, ग्रन्थविधानान्मया सदा तेन ।
प्रभुभक्तरता भव्या, भवन्तु चाऽन्ते चिदानन्दाः ॥४॥

*श्रीस्तोत्रचिन्तामणिग्रन्थः*
*समाप्तः ॥*

# प्राकृतस्तोत्रप्रकाशः

◆

श्रीविजयपद्मसूरिः

# अनुक्रमः

| | |
|---|---|
| | **पृष्ठम्** |
| समर्पणम् | १९८ |
| प्रकाशकगाथा | २०० |
| प्रस्तावना | २०१ |
| १. मङ्गलाचरणम् | २०३ |
| २. चैत्यवन्दनसङ्ग्रहः | २०४ |
| ३. जिनस्तोत्राणि | |
| सिद्धाचलस्वामिस्तोत्रम् | २१६ |
| आदीश्वरस्तोत्रम् | २१७ |
| केसरीया-आदिनाथस्तोत्रम् (अनेकार्थम्) | २१८ |
| केसरीया-देवाष्टकम् | २२० |
| तारङ्गाधीश-अजितनाथस्तोत्रम् | २२२ |
| सम्भवनाथस्तोत्रम् | २२३ |
| अभिनन्दनस्वामिस्तोत्रम् | २२७ |
| तालध्वजमण्डन-सुमतिनाथस्तोत्रम् | २३० |
| गिरनारस्वामिस्तोत्रम् | २३३ |
| अरिष्टनेमिस्तोत्रम् | २३४ |
| स्तम्भनपार्श्वस्तोत्रम् (अनेकार्थकम्) | २३५ |
| कदम्बमहावीराष्टकम् | २३६ |
| मधुमती-जीवत्स्वामि-द्वात्रिंशिका | २३७ |

४. स्तोत्रसन्दोहः
पुण्डरीक-द्वात्रिंशिका २४०
गौतमस्वामिमहास्तोत्रम् २४२
गौतमस्वामिस्तोत्रम् २४४
चिन्तामणिस्तोत्रम् २४५
चिन्तामणिबृहत्स्तोत्रम् २४७
पर्युषणास्तोत्रम् २५२
सुधाकरस्तोत्रम् २५३
कल्याणस्तोत्रम् २५४
यशोद्वात्रिंशिका २५५
सरस्वतीविंशिका २५७
५. जिनेन्द्रतीर्थवन्दना २५९
६. कदम्बगिरिबृहत्कल्पः २६१
७. सिद्धचक्रस्तोत्रसन्दोहः
अर्हत्पदस्तोत्रम् २७२
सिद्धपदस्तोत्रम् २७४
आचार्यपदस्तोत्रम् २७७
उपाध्यायपदस्तोत्रम् २८१
साधुपदस्तोत्रम् २८७
सम्यग्दर्शनपदस्तोत्रम् २९१
सम्यग्ज्ञानपदस्तोत्रम् २९९
सम्यक्चारित्रपदस्तोत्रम् ३०६
सम्यक्तपःपदस्तोत्रम् ३१०
८. गेयस्तवनानि
आदिनाथस्तवनम् ३१६
शान्तिनाथस्तवनम् ३१६
नेमिनाथस्तवनम् ३१७
मूलेवापार्श्वनाथस्तवनम् ३१७
महावीरस्वामिस्तवनम् ३१७
९. गुरुस्तोत्राष्टकम् ३१९
१०. प्रशस्तिः ३२०

## ॥ सिरिगुरुमहारायहत्थकमले समप्पणं ॥

मईयप्पुद्धारग-परमोवयारि-पच्चूसाहिसरणिज्जणामधिज्ज-भावरत्ततयीदायग-पुज्जपाय-सिरिगुरुमहाराए !

पवित्तसनामधण्णा तुम्हे परमपुज्जा पुव्वावत्थाए सिरिवज्जसामिप्पमुहमहापुरिसप्पयरपायरेणुपवित्तिय-जावडसाहाइसमणोवासगावयंसजम्मणभूमिपाईण**महुमई**णयरीणिवासिजणयदेवगुरुधम्माणुरागिब्भप्पवरसड्ढसिरोमणि-**लच्छीचंद**रयणकुच्छिणीजणणी**दीवालि**कुलदीवगा तणया ।

जम्मि वरिसारंभदिणे सव्वत्थप्पमोयभरियहियया सव्वे विहरंति, तम्मि निहिनयणणंदिदुमिय(१९२९)-विक्कमसंवच्छरीयकत्तियसियपढमवासरे भवईयजम्मो ।

पुव्वभवीयदढधम्मियसक्कारा भवंतो भगवंतो संसारं कडुयविससंनिहं मसाणमोयगं व वा णीसारमाभोइअ पसत्थऽगण्णगुणनिहाणपसंतमुत्तिभव्ववेरग्गरंगरंजियसिरि**भावणयरा**इभव्वयणसद्धम्मरसा-सायणविहाणाइभावुवयारकारगपीऊसपाणिपरमगुरुसिरिवुड्ढिविजय(वुड्ढिचंदजी)महारायपासम्मि जिणधम्मरसियच-उविहसिरिसंघभव्वजिणालयाइधम्मियट्ठाणविहूसियसोरट्ठदेसविसालणयरसिरिभावणयरे सरसायरंकचंद(१९४५)-मियविक्कमणिवइसंवच्छरीयसुक्कसुक्कसत्तमीवासरे सीहनिदंसणेणं सुरा होऊणमणंततित्थहरगणहराइलो-उत्तरपुरिससेवियपयंसियसमप्पिय महाकल्लाणहेउसत्तियाणंदरयणायरुल्लासपुण्णिमाचंदकलासंनिहपरम-पावणप्पव्वज्जं गिण्हीअ ।

अचिंतचिंतामणिकप्पेहिं तुम्हेहिं जहेव गहिया तहेव तं पालंतेहिं णाणावरणिज्ज-कम्मविसिट्ठखओवसमलद्धागाहबुद्धिबलाओ जिणिंदभासियविविहाणुओगमयससमयनायव्वागरणाइपरसमयब्भासं सिग्घं किच्चा नायसिंधु-गुरुलहुहेमप्पहा-नाआलोय-खज्जखंडणवित्तिप्पमुहविविहविसयप्पहूयग्गंथ-संदब्भप्पणयणं काऊआणं विहिया चिरस्सरणीया भव्वा साहिच्चसेवा ।

अवियणण्णपसत्थविविहतत्तत्थपयंसिणीभव्वदेसणाइसाहणगणबलाओ तुब्भेहिं अभक्खरसिउम्मग्ग-गामिगणणाईयनिवालाइजीवा वि सद्धम्मपरायणा विहिया महोवयारकरणबद्धलक्खयाए ति ।

तहा दट्ठूणं तुम्हाणं सम्मद्दंसणचारित्तविसिट्ठदेसणापयाणभव्वसत्तिप्पमुहप्पहाणगुणतइं गुरुबंधुगीयत्थ-सिरोमणिसमणसंदोहसेहरपरमपुज्जसग्गुणरयणरयणायरपण्णासप्पवरसिरि**गंभीरविजय**गणीसरेहिं कारवित्ता णिहि-लागमजोगुव्वहणाइविहाणं जहासुत्तं महप्पाईणजइणागमवायणत्थल**वल्लहीउर**म्मि भवयाणं महणीयपायारविंदाणं गयणरसंकससिप्पमिय(१९६०)विक्कमनरवइसंवच्छरीयकत्तियमासासियसत्तमीए विइण्णं गणिपयं तहा तयद्दे

चेव मग्गसीससुक्कतईयाए पण्णासपयं ति ।

तयणंतरं साहियवरिसचउक्के वइक्कंते तेहिं चेव पुव्वणिद्दिट्ठक्खगणीसरेहिं भवईयदिक्खानिकेयणे सिरि**भावनयरे** वड्ढिरसनिहाणणिसीहिणीनाहसम्मिय(१९६४)विक्कमसंवच्छरगयसुक्कमाससियपक्खपंचमीए **दसवेयालिय**वित्तिप्पयासियभावायरियसमग्गणण्णियाणं तत्थभवयाणं भवयाणं दिण्णं तवगच्छाहिवइ-भट्टारगायरियपयं ।

तुम्हे भगवंतो पुव्वहरसिरि**देववायग**प्पणीयपंचविण्णाणाइसरूवप्पयासग-सिरि**नंदीसुत्त**वुत्तरयण-सागरमेरुप्पमुहविविहोवमपुज्जसिरिसंघभवण्णवतारगतित्थाइसुहखित्तभत्तिं करीअ कुणेहाऽहुणा वि त्ति।

तहा तुम्हाणममोहुवएसेहिं देवगुरुधम्मरसियसंघवइसेट्ठिवज्जमाणेकलाल-मणसुहभाइ-भगुभाइप्प-मुहप्पहूयभव्वजीवा रीछक्कपालणविसालचाउवण्णसंघसमेयाणंततित्थंगराइसमलं कियतित्थाहिरायसिरिसत्तुंजया-इमहातित्थजत्तंजणसलायाइपसत्थधम्मिखित्तेसुमणेगलक्खाइमाणदविणव्वयं करीअ कुणंति वि त्ति ।

तहा तुम्हेहिं भगवंतेहि अम्हारिसाणमसंखिज्जजीवाणमुप्पि सव्वविरइदेसविरइप्पमुहमुक्खसाहणप्पययाणेणं निरवहिमहोवयारा विहिया, कुणह पुज्जा तुम्हे वट्टमाणसमए वि त्ति ।

एवं भवईयसंखाईयलोउत्तरगुणाकड्ढाविओऽहं सरित्ता भवया विहियमगण्णुवयारावलिं तुम्ह-केरप्पसायाओ मए विरइए सिरिथुत्तचिन्तामणि-पागयथुत्तप्पयासाहिहग्गंथे तुम्हकेरकरकमलेसुं समप्पियमहप्पि-णं धण्णं कयत्थं मण्णेमि ।

इच्छामि निरंतरंयहमिणं, जउय तुम्हकेरपुण्णाणुहावेणं (१) पागयमागहिआसक्कयगुज्जराइभासासुं सव्वजणियसरलग्गंथरयणं किच्चा सिरिसंघाइपवित्तसुहधम्मियखित्तभत्तिविहाणावसरो (२) तुम्हारिसपरम-पूयणिज्जपायगुरुदेवा (३) सिरिजिणिंदसासणसंसेवा (४) णिम्मलणिरहिलाससंयमसंसाहणमयसत्तियजीवणं (५) परोवयाराईणि संपुण्णप्परमणयासाहणाइं मिलउ ममं भवे भवे त्ति विण्णवेमि हं तुम्हकेर चरणकिंकरणिग्गुण**पउमा**हिहविणेयाणू ॥

## ॥ जीए इमे गंथा मुद्दाविया सा सिरिजइणगंथप्पयासयसहा ॥

सुग्गहियणामधिज्ज-जइणसासणगयणभाणु-परमपुज्जपुव्वायरियाइमहापुरिसप्पणीयदव्वाणुओगाईविविह-पयत्थतत्तप्पयासगाउव्वपाईणनूयणग्गंथाणं नायव्वागरणाइगंथाणं च विणा मुल्लमप्पमुल्लिएण वा जइणाइभव्व-जीवाणं लाहो दायव्वो त्ति इमाए सहाए अज्जावहि सवित्तिनायखंडणखज्ज-नायालोय-संबोहप्पयरण-सिरिसावयधम्मजागरिया-पट्टुत्थण्णिय-सिरिसिद्धचक्कपूया-भावणाकप्पलया-देसविरइजीवणाइ पहूओवओगिग्गंथे मुद्दाविऊणं पयासीअ । तयणंतरम्मि समए विविहछंदोबद्ध-पसत्थपहुभत्तिभाव-पयत्थतत्तललिय-सिरिथुत्तचिंतामणि-पागयथुत्तप्पयासक्खग्गंथा पत्थुयसहाकज्जवाहग**मूलचंद**प्पएसरदासेणं पयासिज्जंति । गंथयारसिरिविजय**पोम्मसूरि**णा गंथजुयलप्पणयणकारणाइसरूवं पत्थावणाए सवित्थरं पयंसियं ति तत्तो विण्णेयं । एयम्मि गंथजुयलमुद्दावणे ण कस्सवि अत्थियसाहज्जं ति जुग्गमुल्लप्पयाणव्ववत्था विहिया सहाइ त्ति । एयाइ अण्णाइं पि गंथरयणाइं ''सिरिजइणग्गंथप्पयासगसहा, अमदावाद, पांजरापओलिया णाणसाला, शा. मोतीलाल डुंगरसी वखारिआ'', इय स्थले मिलिस्संति त्ति निवेएइ सारयाभुवणसिक्खगो मणसुहरामतणओ मंगलदासो ॥

॥ ॐ नमोऽभीष्टदेवादिवर्गाय ॥

॥ नमो तवगच्छाहीसर-परमोवयारि-परमगुरु-सिरिविजयणेमिसूरीणं ॥

## ॥ गंथद्दयपत्थावणा ॥

जस्साहिहाणसरणा पहवंति सिद्धी, सम्मग्गया भवियणा सुणिऊण सिक्खा ।
पुण्णप्पहावकलियं तवगच्छनाहं, वंदामि तं मह गुरुं सिरिणेमिसूरिं ॥१॥ (वसंततिलयावित्तम्)

अणंतगुणरयणसायरतित्थयरप्पहुप्पयासियाहरीकयकामधेणुसुरपायवचिंतामणिकप्पलयापमुहपसत्थपयत्थ-सत्थमाहप्पसिरिजिणिंदसासणरसियप्पियबंधुणो ! (१) पइग्गंथं के के पयत्था पयंसिया केण सरूवेणं ? (२) किं पओयणं गंथप्पणयणस्स ? (३) गंथम्मि के जीवा अहिगारी ? (४) गंथज्झयणे किं फलं ? (५) के गंथयारा ? इच्चाइपण्हुत्तरगब्भियवुत्तंतजाणणट्ठं महोवओगिणी पत्थावण त्ति णाऽविइयं जहत्थाहि-हाणनाणकिरियारसियाणं विउहसेहराणं ।

जीए समग्गगंथसारंसो संखेवा भण्णिज्जइ, सा पत्थवणा वुच्चइ । जग्गंथगोयरपत्थावणा लिलिहिसा वट्टए, तस्स समग्गगंथस्स दीहदिट्ठीए पुव्वालोअणाविहाणपुव्वं गंथयारविहियवण्णणाहिप्पायलक्खं चित्ते धारिज्जइ । एयं पद्धइमणुसरिऊणमेव लिहिज्जइ पत्थावणा तत्तत्थणिस्संदधारगेहिं लेहगेहि त्ति जाणित्ता कुसला गंथवायगा गंथसंखित्तरहस्समणहिएणं कालेणं जाणिउं पुव्वं वाएंति गंथपत्थावणं ति । एयंपि य ण विस्सरणीयं, जउय पत्थावणाविहीणो गंथो न संपुण्णो त्ति । अओ सुण्णेयमिणं जउय पत्तेयग्गंथाईए जुत्तिजुत्ता चेव पत्थावण त्ति ।

अणेण नियमेणमिमस्स वि गंथजुयलस्स विसए (१) पढमस्स ''थुत्तचिंतामणि'' त्ति बीयस्स य ''पाईयथुत्तप्पयास'' त्ति णाणं केणाऽभिप्पाएणं ठवियं गंथयारेणं ति ? (२) दोसु वि ग्गंथेसु पत्तेयं किमभिधेयं वट्टए ? (३) तत्थ तत्थवंतरग्गंथा वि के के वट्टंति ? (४) किं पयोअणं पत्तेयग्गंथस्स ? (५) गंथरयणा कम्मि वरिसे मासतिहिसंजुत्ते कम्मि य नयरे कं निमित्तमालंबिऊणं कीए सेलीए विहिया ? इच्चाइबोहणट्ठं नाणुवओगिणी पत्थावण त्ति विभाविऊणमेयट्ठमुवक्कमिज्जए ।

अणाइकालीणचउविहसंसारब्भामगमोहणीयब्भासा अरहट्टघडियण्णाएण भवम्मि संसरणसीलाणं भवियजीवाणं सेयट्ठं परमकिवालुभवसायरनिज्जामगमहामाहणतिउडीविसुद्धकरुणासंजमतवाइमयधम्मप्पयासगप-

हुसिरितित्थयरेहिं समुवएसिएसु पसत्थालंबणेसुं भत्तिमग्गालंबणं पि पहाणभावेणमुवइट्ठं ति नाणुइयं, जओ भत्तिगुणप्पमुइया भव्वा ण भमंति तिरिगइपमुहा विविहदुहाणुभवनिबंधणा दुग्गई, तहा णाणाइगुणेहिंतोऽवि भत्ती निप्पडिवाया पण्णत्ता देवयाहिट्ठियबीयबुद्धिलद्धिसिद्धिनिहाणचउणाणिगणहरगुंफियपवयणे त्ति ।

जओ माणाइहेउकलावपरिहीयमाणनाणगुणासुमंताणं पसत्थनाणफलमणुण्णविरइफलासायणभयणा जहा दीसइ, न तहा भत्तिमंता सोग्गइसफलं न लहंति त्ति ।

अविय । लोइयसत्थेसु वि तिण्णि नेत्ताइ वुत्ताइ, तं जहा- (१) चम्मनेत्तं (२) नाणनेत्तं (३) दिव्वचक्खुं ति । तत्थ दिव्वचक्खुं कस्स होज्जा ? अत्थुत्तरम्मि पडिवाइयं जं – ''दिव्यचक्षुर्ज्ञानिनो भक्तजनस्य च'' । इणमत्थ तप्पज्जं- नाणीणं भत्तिप्पहाणजीवणसालीणं य होज्जा दिव्वनयणं । एत्तो इणं सिज्झइ चेव जउय भत्ती खलु इट्ठसिद्धीए अउव्वं साहणंति ।

विहिविण्णाणबहुमाणमणसुद्धिप्पमुहसाहणसामग्गीए संसाहिया भत्ती होज्जा सफलप्पयाइणी त्ति वि विण्णकुलसुण्णेयमेव । मणसुद्धी वि दव्वत्थवविहेयभावत्थवमय-पागयसक्कयाइभासानिबद्धथुत्ताइय-पसत्थालंबणसेवणाहीणा चेव त्ति वियाराओ मए प्पणीयाणि थुत्तचिंतामणीए विविहवित्तेहिं सक्कयथुत्ताइ पागयत्थुत्तप्पयासे य पागयथुत्ताइं परमोवयारिसुग्गहियनामधिज्ज-मईयप्पुद्धारग-तवगणगयणपहायर-परमगुरुसिरिविजयनेमिसूरीसरप्पसाएणं ति । थुत्तप्पणयणप्पसंगम्मि पइथुत्तं तित्थयराइजीवणलेसोवि पयंसिओ, तहा पहुदेसणासरूवुवदंसणसमए अप्पियदव्वाणुओगाइपयत्थतत्तलेसोऽवि ।

कुणमि पज्जंते निवेयणमिणं, जउय एयग्गंथजुयलज्झयणज्झावणाइसुहजोगेहिं भव्वजीवा पाविऊण पहुसाहियमग्गं परमुल्लासा सेविऊणं तं होज्जा पुज्जपायपज्जूसाहिसरणिज्जाहिहाणपहुमया ।

तहा छउमत्थाणमणुवओगावरणिज्जकम्मुदयमुद्दणाइजणियक्खलणा अनिवारणिज्ज त्ति जओ पत्थुयग्गंथजुयले गुणग्गहिविउहाणं जुग्गा जा काइ क्खलणा दिट्ठिपहमागच्छेज्जा, ता किवं किच्चा विणा संकोयं सूयणिज्जा, जत्तो बिइज्जावित्तीए होज्जा विसोहि त्ति निवेएइ परमोपयारिपुज्जपायायरिय-पुरंदरपरमगुरुसिरि**विजयणेमिसूरी**सरचरणंकिंकरविणेयाणु**विजयपोम्मसूरी** ॥

## ॥ १. मङ्गलाचरणम् ॥

सिरिकेसरियाइपहू-समिद्धवग्गे विसिट्ठमाहप्पे ।
गुरु**णेमिसूरि**पाए, परमुल्लासा पणमिऊणं ॥१॥

जिणवइथुत्ताइमयं, पागयथुत्तप्पयासममलत्थं ।
विरएमि भत्तिभावा, पुज्जा सव्वे पसीअंतु ॥२॥

ஐ✦௸

## ॥ २. चैत्यवन्दनसङ्ग्रहः ॥

### ॥ श्रीसिद्धचक्रचैत्यवन्दनम् ॥

तित्थयरे गयमोहे, सिद्धे लोयग्गठाणसंपत्ते ।
आयरिए गणनाहे, मुणिवायगवायगे वंदे ॥१॥
नियगुणलीणे समणे, सुहायभावस्सरूवसम्मत्तं ।
तत्तत्थबोहरूवं, नाणगुणं पणविहं वंदे ॥२॥
सुद्धपवित्तिसरूवं, चरणं पोयं महाभवसमुद्दे ।
तवपयमिच्छियदाणे, कप्पयरुं भावओ वंदे ॥३॥
चित्तालंबणमेयं, उक्किट्ठं सिद्धचक्कसंसेवा ।
कयसव्वासिवविलया, पवित्तमाहप्पसंकलिया ॥४॥
सिरिसिरिवालो राया, नवपयसंजायसिद्धचक्काओ ।
जाओ विणट्ठकुट्ठो, संपत्तो तायगयलच्छि ॥५॥
होइ सया कल्लाणं, सिग्घं तह विसमकज्जसंसिद्धी ।
आणंदबुद्धिरिद्धि, झाणाओ सिद्धचक्कस्स ॥६॥
सिरिसिद्धचक्कमंतो, भव्वाणं सिद्धचक्कलीणाणं ।
वंछियमाला देउ, कुणउ सया संघकल्लाणं ॥७॥

◆

### ॥ श्रीसिद्धचक्रचैत्यवन्दनम् ॥

॥ द्रुतविलंबितवृत्तम् ॥

विगयकम्मचउक्कजिणेसरे, विमलसिद्धपहू परिनिव्वुए ।
सुहगुणायरिए वरवायगे, पइदिणं पणमामि मुणीसरे ॥१॥

परममुत्तिनियाणसुदंसणं, विमलनाणमणंतसुहप्पयं ।
असमसत्तिहरं चरणं तवो, नवपयाइ सरेमि सया मुया ॥२॥
परमतत्तमिणं जिणसासणे, परममंगलमिट्ठसुरद्दुमं ।
वियडरोगपराभवनासणं, इह परत्थ तओ थिरसंपया ॥३॥
नवपयस्सरणं भवसायरे, पवहणं दहणं दुरिइंधणे ।
सइ थुणंति य तं हरिसेण जे, सवइ मुत्तिपयं विलहंति ते ॥४॥
इय विआरिअ वंदणपूयणं, सुविहिणा पकुणंतु सयासया ।
नरभवो सहलो हवए जओ, नवपयाइ मिलंतु भवे भवे ॥५॥

◆

## ॥ श्रीसिद्धगिरिमण्डन-श्रीआदिनाथचैत्यवन्दनम् ॥

॥ उपजातिवृत्तम् ॥

निवाइमं वासवपुज्जपायं, सिद्धायलत्थं वरनाहिपुत्तं ।
सप्पुण्णलब्भाइसयड्ढदेहं, णिच्चं नमामो मरुदेवनाहं ॥१॥
लोहिच्चतालज्झयढंकरायं, कोडीनिवासत्थभगीरहेसं ।
सत्तुंजएसं विमलायलेसं, सरामि सब्बाहुबलीसमिट्ठं ॥२॥
वरे कयंबे तह सिद्धराए, पुण्णस्सएसं च महाबलेसं ।
कल्लाणगे रेवयपुंडरीए, वंदामि तं मंडणमाइनाहं ॥३॥
सुहे सहस्संबुयसिद्धखित्ते, पुण्णोहसामिं दढसत्तिदेवं ।
महप्पहावाइसयाइजुत्तं, जिणाहिवं तं पणमामि णिच्चं ॥४॥
तुल्लं परं जस्स तिलोयमज्झे, तित्थं न देवासुरवंदणिज्जं ।
तत्थावयंसं गयरागदोसं, थुणामि भव्वाइमतित्थनाहं ॥५॥

◆

## ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

॥ मालिनीवृत्तम् ॥

विगयसयलदोसं पुण्णसंपत्तिगेहं, पसमसुहनियाणं सव्वया सुद्धदेहं ।
विगलियभवचक्कं भव्वपाहोयभाणुं, अजियजिणवरिंदं भावजुत्ता णमेमो ॥१॥
अमरवइनरिंदोहथुयं पूयणिज्जं, तिजयविइयनामं तित्थनाहं सरेमो ।
भवियणहियवायं पुज्जपायारविंदं, पसमनिहिमुहज्जं विस्सनाहं थुणेमो ॥२॥
अहियविमलसुक्कज्झाणजोइस्सरूवं, पयडियनिहिलत्थत्थोमसच्चस्सरूवं ।
सयलहिययजोगक्खेमकज्जप्पवीणं, अजियजिणयदेवं हं नमामि प्पहाए ॥३॥

## ॥ श्रीसम्भवनाथचैत्यवन्दनम् ॥

॥ पञ्चचामरवृत्तम् ॥

भवद्धितारगं विहुं वरिट्ठरूवधारगं, सुरेसचक्किपूइयं हिवारियं वराननं ।
पसत्थसंपयावलिप्पयाणदक्खसेवणं, नमामि भव्वतित्थयं जियारिपुत्तसंभवं ॥१॥
खमाकिवाणघायनासियारिछक्कमीसरं, किवंबुहिं सुहंकरं समाणसत्तुसेवगं ।
महीप्पसिद्धकित्तिनाममुण्णइप्पयच्चणं, नमामि भव्वतित्थयं जियारिपुत्तसंभवं ॥२॥
तिलोयबंधुसत्थवाहमुत्तिमग्गदेसगं, वरंगिचित्तपंकयप्पयासभाणुसंनिहं ।
सुहप्पणिज्जसंपयापमोयसत्थसंगयं, नमामि भव्वतित्थयं जियारिपुत्तसंभवं ॥३॥

◆

## ॥ श्रीअभिनन्दनस्वामिचैत्यवन्दनम् ॥

॥ अनुष्टुब्वृत्तम् ॥

विस्सवंछियसंदाणे, भव्वकप्पयरुं पहुं ।
जगईयलविक्खायं, वंदे हं संवरप्पयं ॥१॥
जस्स पूया महानंद-दाइणी विग्घनासिणी ।
दंसणं दप्पणाहं तं, थुणेमि कइलंछणं ॥२॥
दियसव्वकम्मसिण्णं, सच्चियाणंदसंगयं ।
झाएमि सव्वया चित्ते, विहिणा संवरप्पयं ॥३॥

◆

## ॥ श्रीसुमतिनाथचैत्यवन्दनम् ॥

॥ त्रोटकवृत्तम् ॥

पवरब्भुयपुण्णभरिज्जपयं, समयापरितज्जियसत्तुगणं ।
रुचिपायवपल्लवणे जलयं, वरकोंचधयं समरामि सया ॥१॥
सुहतत्तवियासणभक्खरहं, भविचित्तकइंदुमणीसरयं ।
नियभावरइं रमणिज्जतणुं, पणमामि सया निवमेहसुयं ॥२॥
निहिलंगिहियप्पयमग्गदयं, सुहयाइसमद्धिसमूहजुयं ।
सपवग्गसणायणसंतिकरं, थुणमि प्पणया निवमेहसुयं ॥३॥

◆

## ॥ श्रीपद्मप्रभस्वामिचैत्यवन्दनम् ॥

॥ वसन्ततिलकावृत्तम् ॥

देविंदचक्किपरिपूइयपायपोम्मं, तिण्णाणभूसियमणंतगुणाहिरामं ।
दिव्वप्पसंतचरणं विजियक्खसत्थं, पोम्मप्पहं प्पसमवारिनिहिं नमामि ॥१॥

मोणावलंबमणपज्जवनाणदक्खं, झाणंतरीयखणसाहियकेवलद्धिं ।
इक्कारसीइ वरकत्तियकिण्हपक्खे, सिद्धं थुणामि विहिणा धररायपुत्ते ॥२॥
देहाउकम्मपरभावविहीणभावं, दीवोवमाइवरसिद्धिनिवासठाणं ।
भव्वप्पणिज्जगुणरंगरइप्पसण्णं, पोम्मप्पहं पणिवयामि मुया सया हं ॥३॥

◆

## ॥ श्रीसुपार्श्वनाथचैत्यवन्दनम् ॥

॥ भुजङ्गप्रयातवृत्तम् ॥

तिलोईसमच्चंहिपाहोयमीसं, जणाणंदणिज्जस्सरूवं जिणेसं ।
पसण्णाणणं मेरुधीरं सया हं, सुपासेसरं सव्वया संथुणामो ॥१॥
सुहण्णेयवाणीपदिण्णप्पबोहं, सुरिंदामरप्पेच्छणिज्जस्सरूवं ।
महासुक्खजीवाउसिक्खापदाणं, महासेणपुत्तं सरेमो विणोया ॥२॥
तिभागूणदेहत्तसिद्धिप्पमोयं, जरारोगहीणं निरूविस्सहावं ।
अणंगद्दुहं संगयाणंगयत्तं, महासेणपुत्तं भयामो प्पहाए ॥३॥
करीअ त्थुइं जस्स देविंदसेढी, कया सेवणा निण्णियाणस्सहावा ।
पदेएऽविलंबं परानंदसुक्खं, महासेणपुत्तं समच्चेम भावा ॥४॥

◆

## ॥ श्रीचन्द्रप्रभस्वामिचैत्यवन्दनम् ॥

॥ स्रग्विणीवृत्तम् ॥

भव्वपरिपूयणिज्जंहिजुम्मंबुयं, हिट्ठदेविंदसुरविंदकयसंथुइं ।
सच्चमोयप्पयं जम्मकल्लाणगे, चंदचिंधं नवेमो जिणाहीसरं ॥१॥
सिट्ठपुण्णोदयं सम्ममोयावहं, सव्वजीवोण्णइप्पट्ठसंदेसणं ।
जीवलोयत्थभव्वोहसंसारियं, देवचंदप्पहं लक्खणादारयं ॥२॥
झाणसंदड्ढकम्मावलिं मुत्तियं, सत्तुमित्ते समं सम्मयं कामयं ।
कामयं वीयरागत्तमोयण्णियं, संथुणामो सया सामिचंदप्पहं ॥३॥

◆

## ॥ श्रीसुविधिनाथचैत्यवन्दनम् ॥

॥ वैतालीयवृत्तम् ॥

कुसलद्धिनिसायराणणं, हरिदेवोहसमच्चियक्कमं ।
मयरंकमुदारभावणं, सुविहिं तित्थयरं नमामि हं ॥१॥
समयंबुहिमिट्ठदायगं, गयमायं विमयं पमोययं ।
विकलंकचरित्तधारगं, सुविहिं तित्थयरं सरामि हं ॥२॥

जइ चेयसि भद्दभावणा, तुह मे जीव ! तया हियप्पयं ।
हरिसा मणथिज्जभाविओ, कर सुद्धं सुविहिप्पपूयणं ॥३॥
सयलत्थरहस्सदायगं, वयणं जस्स पसत्थमोयगं ।
सइ तं सुविहीसरं सया, पणमंतु प्पणएण सव्वया ॥४॥

◆

## ॥ श्रीशीतलनाथचैत्यवन्दनम् ॥

॥ रथोद्धतावृत्तम् ॥

पुण्णचंदनिहवत्तपंकयं, साइ साइवरकंतिभासुरं ।
जच्चकंचणनिहंगुवंगयं, सीयलं थुणमि भव्वदंसणं ॥१॥
सत्तियाणुहवसत्थदायगं, सव्वकम्मगयमम्मभेयगं ।
विस्सतत्तगरहस्सभासगं, सीयलं नममि दिव्वसासणं ॥२॥
खाइयप्पगुणवारिसायरं, निम्मयं पसमिसाहुसेहरं ।
सच्चसंतियपयज्जपूयणं, सीयलं सरमि सव्वया मुया ॥३॥

◆

## ॥ श्रीश्रेयांसनाथचैत्यवन्दनम् ॥

॥ दोधकवृत्तम् ॥

भासुरदेहमणंतगुणड्ढं, ठाणसमज्जियतित्थयरत्तं ।
चंदमुहं दियदोससमूहं, विण्हुसुयं पणमामि जिणेसं ॥१॥
भव्वमणंबुयभासणभाणुं, लोयपईवं पुरिसपहाणं ।
विस्सहियप्पयमग्गदएसं, विण्हुसुयं समरेह विणोया ॥२॥
भावकिवंबुसमुद्दसमीसं, सत्तियमोयपयाणसमत्थं ।
जोगिगणस्सइगोयरमत्तं, विण्हुसुयं झाएमि सयाऽहं ॥३॥

◆

## ॥ श्रीवासुपूज्यस्वामिचैत्यवन्दनम् ॥

॥ श्रीवृत्तम् ॥

वासवविंदच्चियपयपोम्मं, संतिनिसंतं सुगुणनिहाणं ।
वद्धिगहीरं सुरगिरिधीरं, संथुणिमो मो पहुमहिसंकं ॥१॥
अप्पियलच्छीरमणविलासं, जोगिमणत्थं दमियखसत्थं ।
णासियमोहं भवदवनीरं, संसमरामो पहुमहिसंकं ॥२॥
कंचणदेहं सयइसयड्ढिं, कट्ठसमूहापगइसमीरं ।
मग्गपयासं सिवदयपूयं, संनमिमो मो पहुमहिसंकं ॥३॥

## ॥ श्रीविमलनाथचैत्यवन्दनम् ॥

॥ प्रमाणिकावृत्तम् ॥

विसालभालभासुरं, तिलोयमण्णदेसणं ।
भवण्णवंगितायगं, नवेमि सूयरज्झयं ॥१॥
सुरासुरेसवंदियं, पणासियाहिलावयं ।
समिट्ठकप्पपायवं, नमामि सूयरज्झयं ॥२॥
सुहायरप्पहाणणं, मणुण्णरूवसंपयं ।
समानवित्तिमंडियं, सरामि सूयरज्झयं ॥३॥

◆

## ॥ श्रीअनन्तनाथचैत्यवन्दनम् ॥

॥ इन्द्रवज्रावृत्तम् ॥

णीसेसभूमंडलसिद्धकित्तिं, लोगुत्तमं सुक्खयलक्खणड्ढं ।
वेरग्गभावत्तचरित्तलीणं, तित्थाहिवाणंतपहुं थुणेमो ॥१॥
सुक्कग्गिसंभस्सियघाइकम्मं, विण्णायलोयाइपयत्थतत्तं ।
विज्झाणसव्वण्णदसं विणोया, तित्थेसराणंतपहुं णमेमो ॥२॥
दुक्खड्ढसंसारपयत्थवंछा–मेहावणोयाणिलमुत्तमत्तिं ।
सद्देसणारंजियभव्वलोयं, तित्थाहिवाणंतपहुं णवेमो ॥३॥

◆

## ॥ श्रीधर्मनाथचैत्यवन्दनम् ॥

॥ पृथ्वीवृत्तम् ॥

पसण्णमुहवारियं मइसुओहिनाणण्णियं, किवद्दहियं विसिट्ठगुणसंपयासोहियं ।
१. शमं- शान्तिं ददातीति शमदः । २. न विद्यते के- आत्मनि मदो यस्य सः । ३. रक्षतात्। ४. पूर्णं यथा स्यात् तथा रञ्जितसंहतिर्मोदितसङ्घः, देशनयेत्यर्थः । ५. यमानि- महाव्रतानि ददातीति यमदो- मुनिरत्र च प्रकरणवशान्नेमिसूरिर्गुरुः । ६. अकं- दुःखं पापं वा प्रकर्षेण द्यति- खण्डयतीत्यकप्रदः । ७. पातः- पतनं तस्मात्, निरयादिगतावित्यर्थः । ८. शीघ्रं त्यक्तसंसार इत्यर्थः । ९. कन्दर्प्पः । १० सिंहः । ११. खण्डयतात् । १२. सूर्यः । १३. प्रतिभया- बुद्ध्या असमानं- अतुल्यमित्यर्थः । १४. पापम् । १५. मानेनाऽहङ्कारेण ऊनो- रहितस्तम् । १६. मश्चन्द्रमास्तद्वदाननं- मुखं यस्य तम् । १७. नुन्नौ- क्षिप्तौ एनोममौ- दुरितममते येन स नुन्नैनोममस्तम् । १८. आमेन- रोगेण ऊनो- रहितस्तम् । १९. उमा- शान्तिः सैव मा- लक्ष्मीस्तस्या ईनः- स्वामी तम् । २०. एः- कामस्य नुन्ना- परिक्षिप्ता मा- शोभा येन स इनुन्नमस्तम् ।

*** गोमूत्रिकाबन्धः**

| | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| श | म | दो | ऽक | म | दः | पा | तात् | पू | र्णं | र | ञ्जि | त | सं | ह | तिः |
| य | म | दो | ऽक | प्र | दः | पा | तात् | तू | र्णं | भ | ञ्जि | त | सं | सृ | तिः |

ने[२१]तो ! [२२]यते ! [२३]सूरत ! [२४]पोतरूप !, भवे समुद्रेऽकद[२५] ! [२६]काय [२७]तार ! ।
[२८]पातोऽ[२९]रते ! [३०]सूर ! [३१]तपोऽसरूपे-भवे[३२]समुद्रेकद ! [३३]कायतार ! ॥ ५ ॥ गोमूत्रिकाबन्धः ॥*
[३४]अपारेऽसं[३५]सारेहित[३६]द ! वि[३७]भयाऽमान ! वि[३८]दिता-
ऽग[३९]माऽनीते ! [४०]तापाऽव[४१]निपत ! नतो[४२]दार ! [४३]सुगुरो ! ।
अपारे संसारेऽहि[४४]तद ! विभ[४५]याऽ[४६]मान ! वि[४७]दिता-
गमाऽनी[४८]तेतापा[४९]ऽव निप[५०]तनतोऽ[५१]दार ! [५२]सुगुरो ! ॥ ६ ॥ यमकम् ॥
कुनयकाननदलनदारुण[५३]करटिनामयवर्जिता-
ऽव[५४]मविदारण ! विभयकारण ! करणकुञ्जरकेसरिन् ! ।
भुवनभूषण ! दलितदूषण ! मदनमारण ! हे मुने !,
प्रमितभाषण ! [५५]समव तारक ! चरणसुन्दर ! सं[५६]सृतेः ॥ ७ ॥ हरिगीतम् ॥
[५७]आपत्त्रे[५८]तरतेतमा[५९]नममताऽमा[६०]याऽऽनतज्ञावले[६१]-
ऽ[६२]तान्ते ! [६३]मास्य ! [६४]तमोह ! मोहदलनाऽसाराद् भवाद् रक्ष माम् ।
धीराऽकोप ! कुतीर्थिकौशिकगण[६५]प्रद्योतन ! [६६]श्रीजभित् !,
सिन्धो ! शान्तरसस्य विस्तृतमते ! **श्रीनेमिसूरे** ! गुरो ! ॥ ८ ॥

---

२१. स्वामिन् ! । २२. मुने !, प्रकरणाद्धे गुरो ! । २३. दयालो ! । २४. प्रवहणसमान ! । २५. अकं- दुःखं वा पापं द्यतीत्यकदस्तत्सम्बोधने । २६. सुखाय भवेत्यर्थः । २७. तया- ज्ञानलक्ष्म्या राजते इति तारस्तत्सम्बोधने । २८. हे रक्षक ! षड्जीवनिकायानामित्यर्थः । २९. न विद्यते रती- रागो यस्य तत्सम्बोधने । ३०. हे पण्डित ! । ३१. तपोभिरसमान ! । ३२. ईर्लक्ष्मीस्तस्या भवः स ईभवः- कामदेवः, तस्य ईः- शोभा तस्या यः समुद्रेकोऽतिरेकस्तं द्यति- खण्डयतीति ईभवेसमुद्रेकदस्तत्सम्बोधने । ३३. कायेन- शरीरेण तार- उज्ज्वलस्तत्सम्बोधने कायतार ! । ३४. विगतारे ! । ३५. त्यक्तसंसार ! । ३६. वाञ्छितद ! । ३७. कान्त्याऽप्रमाण ! । ३८. विशेषेण दितं- खण्डितम् अगमं- अज्ञानं येन तत्सम्बोधने । ३९. न विद्यते ईतिररिष्टं यस्य तत्सम्बोधने । ४०. तां- ज्ञानादिलक्ष्मीं पातीति- तापस्तत्सम्बोधने । ४१. अवनौ पतति गच्छतीत्यवनिपतस्तत्सम्बोधने वाहनरहितेत्यर्थः । ४२. नता उदारा- महाशयाः पुरुषा यस्य तत्सम्बोधने । ४३. अतिशयेन जिनोक्ततत्त्वानि गृणातीति सुगुरुस्तत्सम्बोधने । ४४. अशुभनाशिन् ! । ४५. विगतभय ! । ४६. मानरहित ! । ४७. ज्ञातसिद्धान्त ! । ४८. अप्राप्तकामताप ! । ४९. रक्ष । ५०. पतनात् । ५१. स्त्रीरहित ! । ५२. शोभनश्चासौ गुरुश्च सुगुरुस्तत्सम्बोधने प्रकरणान्नेमिसूरिगुरो ! अपारे संसारे निपतनतो रक्षेत्यर्थः । ५३. हस्तिन् ! । ५४. कष्टम् । ५५. संरक्ष । ५६. संसारात् । ५७. आपद्भ्यस्त्रायते इति आपत्त्रस्तत्सम्बोधने । ५८. गतराग ! । ५९. गते मानममते यस्य तत्सम्बोधने । ६०. अमाय ! । ६१. आसमन्तान्नता ज्ञानां- पण्डितानामावलिः- पङ्क्तिर्यस्य तत्सम्बोधने । ६२. अग्लाने धर्मकार्येष्वित्यर्थः । ६३. चन्द्रमुख ! । ६४. अज्ञानभित् ! । ६५. सूर्य ! । ६६. कन्दर्पभित् ! ।

* **गोमूत्रिकाबन्धः**

| | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ने | तो | य | ते | सू | र | त | पो | त | रू | प | भ | वे | स | मु | द्रे | क | द | का | य | ता | र |
| पा | तो | र | ते | सू | र | त | पो | स | रू | चे | भ | वे | स | मु | द्रे | क | द | का | य | ता | र |

## ॥ ८. शासनसम्राट्श्रीविजयनेमिसूरिस्तुतिः ॥

— श्रीविजयनन्दनसूरिः

अचिन्त्यचिन्तामणिकल्पशाखिने, विशुद्धसद्ब्रह्मसमाधिशालिने ।
दयार्णवायाऽर्थितदायिने सतां, नमो नमः श्रीगुरुनेमिसूरये ॥१॥ (वंशस्थम्)

जगद्गुरूणां गुरवे महस्विने, महाशयायाऽऽगमतत्त्ववेदिने ।
परोपकाराय शरीरधारिणे, नमो नमः श्रीगुरुनेमिसूरये ॥२॥

अपीरितं स्वप्नदशासमुद्भवं, प्रसादपुण्येन यदीयदर्शनम् ।
तनोति नृणामविगीतसम्पदो, नमो नमः श्रीगुरुनेमिसूरये ॥३॥

क्षमैकसन्मार्गविभासनक्षमाः, सुवर्णरम्याः स्फुरदर्थभासिनीः ।
तमःशमा गा दधतेंऽशुमालिने, नमो नमः श्रीगुरुनेमिसूरये ॥४॥

प्रभावभृत् सिद्धिनिधानमद्भुतं, पुरा प्रवृत्तं भरताद्यचक्रिणः ।
कदम्बतीर्थं पुनरुद्धृतं यतो, नमो नमः श्रीगुरुनेमिसूरये ॥५॥

अनेकभूपैश्च निषेविताङ्घ्रये, गृहीतजीवाभयदानवर्त्मने ।
सदैव दीनोद्धरणैकचेतसे, नमो नमः श्रीगुरुनेमिसूरये ॥६॥

कृतापराधेऽपि च मादृशे जने, दयार्द्रचित्ताय हितैषिणेऽन्वहम् ।
प्रमोदमैत्रीकरुणात्मदृष्टये, नमो नमः श्रीगुरुनेमिसूरये ॥७॥

सुलक्षणामार्तमनोमनोहरां, प्रसादनीमाकृतिमेव बिभ्रते ।
अशेषसौभाग्यगुणश्रियाऽऽश्रितां, नमो नमः श्रीगुरुनेमिसूरये ॥८॥

गुरुस्तुतेरष्टकमात्मने हितं, गुरोः शुभाशीर्वचनानुभावतः ।
प्रभातकाले पठतां सतामिदं, तनोतु सिद्धिं सुधियं च सम्पदः ॥९॥

## ॥ ९. श्रीविजयनेमिसूरीश्वरगुरुस्तुतिः ॥

— श्रीविजयनन्दनसूरिः

अहो ! योगदाता प्रभो ! क्षेमदाता, सदा नाथ एवाऽसि नस्तारकस्त्वम् ।
सुसौभाग्यवान् बाल्यतो ब्रह्मचारी, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥१॥ (भुजङ्गप्रयातम्)

न यामीह पारं गुरूणां गुणानां, कथं ते च गण्या विना शक्तियोगम् ।
तथापि स्तुतिर्भक्तिरागात् तवेयं, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥२॥

त्वयाऽष्टाङ्गयोगः समाधिः सुलब्ध-स्तथाऽध्यात्मयोगादितोऽसाधि सिद्धिः ।
क्रियाज्ञानसद्ध्यानयोगैकनिष्ठं, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥३॥

तवाऽऽसन् नरेशाश्च भक्ता अनेके, जगत्यां त्वया धर्मवीरत्वमुप्तम् ।
महातीर्थसद्भक्तियोगं दधानं, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥४॥

अहं निर्गुणः सद्गुणैः संभृतस्त्व-महं ज्ञानहीनोऽस्मि सज्ज्ञानवाँस्त्वम् ।
ममाऽभेददाऽऽविर्भवत्वार्यभक्तिः, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥५॥

मयाऽकारि नो सेवना नाथ ! काचि-न्नचाऽधारि शिक्षा हृदि त्वत्प्रदत्ता ।
क्षमन्तां मम प्रार्थनैषा कृपालो !, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥६॥

सनाथस्त्वयाऽद्यापिपर्यन्तमास-मनाथोऽद्य जज्ञेऽथ भाग्यैर्विहीनः ।
सदा नाथ ! याचे तवाऽङ्घ्र्येकसेवां, स्तुवे त्वामहं श्रीगुरुं नेमिसूरिम् ॥७॥

अथ प्रेमतो बोधदाता न को मे, न वा नाथ ! मां कोऽपि संरक्षिताऽरे ।
दयालो ! त्वया दास एषोऽनुकम्प्यः, सदा स्वर्गतो देहि नाथाऽऽशिषो मे ॥८॥

## ॥ १०. श्रीसूरिस्तवशतकम् ॥

— श्रीविजयनन्दनसूरिः

प्रणम्य स्तम्भनाधीशं, स्तम्भतीर्थावतंसकम् ।
श्रीपार्श्वं सर्वसिद्धीनां, समागत्येकसाधनम् ॥१॥
प्रणम्य श्रीमहावीरं, गणभृद्गौतमं प्रभुम् ।
त्रैलोक्यवन्दनीयांश्च, लोकेषु सर्वयोगिनः ॥२॥
धन्यानां भव्यजीवाना-मवतंसन्त्यहर्निशम् ।
जगदुद्धारणैकस्य, यस्य पादनखार्चिषः ॥३॥
जातिर्यस्योत्तमा लोके, कुलं सर्वजनाधिकम् ।
जगद्विभूषणं रूपं, वीर्यं भुवनविश्रुतम् ॥४॥
श्रुतं पूर्वभवाभ्यस्तं, विस्फुरत्यधिकं सदा ।
यस्यैश्वर्यं समैश्वर्यं, सौभाग्यं जगदद्भुतम् ॥५॥
तं सर्वोत्कृष्टसद्वीर्यं, सद्गुरुं शिवदायकम् ।
दर्शनज्ञानचारित्र-समृद्ध्युत्कर्षशालिनम् ॥६॥
संयमश्रेणिमध्यस्थं, योगसाम्राज्यशोभिनम् ।
आचार्यं **नेमिसूरीशं**, भक्त्या स्तवीम्युदारया ॥७॥
जल्पन् गुणानसद्भूता-नन्यं स्तौति जनं जनः ।
सतोऽपि तांस्तु ते वक्तु-मक्षमोऽहं कथं स्तुवे ॥८॥
बुधैरप्यपरिज्ञेय-गुणं त्वां स्तोतुमीश्वरः ।
कः स्यात् तथाऽप्यहं स्तौमि, व्युल्लसद्बालचापलः ॥९॥
किञ्चाऽज्ञतामवज्ञाय, निजस्य त्वां स्तवीम्यहम् ।
यन्मां वाचालयत्येषा, त्वयि भक्तिरवारणा ॥१०॥
नाऽयुक्तत्वं गमिष्यामि, स्तुवंस्त्वामल्पधीरपि ।
अव्यक्ता अपि बालानां, युक्ता एव गुरौ गिरः ॥११॥
तवाऽनुभाव एवाऽयं, समस्तोऽपि सुनिश्चितम् ।
तव प्रसादविख्याताः, के वयं परमार्थतः ॥१२॥

दृष्टमात्रैश्च त्वत्पादै-र्जन्मान्तरकृतान्यपि ।
म्लायन्त्येनांसि पद्मानि, तरसेन्दुकरैरिव ॥१३॥
ज्ञानध्यानतपोदग्धां-हसामेव भवान्तरे ।
उदेति भव्यलोकानां, भक्तिस्त्वय्यत्र योगिनि ॥१४॥
हीनसत्त्वसमाक्रान्ताः, पापकर्मोदयाश्च ये ।
त एव पादसेवां ते, न जानन्ति प्रमादिनः ॥१५॥
गाम्भीर्येण महाम्भोधिं, सहस्रांशुं च तेजसा ।
धैर्येण मन्दरशृङ्गं, त्वं जयस्यतिविक्रमः ॥१६॥
ये सर्वेऽपि तपोब्रह्म-सत्यसत्त्वादयो गुणाः ।
त्वय्येव ते वसन्त्युच्चै-र्विमुच्य विष्टपत्रयम् ॥१७॥
इदं च नाऽद्भुतं नाथ!, विश्वकल्याणकारक! ।
समुद्रमेव गच्छन्ति, मणयः सरितो न हि ॥१८॥
महाघोरभवाटव्या-मटतां भव्यदेहिनाम् ।
त्वमेवाऽतिप्रयत्नेन, शुद्धमार्गोपदेशकः ॥१९॥
त्वं चाऽविरतिजम्बाल-जालसंक्षालनक्षमः ।
बहूनां भव्यसत्त्वानां, संसारोद्वेगशालिनाम् ॥२०॥
पापपुञ्जोत्पादितश्च, तावत् तापोऽत्र देहिनाम् ।
यावत् तेषां न नाथ! त्वं, सदानन्दो हृदि स्थितः ॥२१॥
प्रहताशेषसंसार-विस्तारो मुनिशेखर! ।
घोरसंसारकान्तार-सार्थवाहस्त्वमेव च ॥२२॥
नाथ ! त्वां चोररीकृत्य, शङ्कारहितचेतसः ।
लभन्ते भूरि कल्याणं, निर्विकारत्वमागताः ॥२३॥
त्वं हि दीक्षां समादाय, निर्मलीकृतमानसः ।
सन्तोषसेवितो धन्यो, जातो धन्यावतंसकः ॥२४॥
सर्वशास्त्रेषु नैपुण्य-मादधत् त्वं महोदयः ।
गुरूणां पूज्यपादानां, भक्तिप्रवणतान्वितः ॥२५॥
त्वमेव चाऽधुना नाथ !, संसारे सुखकामिभिः ।
आदेयोऽसि प्रयत्नेना-ऽशेषसम्पद्विधायकः ॥२६॥
निपतन्तो महाघोरे, सत्त्वा नरककूपके ।
अहिंसाहस्तदानेन, त्वया नाथ ! समुद्धृताः ॥२७॥
मैत्र्यादिभिश्चतुर्भेदं, यच्चाऽऽज्ञादिचतुर्विधम् ।
ध्यानं तत् सर्वदा नाथा-ऽवस्थितं चेतसि तव ॥२८॥
अष्टाङ्गयोगकौशल्य-मष्टसिद्धिप्रवीणता ।
अष्टाङ्गयोगदृष्टेश्च, नैपुण्यं ते महाद्भुतम् ॥२९॥

एकादशाङ्गविज्ञत्वं, द्वादशोपाङ्गवेदनम् ।
छेदसूत्रेषु दक्षत्वं, कस्य दृष्टं त्वया विना ॥३०॥
पूर्वाचार्यक्रमायात-शुद्धाचारनिषेवकः ।
सामाचारीसमायुक्तः, समाधिस्थानसंस्थितः ॥३१॥
द्वादशभावनोद्युक्तः, संक्लेशदशकोज्झितः ।
अकल्प्यषट्कनिर्मुक्तो, रतः संवेगसागरे ॥३२॥
[स]बाह्याभ्यन्तरग्रन्थ-त्यागी निर्ग्रन्थपुङ्गवः ।
प्रभावकश्च निस्तन्द्रः, षट्सु कायेषु यत्नवान् ॥३३॥
प्रज्ञप्त्यादिमहायोगो-द्वहनं प्रविधाय वै ।
समाराध्य महामन्त्रं, सूरिमन्त्रमनुत्तरम् ॥३४॥
सुधर्मस्वामिनः पट्ट-पारम्पर्यसमागतम् ।
प्राप्तवांस्त्वं पदं सूरेः, सार्वसङ्घशिरोमणिः ॥३५॥
तथाऽभूः सर्वविद्वद्भिः, सेवितस्य सदा मुदा ।
निर्ग्रन्थप्रथमाख्यस्य, तपोगच्छस्य नायकः ॥३६॥
न्यायशास्त्रेषु सम्पूर्णाः, केचित् सिद्धान्तसागराः ।
केचिद् व्याकरणाभिज्ञाः, केचित् शास्त्रार्थकोविदाः ॥३७॥
केचिद् ग्लानादिसाधूनां, वैयावृत्त्यादितत्पराः ।
सद्योगोद्वाहिनः शुद्धा-चारशीलसमन्विताः ॥३८॥
जिनाज्ञां पालयन्तश्च, त्वदाज्ञानिरताः खलु ।
तवैवं शिष्यसङ्घाताः, प्रसिद्धा एव भूतले ॥३९॥
भगवन् ! करुणासिन्धो !, शुभलेश्य ! सुयोगभृत् ! ।
विगतस्पृह ! ते नाथ !, कथं पुण्यं प्रवर्णये ॥४०॥
दुर्भिक्षसमये नाथ !, भूरिधर्मोपदेशतः ।
अनेकद्रव्यलक्षाणां, श्रीमतां त्याजनेन वै ॥४१॥
पशूनां मनुजानां च, बहूनामभयार्पणम् ।
कारयामासिषे यत् त्वं, तज्ज्ञातं कस्य नो भवेत् ॥४२॥
ज्ञानार्थिनां तदर्थाय, ज्ञानशाला व्यधापयः ।
धर्मक्रियापराणां च, श्रावकाणां कृते पुनः ॥४३॥
उपदेशामृताच्चैत्य-पौषधालयकान्यपि ।
बहूनि श्रेष्ठिसङ्घेभ्यो, नाथ! त्वं निरमीमपः ॥४४॥
शत्रुञ्जयमहातीर्थ-संरक्षणैकतत्परः ।
चैत्योद्धाराण्यनेकानि, चारूणि त्वं व्यधापयः ॥४५॥
मरुदेशे च ग्रामे तु, कर्पटहेटकाभिधे ।
स्वयम्भूपार्श्वप्रासादे, दर्शनाद्धर्षकारिणि ॥४६॥

समस्ताशातना घोरा, दूरीकृत्य प्रयत्नतः ।
महासङ्कटकालेऽपि, जीवितमप्युपेक्ष्य च ॥४७॥
स्वयम्भूपार्श्वनाथस्य, शान्तिनाथस्य च प्रभोः ।
अन्येषामपि तीर्थेशां, बिम्बानां जन्मनाशिनाम् ॥४८॥
समागते शुभे घस्रे, महोत्सवविभूषिते ।
प्रतिष्ठाप्य महामन्त्र-स्तदुद्धारस्त्वया कृतः ॥४९॥
मेदपाटे महादेशे, ये नरा निर्मलाशयाः ।
शौर्यवन्तोऽतिभद्राश्च, राजशासनतत्पराः ॥५०॥
परन्तु भद्रकत्वात् ते, कुगुरुपाशपाशिताः ।
सद्गुरोश्च वियोगेन, धर्मयोगवियोजिताः ॥५१॥
तेषां सर्वाङ्गिनां नाथ !, धर्मबोधनहेतवे ।
अनेकविद्वत्साधूनां, मण्डलालङ्कृतः प्रभुः ॥५२॥
पवित्रीकृत्य पादाभ्यां, मेदपाटस्य मेदिनीम् ।
केवलधर्मबुद्ध्यैव, गहनां विकटामपि ॥५३॥
हितया प्रियया चैवा-ऽम्भोदगम्भीरया गिरा ।
शुद्धधर्मावभासिन्या, व्यस्तदोषसमाजया ॥५४॥
तान् सर्वानपि सद्धर्मे, वीतरागप्रकाशिते ।
अस्थापयस्त्वमानन्द-श्रद्धानिर्मलमानसान् ॥५५॥
मरुदेशे महाराज !, त्वयाऽनेके जनव्रजाः ।
धर्मे स्थिरत्वमानीता, मूर्तिमन्तव्यतान्विते ॥५६॥
अन्येष्वपि च देशेषु, विहारक्रमतः खलु ।
बोधिता बोधदानेन, त्वया मांसाशिनोऽप्यति ॥५७॥
विदुषोऽपि प्रभूतांस्त्वं, धर्मकर्मपराङ्मुखान् ।
योग्यसदुपदेशेन, धर्मकर्मस्वयोजयः ॥५८॥
एवं सत्यस्वरूपं ते, न जानन्त्यल्पबुद्धयः ।
मातङ्गा इव शार्दूल-विक्रमं लेशमात्रकम् ॥५९॥
जिनेशाज्ञाबहिर्भूता, सर्वसङ्घबहिष्कृताः ।
चाण्डाला इवाऽस्पृश्या, ये केचिन् मार्गदूषकाः ॥६०॥
ते तु त्वन्नाममात्रस्य, श्रुत्यैव ज्वरपीडिताः ।
किं श्रुत्वा गर्जनां सैंहीं, शृगालाः स्वास्थ्यमासते ? ॥६१॥
अदृष्टव्यानना ये च, देवद्रव्यादिनाशकाः ।
ते सर्वे त्वत्प्रतापेन, ग्लायन्ति पेचका इव ॥६२॥
जिनेशाज्ञां समुल्लङ्घ्य, योगोद्वहनमन्तरा ।
सन्ति ये पण्डितम्मन्याः, सूरित्वाडम्बरान्विताः ॥६३॥

ते वराकास्त्वधोवीर्या, धैर्यसत्त्वविवर्जिताः ।
निस्तेजांसि निजास्यानि, त्वदग्रेऽधः प्रकुर्वते ॥६४॥
तथाऽप्यत्र किमाश्चर्यं, लोकसिद्धमिदं हि यत् ।
प्रदीप्ते भुवि मार्तण्डे, खद्योता हततेजसः ॥६५॥
त्रिकालाबाधितामाज्ञां, सर्वज्ञस्य जिनेशितुः ।
सम्यक् प्रपालयन् नाथ!, त्वमेवाऽस्यधुना भुवि ॥६६॥
ये श्रेष्ठिकुलसञ्जाता, द्रव्यकोटीविभूषिताः ।
तेऽपि त्वां नाथ ! नाथेति, ब्रुवाणाः पर्युपासते ॥६७॥
देशाधीश्वरमान्या ये, देशसाम्राज्यशालिनः ।
तेऽपि त्वन्मीलनानन्दं, वाञ्छन्ति त्वरयाऽन्वहम् ॥६८॥
कलाकलापविज्ञा ये, सर्वशास्त्रविशारदाः ।
ते सर्वेऽप्यात्मभक्त्या ते, किङ्करत्वमुपागताः ॥६९॥
मेदपाटनरेशोऽपि, यत् त्वां स्तवीत्यहर्निशम् ।
तत् त्वत्पुण्यस्य साम्राज्यं, के न जानन्ति सद्धियः ॥७०॥
सहस्रांशुरिव स्वाभां, चन्द्रमाश्चन्द्रिका इव ।
क्षणमप्यात्मनस्त्वं नु, न मुञ्चस्यप्रमत्तताम् ॥७१॥
त एव कृतिनो लोके, त एवाऽभ्युदयान्विताः ।
त एव भवकान्तारो-ल्लङ्घने सन्ति पण्डिताः ॥७२॥
तव पञ्चविधाचार-व्यवहारव्रतशालिनः ।
नाथ ! ये पादपद्मस्य, सेवनां कुर्वतेतराम् ॥७३॥
समस्तमुत्तमं नाथ !, वर्तते तव सुन्दरम् ।
सद्बुद्धिलेशहीनोऽहं, तत्र किं वर्णनक्षमः ॥७४॥
तथाऽपि भक्तिरागेण, पूज्ययोस्तव पादयोः ।
प्रेरितेन स्तुतं किञ्चिद्, भिक्षुणा बालबुद्धिना ॥७५॥
धन्यः सौराष्ट्रदेशः स, धन्या मधुपुरी पुरी ।
या त्वया जन्मना नाथ!, बन्धुरा पावनीकृता ॥७६॥
लक्ष्मीचन्द्रः पिता धन्यो, धर्मकार्येषु कोविदः ।
येन त्वं बाल्यतो धर्म-संस्कारैः संस्कृतोऽन्वहम् ॥७७॥
धन्या माता च दीपाली, सुशीला रत्नकुक्षिणी ।
या हि सौभाग्यसाम्राज्य-निधिं पुत्रमजीजनत् ॥७८॥
धन्यस्त्वं नाथ ! नाथानां, तत्कुलाम्बुनिधौ विधुः ।
यस्त्वं विज्ञाततत्त्वोऽभूः, प्राप्य सर्वज्ञशासनम् ॥७९॥
अधन्योऽप्यधुना धन्यो, जातोऽहं त्वां स्तुवन् प्रभो! ।
धन्या एव हि नाथ ! त्वां, स्तुवन्ति विमलाशयाः ॥८०॥

आजन्माऽन्यो न नाथो मे, श्रीमन्तं त्वां विना यतः ।
अहं सद्दर्शनज्ञान-चारित्रस्थैर्यमापितः ॥८१॥
चिन्तारत्नं न वाञ्छामि, नैव च चक्रवर्तिताम् ।
नैव राज्यं न चेन्द्रत्वं, नैवाऽन्यच्चाऽस्त्यतिप्रियम् ॥८२॥
किन्त्वेका नाथ ! ते पादा-म्भोजयोः सेवनाऽनघा ।
सदाऽस्त्वित्यभिलाषो मे, वर्धते सुतरां सदा ॥८३॥
भवादृशेषु नाथेषु, यतः प्राप्तेषु मादृशाम् ।
मज्जतां भवपाथोधौ, क्रियाज्ञानप्रमादिनाम् ॥८४॥
अनन्तानन्दपूर्णस्य, मोक्षस्य कारणं परम् ।
जैनेन्द्रशासने सम्यक्-श्रद्धानं जायते भृशम् ॥८५॥
ततः प्रपञ्चं विज्ञाय, संसारस्य सुदुस्तरम् ।
महामोहस्य विस्तारं, सर्वव्यसनकारणम् ॥८६॥
ज्ञाततत्त्वा नरा भूत्वा, श्रद्धाक्षालितचेतसः ।
जिनाज्ञां पालयित्वा च, पारम्पर्येण मोक्षगाः ॥८७॥
सेवा तिष्ठतु ते नाथ !, दर्शनं पुण्यकारणम् ।
केषां सम्पत्तये न स्या-दीक्षणं चाषपक्षिणः ॥८८॥
सद्भक्त्या भजताऽजस्रं, यूयं भव्याः कृतादराः ।
आचार्यं नेमिसूरीशं, यदि भाग्यभरालसाः ॥८९॥
ज्ञानप्रकाशसूर्याया-ऽज्ञानध्वान्तविनाशिने ।
करुणानां निधानाय, नमः श्रीनेमिसूरये ॥९०॥
विबुधैः कृतसेवाय, महामेरूपमाय च ।
माध्यस्थ्यशालिने तस्मै, नमः श्रीनेमिसूरये ॥९१॥
निर्मलीमसचित्ताय, रागसन्तापहारिणे ।
विश्वोपकारदक्षाय, नमः श्रीनेमिसूरये ॥९२॥
शौचसन्तोषपूर्णाय, भुवनाह्लादकारिणे ।
गाम्भीर्येण समुद्राय, नमः श्रीनेमिसूरये ॥९३॥
त्रैलोक्यवन्दनीयाय, भोगतृष्णाविघातिने ।
महानन्दनिवासाय, नमः श्रीनेमिसूरये ॥९४॥
कल्पद्रुमाय काम्यार्थे, स्तुत्याय तत्त्ववेदिभिः ।
रम्याय शुद्धयोगेन, विख्याताय सदा भुवि ॥९५॥
जन्मव्यसननाशाय, यमिभिः सेविताङ्घ्रये ।
स्यत्सुधातुलवाचाय, शिवाय शिवदायिने ॥९६॥
वर्याराधनमाप्ताय, मर्त्यानां मुकुटाय च ।
स्तुत्यपादाब्जयुग्माय, नमः श्रीनेमिसूरये ॥९७॥

स्तम्भतीर्थे महातीर्थे, त्रम्बावत्यपराभिधे ।
श्रीपार्श्वेशप्रसादेन, भूरिसौभाग्यपूरणे ॥९८॥
नवर्ष्यङ्कनिशानाथै-र्मिते (१९७९) संवत्सरे शुभे ।
मृगशीर्षे सिते पक्षे, सम्प्राप्ते दशमीदिने ॥९९॥
राजनगरमुख्येभ्यः, पुरेभ्यो भक्तिशालिषु ।
श्रेष्ठिवर्गेष्वनेकेषु, मीलितेषु समुत्सवम् ॥१००॥
साधुसाध्व्यादिसङ्घाते, प्राप्ते सङ्घे चतुर्विधे ।
महामहोत्सवे जाते-ऽनेकद्रव्यव्ययेन वै ॥१०१॥
महानिशीथमुख्येषु, सूत्रेषूक्तविधानतः ।
योगोपधानमालायाः, परिधापनवासरे ॥१०२॥
मालायाश्च महामन्त्रं, विदधतो महौजसः ।
पूर्वयुगप्रधानानां, स्मृतिं कारयतो विभोः ॥१०३॥
**नेमिसूरेः** क्रमाम्भोज-शुद्धभक्त्यनुभावतः ।
**वाचकोदय**शिष्येण, **नन्दना**ख्येन भिक्षुणा ॥१०४॥
विहितं स्तवनं शुद्धं, स्वात्मकल्याणहेतवे ।
आमेरु बोधिलाभार्थं, पठन्तु भव्यदेहिनः ॥१०५॥
सद्गुरोः स्तवनं कृत्वा, **नेमिसूरे**र्विभोर्मया ।
समर्जितं सुपुण्यं यत्, तेन लोकोऽस्तु बोधिभाक् ॥१०६॥

श्रीतीर्थङ्करमहावीरप्रभुशासनोद्धरणधुरीण-शुद्धसम्यक्त्वविभूषित-
सकलजगदुद्धर्तुकामितादिपरमगुणसमूहसमन्वित-
शत्रुञ्जयरैवतादिमहातीर्थसंरक्षणसमुद्धरणप्रवण-
श्रीभगवत्यादिसकलयोगोद्वहनसूरिमन्त्रसमाराधनपूर्वकप्राप्तसूरिपद-
संविग्नशाखीयतपोगच्छाचार्यभट्टारक-
श्रीम**द्विजयनेमिसूरि**भगवच्चरणेन्दीवरमिलिन्दायमान-
सिद्धान्तवाचस्पतिन्यायविशारदानुयोगाचार्य-
महोपाध्या**योदयविजय**गणिशिष्य-मुनि**नन्दनविजय**विरचितं
सूरिस्तवशतकं
सम्पूर्णम् ॥

## ॥ ११. श्रीगुरुदेवस्तवनम् ॥

– श्रीविजयपद्मसूरिः

अर्हद्भास्करकेवलीन्दुविरहेऽस्मिन् भारते विश्वसत्-तत्त्वाविष्कृतितत्परः प्रविशदाकूतप्रकाशान्वितः ।
उद्दध्रे भविकान् भवान्धुपतितान् सद्देशनारज्जुतो, यस्तं मद्गुरुनेमिसूरिममदं वन्दे मुदाऽहर्निशम् ॥१॥
प्राप्यन्तेऽनुपमोत्सवाः प्रतिदिनं भव्यैर्यदाख्यास्मृतेः, सच्चारित्रपवित्रदेहमसुभृद्भद्रङ्करं सर्वदा ।
कर्मस्तम्बलवित्रसाम्यनिलयं प्रस्थानसंसाधकं, तं श्रीमद्गुरुनेमिसूरिमनिशं ध्यायामि सद्भावतः ॥२॥
योगक्षेमकरं सदैव विधिना नव्यार्थलब्धार्थयोः, प्राप्तित्राणविधौ क्रमेण भुवने दीपं प्रदीपाननम् ।
पञ्चाचारप्रपालनैकनिपुणं श्रीमत्तपागच्छपं, निस्तन्द्रं प्रगुरुं नमामि सततं श्रीनेमिसूरीश्वरम् ॥३॥
सत्त्वे यस्य निरस्तवीर्यप्रसरास्तीर्थान्वयास्तस्करा-स्तत् सत्यं खलु भास्करे समुदिते चन्द्रादितेजः कियत् ।
सौभाग्यादिगुणावलिं गणयितुं शक्तो न वाचस्पति-स्तं चिन्तामणिजित्वरं प्रणिदधे श्रीनेमिसूरीश्वरम् ॥४॥
यो निर्मान्यपि मान्यकोविदकुलैः सन्मानितां प्रापितो, योऽनङ्गारतिकारकोऽपि विमलानङ्गार्थसंसाधकः ।
निःसङ्गोऽप्युपकारदीनकरुणाद्यैः सद्गुणैः सङ्गवान्, तं कुर्वे प्रणिधानगोचरमहं श्रीनेमिसूरीश्वरम् ॥५॥
कालेऽस्मिन् गणधारिगौतम इव प्रौढप्रभावाञ्चितो, भूपालेभ्यगणैर्गुणैकरसिकैरिज्योऽपि नम्रश्च यः ।
आयोपायविचक्षणः श्रमणसङ्घापायनिस्फेटक-स्तं वन्दे ममतावितानरहितं श्रीनेमिसूरीश्वरम् ॥६॥
न्यायव्याकरणादिबोधकलिता यस्य प्रभावाद् ध्रुवं, सम्यग्दृष्टिमहाव्रतादिसहिता दीनानुकम्पाभृतः ।
सप्तक्षेत्रधनव्ययादिनिरता जाता ह्यनेकेऽङ्गिन-स्तं भक्त्या सततं मुदा प्रणिदधे श्रीनेमिसूरीश्वरम् ॥७॥
विज्ञातः स्वपरार्थशास्त्रविसरो येनाऽऽशु बुद्धेर्बलाद्, यः पञ्चातिशयैर्युतोऽत्र जयति स्थानाङ्गपाठानुगैः ।
चित्तं सद्गुणनिर्गुणेऽपि समतां यस्याऽन्वहं सङ्गतं, नित्यं सोऽपि तनोतु मङ्गलततिं श्रीनेमिसूरीश्वरः ॥८॥
प्राक् पर्वण्यपि यो बभूव सबलो नैकाशनेऽपि व्रते, सञ्जातोऽखिलशास्त्रयोगकुशलो यस्याऽनुभावादहम् ।
सिद्धान्तार्थरहस्यमप्यवगतं भक्त्या मयाऽन्तःस्थया, तं नौमीप्सितदानकल्पविटपिश्रीनेमिसूरीश्वरम् ॥९॥
वक्तुं शक्तिमती न मेऽपि रसना यस्योपकारावलिं, ध्येयो यो मयि निर्गुणेऽपि प्रगुणो भद्रोन्नतौ सर्वदा ।
आत्मोद्धारक एक एव मम सोपाधेर्भवाम्भोधित-स्तीर्थोद्धारपरायणो जयतु स श्रीनेमिसूरीश्वरः ॥१०॥

## ॥ १२. औदासीन्याष्टकम् ॥

— प्र. मुनिश्रीयशोविजयः

अर्हन्तोऽपि प्रौढशक्तिप्रतापा, जन्तुं मन्तुव्याप्तदेहप्रसारम् ।
धर्मे योक्तुं नैव शक्ता बभूवुः, कस्तर्ह्यत्राऽभाव्यभावे समर्थः ॥१॥ (शालिनी)

मिथ्यावादी वावदूको विलापी, विख्यातोऽभूत् स्वीयशिष्यो जमालिः ।
वीरो धीरो विश्वविख्यातकीर्ती, रोद्धुं बोद्धुं नैव शक्तोऽभवत् तम् ॥२॥

इन्द्रैर्विज्ञप्तोऽवितुं नैव शक्तः, प्राणान् प्राज्ञो विश्ववीरोऽपि विश्वे ।
सर्वर्द्धीनां स्थानमत्रैव धीर-स्तस्मादौदासीन्यभावं भजन्तु ॥३॥

लोकाः शोकव्याप्तचित्ताः समन्ताद्, भिन्नां श्रद्धां भावयन्तश्चरन्तः ।
कर्मोद्विग्नाः सर्वकालेऽतिदीनाः, औदासीन्यान्नाऽन्य इत्यस्त्युपायः ॥४॥

ऋद्ध्या पूर्वं कान्तशान्तिप्रकारात्, तानं तानं दीप्तिमन्तः समन्तात् ।
भ्रामं भ्रामं नैव भिक्षाः स्वदोषात्, प्राप्यन्ते तैस्तद्विचारं कुरुध्वम् ॥५॥

कारं कारं पुण्यलक्ष्म्या व्ययं ये, हारं हारं सर्वमोहान्धकारम् ।
तारं तारं सर्वशो भावकीर्णा, दीर्णा जीर्णा नैव ते भीतितीर्णाः ॥६॥

भ्राता त्राता नैव पाताऽभिपुण्यै-र्माता सातां नैव कर्तुं समर्थाः ।
भव्या नव्याः श्रेयगेयं तु तस्माद्, वीरं धीरं सर्वदा संश्रयन्तु ॥७॥

पुण्या गुण्याः प्राणतोऽपि प्रियं तं, कायामायाहीनरूपं त्वरूपम् ।
संसाराब्धेस्तीर्णमेनं शशीव, शश्वत् सौम्यं वीरधीरा धरन्तु ॥८॥

(नन्दनवनकल्पतरुः - ७)

## ॥ १३. श्रीधर्माष्टकम् ॥

– प्र. मुनिश्रीयशोविजयः

धर्मात् सद्गोत्रजन्मा भवति नु भविकः क्षेमकारी जनानां,
धर्माद् धान्यैश्च शर्मावह इह भवति प्राणभृद् विश्वविश्वे ।
धर्माद् ध्यानैः सुकर्माग्रग इह गदितो गुण्यपुण्याग्रणीश्च,
धर्माद् धन्यः सुवर्मावह इह भवति त्राणशक्तो नराणाम् ॥१॥ (स्रग्धरा)

धर्माद् बाल्येऽपि लाल्यो भवति तु सततं पालनीयो जनानां,
धर्माद् दावेऽपि विष्टो भवति धृतिगतो भ्रान्तिभित् कान्तिधारी ।
धर्मात् पुण्योऽपि गुण्यो नमति च सततं पादपद्मं परत्र,
धर्माद् दीनोऽपि लीनो भवति नु भुवने स्वर्गसौख्ये सदैव ॥२॥

धर्माद् दुःखेऽपि लीनो भवति नु सततं शर्मसीमावलीनो,
दीनो मीनोऽपि धीनो धरति हि धृतितः सर्वसम्पत्तिपत्तिम् ।
धर्माद् ध्यानेऽपि गाने भवति च सततं धीधनो धैर्यधारी,
धर्माज्ज्ञानेऽपि ताने इह हि वितनुते बुद्धिवृद्धिं विविद्वान् ॥३॥

धर्माद् दुःखस्य धारा भवति न हि पुनर्दुःखकारा नराणां,
धर्माद् दारा न कारागृहमिव भविनामत्र विश्वेऽपि विश्वे ।
धर्माद् धीशस्य धीरस्य च न हि भवति व्याघ्रवर्गोऽपि भीकृद्,
धर्मात् स्फारा च सारा सततमिह सतां सर्वसम्पत्तिसत्तिः ॥४॥

धर्माद् धैर्यधरो वरो हि भवति श्रेयस्करोंऽहोहरो,
धर्माद् रूपमनोहरो धनधरो धर्म्येषु धीरो नरः ।
धर्माद् वीरतरो विपत्तिहरणो भद्रङ्करो भीहरो,
धर्माद् भाग्यविभूतिभूतिवितरो विद्वद्वरोऽयं नरः ॥५॥ (शार्दूलविक्रीडितम्)

धर्माद् वर्णनपात्रमत्र भवति श्रेयस्सुगात्रस्तथा,
धर्मात् सर्वनरा वराः प्रतिदिनं ध्यायन्ति सद्ध्यानतः ।

धर्माच्चैव नरैर्वरैस्तु सततं स्वाराधनीयो धनी,
धर्माद् धर्मधुरन्धरस्त्विति जनाः संवर्णयन्ति क्षितौ ॥६॥

धर्माद् धर्मकथाप्रथासु कुशलो धर्माच्च नीरोगको,
धर्मान्मानधरो वरो भयहरो भीष्मे भवाम्भोनिधौ ।
धर्माद् दाढ्र्यधरो वरो गतदरो भव्योऽतिनव्यो नरो,
धर्मात् सर्वसुशर्मवर्मकरणो धीमान् सदा धर्मतः ॥७॥

धर्माद् धर्मकरो वरो ननु नरः सन्नीतितः स्फीतिभूत्,
धर्मात् तारतरो वरो भवति सुस्फूर्तिप्रतानो नरः ।
धर्माद् दानदयादमेषु हृदयं देदीयमानो द्रुतं,
धर्मात् तापततिप्रतानहरणः सौम्यः शशीव द्रुतम् ॥८॥

(नन्दनवनकल्पतरुः - ६)

## ॥ १४. वैराग्यविंशतिः ॥

– प्र. मुनिश्रीयशोविजयः

मदज्वालामाला दहति हृदयं मे प्रतिदिनं, तथा क्रोधो योधो दृढतरशरान् मुञ्चति परान् ।
पुनर्मायाच्छाया त्यजति न तु मां दुर्गतिततिः, पराधीनो दीनो विभुचरणमेवेति शरणम् ॥१॥ (शिखरिणी)
तपस्तप्तं दत्तं विविधमपि दानं न सफलं, न तद् ध्यानं ज्ञानं प्रसरति न यत्र प्रतिदिनम् ।
नृणां भव्यो नव्यो विविधशमसारः सुखकरो, जिनैः ख्यातः प्रातः परमतरवैराग्यविषयः ॥२॥
गुरोर्भक्तेः शक्तेर्न फलमपि भव्यस्य भवति, पुनर्ज्ञेया मेया वृततरविविद्याऽपि विफला ।
तदा दान्तिः क्लान्तिप्रतिपतनकारे न कुशला, यदि त्राता भ्राता भवति न च वैराग्यविषयः ॥३॥
पिता माता भ्राता भवति न च पाताऽपि भविनां, सुहृद् वा दुर्हृद् वा न हि हितकरो भव्यभविनाम्।
न कोटीशो धीशो भवति धृतिदो दीनभविनां, जिनं धीरं वीरं विषयवियुतं तं त्विह विना ॥४॥
सुधासाराकारा भवति भविनां बाह्यदृशिनां, सदाऽन्तर्दृष्टीनां रुधिररसमूत्रादिमलिना ।
कटाक्षैर्या लक्षैर्जडमतिजनानन्दकरणा, न सा कान्ता कान्ता भवति विबुधानां प्रतिदिनम् ॥५॥
स्तनौ पीनौ लीनौ कनककलशौ चेति गदितौ, मुखं श्लेष्मावासं तदपि शशभृत्तुल्यमुदितम् ।
क्षरन्मूत्रक्षुण्णं करिवरकराकारजघनं, कविक्रूरैः काकैरिति तु गुरुता तत्र गदिता ॥६॥
त्रिधा-तापार्त्तानां प्रकटपटुतातो विरहिणां, न देवेन्द्रश्चन्द्रश्चतुर इह चित्तेषु तनुते ।
सुकौशल्यं शल्यं विविधमिह देहेषु दधतां, जयत्येकश्छेकः सुरमणिरिव श्रीजिनपतिः ॥७॥
इह द्वेषक्लेशक्वथितमतयः केऽपि कृतिनः, पुनः केचित् किञ्चिच्चितिविरहिता मूढमतयः ।
अहो ! दीना लीना दुरिततितिदोषेषु सतत-मसारे संसारे निजमपि हितं बिभ्रति नहि ॥८॥
यदा दीर्णे जीर्णे रुचिरिह जनानां परवशे, सुखे दुःखैर्मूर्खैरभिमततया संस्थितवति ।
तदा लिप्ते क्षिप्ते न हि भवति शान्तिः क्षितितले, यतो द्विष्टैः श्लिष्टैर्न विषमविषैर्वाभिरिह सा ॥९॥
न कर्ता हर्ता वा भवति दुरितानां प्रतिदिनं, सदा त्रस्यद् भ्रश्यद् दुरितदवदोषं दरहरम् ।
विनेशं विश्वेशं प्रकटमहिमादीप्तयशस-मिति ध्येयं गेयं श्रयत शरणं श्रीजिनपतिम् ॥१०॥
विना दीना मीना व्यपगतजले व्याधिकलिता, इव त्राता भ्राता भवति भविनामन्य इह तत् ।
सुवैराग्यैर्भाग्यैरिह निहततापैरपि परं, न तस्मादस्माकं भवति हितदं वीतविषयैः ॥११॥
दिने दृष्टं पीने परतरदिने तन्न भवति, निशायां रम्यायां पतितमपि न प्रातरवति ।
न पूर्वाह्णप्राप्तं भवति परमध्याह्नविषय-मनित्यं तन्नित्यं विविधविषयान् विद्धि विबुध ! ॥१२॥

सदा दाहः कारागृहमिह जनानां क्षितितले, धने चित्ताक्रान्ता जगति तु वने यान्ति विजने ।
कुपात्राः क्रोधार्त्ता विदधति विरागं भववने, सुशस्त्रीणां स्त्रीणां भयत इह चेतोभ्रमभृतः ॥१३॥
न पुत्री स्वीकर्त्री जनकगदितं नीतिशतकं, न च भ्राता त्राता दुरितदलितानां भवभृताम् ।
न माता वा सातामिह भवभृतां कर्तुमुदिता, न जाने क्व स्थाने भवति भविनामत्र सुसुखम् ॥१४॥
पिताऽस्ति भ्राताऽस्ति प्रियतर इहाऽस्ति प्रकटतः, सुपुत्रः सर्वत्र पुनरपि च पुत्री गुणवती ।
धनं धान्यं मान्यं प्रथितमिह पुण्यावहतया, परं कल्लोल्लोलोदितजलविलोलोपममिदम् ॥१५॥
प्रचण्डाधिर्व्याधिर्दहति हृदयं भव्यभविनां, पुनर्लोकाश्शोकाकलितकृतयः केऽपि कुटिलाः ।
न भव्या वा नव्या इह सुखलवं बिभ्रति परं, भवेऽस्मिन् दुर्दावे ललितहृदया दीनमनुजाः ॥१६॥
पुनः केचित् काञ्चिद् दिशमिह गता दुःखदलिता, परे प्राज्ञाः पापैरविरतिविहीना वनतले ।
कुटुम्बक्लेशेन क्वथितमतयः केऽपि कुहरे, इति स्वान्ते ध्वान्ते सति न भवति प्राज्ञपटुता ॥१७॥
पुरा पुण्यो गुण्योऽभवदिह नृपालोऽपि सगरः, सदा चक्री वक्रीकृतविविधनेत्रः क्षितिपतिः ।
परं पुत्रत्राणाप्रभुरिह सदा दुःखदलितो, गतस्त्राता भ्राता इति भवति नैवाऽत्र भविनाम् ॥१८॥
परा लक्षा दक्षा दधतु दमनं देहदहनं, असारा साऽपारा भवतु भविनां भीतिभजना ।
जिनोक्तानां तासां वचनरचनानां प्रभजना, यदाऽऽस्थाऽपास्ता चेद् भवति भववैराग्यविषये ॥१९॥
दधद्द्योतोद्द्योतोद्दलिततमसं दर्पदलनं, जिनं श्रेष्ठं ज्येष्ठं झगिति जनजन्मोज्झसनकम् ।
सदा त्रस्यद् भ्रश्यद् भवभयभरं भाविभरितं, भजन्तु भ्राजन्तु प्रभजनजयाच्छ्रीजिनपतेः ॥२०॥

* * *

परे पापाः सर्पा इव विषमवेगैर्विदधते, सदा दुःखज्वालां न हि हृदयशालां तदपि ये ।
पुनश्चिन्ताक्रान्तां जगति कुरुते सूरिमहितः, स शं देयाज्जीयाद् वर**विजयनेम्या**ह्वयगुरुः ॥२१॥
निरारम्भो दम्भोद्दलनकरणः पापहरणः, पृथिव्यां पुण्यायां प्रथित इह पुण्यैः प्रकटितः ।
असौ सूरिः सूरीश्वरभृतपदाम्भोजकलितो, वरं भव्यान् नव्यान् सुखमिह सदैव प्रकुरुताम् ॥२२॥
सदा दक्षा रक्षाकरणविषये शासनतरोः, पुनर्मायाच्छायारहितहृदया दीनशरणाः ।
भवाम्भोधौ बोधौ विहिततरचित्ताश्च चतुराः, सुकौशल्याः शल्यादलनकरणे नेमिगुरवः ॥२३॥
लभेयं लोकेऽस्मिन्नतिविततदुःखैर्विदलिते, कथङ्कारं सारं जिनविहितधर्मं परमहम् ।
असौ नो चेच्चेतोवरतरविशुद्धिप्रणिदधो, जयत्येकश्लोकः स तु विजयनेमिर्यतिपतिः ॥२४॥
तपागच्छे स्वच्छे वरविजयनेम्याह्वयगुरोः, प्रतापाच्च व्यापात् समशशिसमस्फूर्तिकलितात् ।
सुवैराग्यैर्भाग्यैरिति च रचना रातु रचिता, सदा दान्ति शान्ति दलिततमसां दीर्घदृशिनाम् ॥२५॥
वैराग्यविंशतिरिति स्फुटमेव विज्ञै-र्वाच्या विभेदकरणी हरणी मदस्य ।
यस्माद् भवेऽत्र भविनां भवनाशिनीयं, वैराग्यवासितविशिष्टविभूतिभाजाम् ॥२६॥ (वसन्ततिलका)

॥ इति श्रीमत्तपागच्छाचार्य-चारित्रचूडामणि-श्रीविजय**नेमिसूरी**शवर्यचरण-
चञ्चरीकायमाण-प्रवर्तक**यशोविजय**विरचिता वैराग्यविंशतिः समाप्ता ॥

(नन्दनवनकल्पतरुः - ६)

## ॥ १५. श्रीमङ्गलकुलकम् ॥

— श्रीविजयपद्मसूरिः

वंदिय वीरजिणिंदं, महोवयारीसणेमिसूरिपयं ।
मंगलहियसिक्खाए, सुहट्ठगं कुणमि संतिदयं ॥१॥ (आर्यावृत्तम्)
भीमभवोयहिमज्झे, जीव ! तए समणुपत्तमुण्णइयं ।
मणुयत्तं संपत्तो, तत्थवि जिणरायपण्णत्तो ॥२॥
धम्मो तिउडीसुद्धो, सग्गपवग्गप्पहाणसुक्खदओ ।
ता वज्जिऊण मोहं, भव्वा ! धम्मे समुज्जमह ॥३॥
मंगलियचउक्कमिणं, णिच्चं समरंतु संतचित्तेणं ।
अरिहंतसिद्धसाहू-धम्मो इय मंगलचउक्कं ॥४॥
बावत्तरिजिणथवणं, कुणंतु भूयाइ कालभेएहिं ।
विहरंते भगवंते, वंदंतु पमोयरंगेणं ॥५॥
सासयजिणयचउक्कं, आईसरपुंडरीयगणणाहं ।
सिरिवद्धमाणगोयम-जुयलं पणमंतु भावाओ ॥६॥
अप्पियसिक्खं सिट्ठं, धारिज्जा हिययगेहमज्झम्मि ।
चिच्चा पमायसंगं, नियगुणरत्तो हविज्ज सया ॥७॥
परभावा दुक्खदया, विसया विसया ण मुक्खविग्घयरा ।
जीवियरूवं चवलं, जोवणदव्वाइ चवलाइं ॥८॥
चवलं चेव सरीरं, सामित्तं कम्मजण्णसुहदुक्खं ।
अचलं धम्मं णच्चा, जिणधम्माराहणा कज्जा ॥९॥
सिरिमंगलट्ठगमिणं, गुरुवरसिरि**णेमिसूरि**सीसेणं ।
**पउमे**णायरिएणं, रइयं सिरिसंघसेयट्ठं ॥१०॥

(जैन-सत्यप्रकाशः - वर्ष-५, अङ्क-९)

ꣻ✦ꣻ

# ॥ १६. श्रीसमाधिकुलकम् ॥

— श्रीविजयपद्मसूरिः

सिरिसिद्धचक्कथवणं, किच्चा सिरिणेमिसूरिचरणकयं ।
भव्वाणं सेयट्ठं, समाहिकुलं रएमि मुया ॥१॥ (आर्यावृत्तम्)
दुहभरिए संसारे, णत्थि सुहं सुक्खहेउवइरेगा ।
तहवि सुहं मोहाओ, भासइ भवभाविजीआणं ॥२॥
कडुओ णिंबो कीडो, तत्थ ठिओ मण्णए सुसाउ त्ति ।
णिंबसमो संसारो, कीडनिहो भवठिओ जीवो ॥३॥
आहिव्वाहिविसिट्ठो, कुडुंबचिंतग्गितावसंतत्तो ।
अगणियमरणकिलेसो, णो पावइ संतिलेसं पि ॥४॥
जीवो अणाइणिहणो, भवो तहा दुक्खरूवदुक्खफले ।
दुक्खाणुबंधभावो, तव्विच्छित्ती सुधम्माओ ॥५॥
असुहाणं कम्माणं, विलया संपायणं सुहम्मस्स ।
होज्ज विणासो तेसिं, तहभव्वत्ताइजोगाओ ॥६॥
सुकडाणुमोयणाए, चउसरणगमणकयाहगरिहाहिं ।
संपज्जइ सो जोगो, समाहिमरणं पि तेणेव ॥७॥
जिणसासणम्मि जे जे, सुहजोगा जिणवरेहिं पण्णत्ता ।
ते णं परंपराए, समाहिमरणं पि दिज्ज सुहं ॥८॥
णियतत्तं बहुगूढं, गुरूण पासम्मि विणयजोगेहिं ।
जाणिज्ज वियारिज्जा, गुणभरणं दोसपरिचायं ॥९॥
कुज्जा परमुल्लासा, सत्तियसंसाहणा णरभवम्मि ।
विसयकसायपसत्ति, हेया दुहय त्ति धारित्ता ॥१०॥
संसारम्मि विसारे, लहंति सिद्धिं न जे परिभमंते ।
ते तेसिं पावाओ, इय तच्चाएण मुत्तिसुहं ॥११॥
विविहेहिं दुक्खेहिं, पीडिज्जंते विसयसंगदोसेहिं ।
दुक्खविवागविवागे, पयंसिया भूरिदिट्ठंता ॥१२॥

दीसइ विसविसयाणं, वण्णाहिक्कं ति णज्जए तेणं ।
उवभुत्तं हणइ विसं, विसया णिहणंति सरणावि ॥१३॥
उप्पत्ती चिंताए, विसयाणं चिंतणं णिरोहिज्जा ।
सुक्खं परिचाएणं, भोगेहिं किं हविज्ज कया ॥१४॥
तुस्सइ किं कट्ठेहिं, अग्गी तह सायरो जलभरेहिं ।
एवमउलभोगेहिं, बहुदुहया भोगतण्हा वि ॥१५॥
रयणी वड्ढइ तिमिरं, जहेव तण्हा तहेव भोगाणं ।
रागाइदोस[सु]विदं, णिसाणिहा भोगतण्हाओ ॥१६॥
जेसिं हियए होज्जा, एसा ते दुट्ठपावकम्मेसुं ।
नियमाए पयट्टंते, अकज्जपरिवड्ढिणी तण्हा ॥१७॥
सद्दाइयभोगेहिं, समिउं कंखंति बालिसा तण्हं ।
जलगयससहरबिंबं, गहिउं कंखाइ सरिसं तं ॥१८॥
अहमा मोहा तण्हं, किच्चा उण वल्लहं परिभमंते ।
वियडदुरंतभवम्मि, जम्मजरामरणदुक्खसए ॥१९॥
दोसनियाणं णच्चा, तण्हं णिस्सारिऊण तणुगेहा ।
मणदारत्थगणं जे, कुणंति सब्भाविया भव्वा ॥२०॥
ते संणासियविग्घा, वियलियपावा लहंति मुत्तिसुहं ।
किच्च प्पाणं सुद्धं, एयं सुहजीवणं सिवयं ॥२१॥
कोहा निरयावासो, माणा कुलबलसुयाइपरिहाणी ।
मायाए इत्थित्तं, तिरियत्तं णेव पुरिसत्तं ॥२२॥
लोहा धम्मविणासो, विसयकसाया बलिट्ठतेणनिहा ।
संजमकरवालेणं, हणिज्ज खिप्पं जया जीओ ॥२३॥
ता णिब्भयसब्भावो, संपाउणए सकज्जसंपत्ती ।
पज्जंतसमाहीए, मरणं होज्ज प्पसंतिदयं ॥२४॥
सम्मद्दंसणनाणं, वरचरणं दुल्लहं वियाणित्ता ।
तिण्हं हु साहणेणं, सहलो निभवो न यण्णेहिं ॥२५॥
एयस्स भावरंगा, पढणायण्णणविसुद्धजोगेहिं ।
संसाहियसीयविही, हवंति संतारगा भव्वा ॥२६॥
जिणसासणम्मि णिच्चं, सिरिगोयमजंबुथूलिभद्दमुणी ।
संघगिहे सुहणंदी, रिद्धिपवुड्ढी कुणंतु सया ॥२७॥
एयं समाहिकुलगं, गुरुवरसिरि**णेमिसूरि**सीसेणं ।
**पउमे**णायरिएणं, **कप्पडवाणिज्ज**वरणयरे ॥२८॥
रसणिहिणवससिवरिसे(१९९६), सिरिणेमिजिणंदजम्मजच्चदिणे ।
विहियं सपरहियट्ठं, कुणउ सयलसंघकल्लाणं ॥२९॥

(जैन-सत्यप्रकाशः - वर्ष-६, अङ्क १-२)

## ॥ १७. श्रीदानकुलकम् ॥

—श्रीविजयपद्मसूरिः

सुमरिय सिरिसिद्धपहुं, वंदिय गुरुणेमिसूरिगुणनियरं ।
सपरोवयारदक्खं, कुणेमि सिरिदाणकुलगमहं ॥१॥
कहिओ पहुणा धम्मो, चउहा दाणाइ मुक्खभेएहिं ।
पढमं तेसुं दाणं, भणियं जाणिज्ज तद्धेउं ॥२॥
तवसीलभावणाहिं, कल्लाणं साहगस्स णण्णेसिं ।
दाणा दायगगाहग-णुमोयगाणं हियं तिण्हं ॥३॥
वसुदेवदेवईए, पुत्तो परिचत्तसुक्कदिव्वसुहो ।
कंसस्स गिहे जाओ, वुड्ढिगओ गोउलम्मि तहा ॥४॥
णीलो दसधणुदेहो, गोयमगुत्तोऽद्धचक्कि कण्हो से ।
सोलस कुमारभावे, छप्पण्णद्दाइं मंडलियं ॥५॥
अडवीसुत्तरनवसय-वरिसाइं दारियाउरिं रज्जं ।
पालित्ता कोसंबी-महाडवीए य मरिऊणं ॥६॥
उप्पण्णो से निरए, तइए पहुणेमिबंधवो कण्हो ।
सम्मत्तगुणा पुव्विं, बद्धाउत्ताउ तब्भाऊ ॥७॥
रामक्खो बलदेवो, जिट्ठो वसुदेवरोहिणीतणओ ।
पंचमसग्गस्स सुहं, चिच्चा जाओ सुपुण्णजुओ ॥८॥
बारससयवासाऊ, अणुमरणा कण्हवासुदेवस्स ।
णेमिजिणिंदुवएसं, सोच्चा वेरग्गमावण्णो ॥९॥
संपण्णो साहुत्तं, अडवीनिवसणकउग्गसुहनियमो ।
विहरंतो संपत्तो, पारणसमयम्मि वरसमओ ॥१०॥
रहगारस्स समीवे, सुपत्तदाणुज्जुयस्स भव्वस्स ।
दायगगाहगकिरियं, अणुमोएए मिओ मोया ॥११॥

धण्णोऽयं कयपुण्णो, रहगारो देइ जो महादाणं ।
होंतोऽहं जइ मणुओ, देंतो दाणं तया मुइओ ॥१२॥
एत्थंतरम्मि पुण्णं, आऊ तिण्हं पि बंभदेविड्ढिं ।
पत्ता ते तमिणं ता, चउण्हमाइम्मि संकहियं ॥१३॥
हाणी सीलाईणं, जाया कमसो ण दाणमाणस्स ।
उसभेणं जं दिण्णं, सव्वेहिं जिणेहिं तम्माणं ॥१४॥
दाणं ममयाहरणं, सुग्गइसंपायणं महोदययं ।
जसकित्तिविजयसंतिं, देइ कुणइ वेरविहवणं ॥१५॥
कुवियं व सव्वकट्ठं, णो तेसिं सम्मुहं वि पासेइ ।
जे देन्ति सुपत्ताणं, दाणं हिट्ठेण हियएणं ॥१६॥
दासि व्व सिरी गेहं, पयवडिया णो चएइ परितुट्ठा ।
सोहग्गाइयसुगुणा, देहं मिल्लेइ णो तेसिं ॥१७॥
तिण्णि गई विक्खाया, धणस्स दाणं च भोगणिण्णासा ।
सहाणभोगवियलं, दविणं होज्जा विणासरिहं ॥१८॥
चउरो धणदायाया, धम्मऽग्गी भूवतक्करा बंधू ।
चउसु वि जिट्ठो धम्मो, जइणो तस्सावमाणाओ ॥१९॥
कुप्पंति तओ तेणं, धणविणिओगो करिज्ज जहसत्तिं ।
सत्तसु खित्तेसु मुया, अणिच्चयाभाविभव्वेहिं ॥२०॥
जिणगेहबिंबनाणं, चउविहसंघो त्ति सत्तखित्ताइं ।
सुहखित्तम्मि व बीयं, होज्ज धणं सहलमेएसुं ॥२१॥
वज्जिदनीलरिट्ठं, जणंककक्केयणाइरयणाणं ।
ससिकंतविद्दुमाणं, कंचणरयओवलाणं च ॥२२॥
चंदणदंताईणं, तहेव वरमट्टियाण जिणपडिमा ।
कारेंति महुल्लासा, धण्णा धम्मिट्ठधणिभव्वा ॥२३॥
ते य पइट्ठावेंते, सुहदविणवएहि सूरिहत्थेणं ।
विहिणंजणाइएणं, सग्गपवग्गाइ साहिंति ॥२४॥
जद्दिण्णसंजमाओ, आहारत्थी वणीमगो दीणो ।
एगम्मि अहोरत्ते, संपइ भूमीसरो जाओ ॥२५॥
पुव्वभवीयगुरुं से, उज्जेणीए सुहत्थिसूरिं तं ।
पासित्ता जाइसरो, पुच्छइ सामाइयस्स फलं ॥२६॥
गुरुकहियं रज्जाइ, नाणा मण्णिय कहेइ बहुमाणा ।
एयं तुम्ह पसाया, मह जुग्गं कज्जमुवइसह ॥२७॥
सोच्चा नरवइवयणं, धम्मुवएसं कुणंति तत्तो से ।
धम्मिट्ठो संजाओ, करेइ जिणधम्मकज्जाइं ॥२८॥

नूयणजिणगेहाणं, सवायलक्खं तहेव जिण्णाणं ।
जिणगेहाणुद्धारे, छत्तीससहस्सपरिमाणे ॥२९॥
कारइ सवायकोडिं, जिणबिंबाणं च पित्तलमयाणं ।
पणनवइसहस्साइं, पहूयवरदाणसालाइं ॥३०॥
एवं तिखंडभूमिं, जिणगेहालंकियं करेइ निवो ।
जिणसासणिक्करसिओ, अणज्जदेसेऽवि सोहेइ ॥३१॥
पढमोऽत्थ चंदगुत्तो, तयणंतरबिंदुसारभूमिवई ।
तत्तोऽसोयकुणाला, पंचमनिवसंपई जाओ ॥३२॥
पहुवीरमुत्तिसमया, दुसए पणदसजुए य वरिसाणं ।
समइक्कंते मोरिय-रज्जस्साई समुप्पणा ॥३३॥
एयम्मि चेव समए, महागिरीणं जुगप्पहाणत्तं ।
संपइसमयं जाव य, तस्सुदओ हीणया तत्तो ॥३४॥
खित्तप्पहावगो सो, खंडियनिवईवि कुणइ धम्मिट्ठे ।
सिट्ठकुणालत्थूवं, तच्छसिलाए पकारवए ॥३५॥
धम्मपयारणमइणो, संभवए जम्मपभिइवरिसाणं ।
एवं माणं दुसया, तेवत्तरिसमहिया वीरा ॥३६॥
एक्कासीइजुयाइं, दुसयाइं तास मज्झयालम्मि ।
जम्मो जाओ हुज्जा, तईयगंथाणवयणमिणं ॥३७॥
इक्कासीइसमेए, दुसए विगए य वीरनिव्वाणा ।
उवएसा अज्जसुह-त्थीणं जइणो निवो जाओ ॥३८॥
रज्जाहिसेयकिरिया, तिसए एगाहिए य वरिसाणं ।
नवसंजुत्ते राए-सरो तिखंडस्स सो जाओ ॥३९॥
तक्कोडुंबियभव्वा, संजाया दिक्खिया महागुणिणो ।
धण्णं सलाहणिज्जं, जम्मि कुडुंबम्मि दिक्खा तं ॥४०॥
सत्तरसुत्तरतिसए, पत्तो सग्गं च थूलिभद्दस्स ।
दो सीसा अज्जमहा-गिरी सुहत्थी तहा अज्जो ॥४१॥
तेसुं सुहत्थिगुरुणो, दिक्खिगवीसाहिए य सयजुयले ।
समइक्कंतेऽद्दाणं, पणयालीसाहिए दुसए ॥४२॥
वरिसाणं संजायं, जुगप्पहाणत्तणं सुहत्थिस्स ।
तस्स करेणं जाया, अवंतिसुकुमालपव्वज्जा ॥४३॥
संभवइ तीइ समओ, दुसया तेवत्तरिप्पउत्ताओ ।
दुसयं एक्कासीइं, जा ताणं मज्झयालम्मि ॥४४॥
गच्छं समप्पिऊणं, सुप्पडिबद्धस्स सुट्ठियस्स तहा ।
एगणवइजुयदुसए, छद्दिणछम्मासससंजुत्तं ॥४५॥

आउं परिपालित्ता, वरिससयं से सुरत्तमावण्णो ।
कोडियगच्छुप्पत्ती, तिसए सिरिवीरनिव्वाणा ॥४६॥
पणवीसड्ढसयंगुल-मियणेमिजिणिंदबिंबमुण्णइयं ।
सिरिहेमसूरिवयणा, कुमारपालेण कारवियं ॥४७॥
चउवीसा चउवीसा, रयणाइमयाउ भव्वपडिमाओ ।
कारविया खणियत्तं, धणस्स णच्चा महुल्लासा ॥४८॥
गुणिवत्थुतेयपाला, सवायलक्खं पहूण पडिमाणं ।
कारावीअ तईया, अंगीभूसापइट्ठाई ॥४९॥
रज्जावत्थासरणे, जुत्तं गी भाववुड्ढिथिज्जयरी ।
चिंतामणि व्व पूया, दुहावहा सग्गमुत्तिदया ॥५०॥
अच्चा न विणाहारं, होज्जा पडिमाण तं जिणगिहाइं ।
णायागयधणधणिया, कारिंते ते दुहा भणिया ॥५१॥
सल्लाइं सोहित्ता, जयणाए सिप्पिसुत्तहाराई ।
कारेंति तोसिऊणं, अज्जा भरहाइभूयनिहा ॥५२॥
सोवण्णकुट्टिमयले, रयणसिला जोइऊण ठावेते ।
सोवाणभव्वसेढी, मणिमयथंभे पदिप्पंते ॥५३॥
वरवंदणमालाहिं, रयणमयाहिं जिणिंदनिलयाइं ।
सोहाविंति विसिट्ठा, ठवेंति थंभेसु पुत्तलिया ॥५४॥
भव्वा दसंगधूवा, डहंति भागेसु तत्थ विविहेसुं ।
डड्ढं ते गच्छंता, अथिरा मेह व्व दीसंते ॥५५॥
सद्दं कुणंति मोरा, ते दट्ठूणं तहेव वाअंति ।
चउविहवरतूराइं, विविहपयारोहललियाइं ॥५६॥
उल्लोए वरगुच्छा, मुत्ताहलपंचवण्णकुसुमाणं ।
सोहंते चित्ताइं, कल्लाणगतित्थपमुहाणं ॥५७॥
सिहरग्गझया लोयं, बोल्लावेंति व्व नाहणमणट्ठं ।
अच्छेरागिट्ठसुरा, कुणंति संगीयमुल्लासा ॥५८॥
गंधव्वाणं गीया-भिणयाणि मणोहराणि सोहंते ।
नियगुणसुद्धिफलाइं, हवंति पेक्खगभविणराणं ॥५९॥
ताइं बंधावेंते, गिरिउरगामाइपुण्णखित्तेसुं ।
परभवसंबलमेवं, धणियणरा समवगच्छंते ॥६०॥
कट्ठाइमंदिराइं, बंधाविंतियरमाणवा विहिणा ।
तेहिं वि विउलपुण्णं, इगपुप्फारोहवहुपुण्णा ॥६१॥
मंदिरनिहालणट्ठं, निवपमुहा दिंति गामखेत्ताई ।
इय जिण्णुद्धारोऽवि य, तत्तो सड्ढाण महियफलो ॥६२॥

सिद्धायलाइयथले, भरहेणं ताणि कारियाणि मुया ।
सत्तुंजयमाहप्पे, धणेसरायरियवयणमिणं ॥६३॥
आवस्सयम्मि वुत्ता, पासाया सेणिअेण कारविया ।
गोभद्दजिणाययणं, चरिए सिरिसालिभद्दस्स ॥६४॥
निम्मविओ नियहम्मे, पहुपासाओ पहावईइ वरो ।
आवस्सयम्मि भणिओ, वग्गुरपासायवुत्तंतो ॥६५॥
संपइजावडसमरा, कम्मासामंतिविमलधण्णासा ।
आमनिवइसिद्धाई, जिणगिहकारावगा एए ॥६६॥
पेहडनाहडमंती, कुमारपालाहडाइललियाई ।
धणितेयवत्थुपाला, नयरिब्भा संतिदासाई ॥६७॥
तह हत्थिसीहसेट्ठी, मणसुहमाणिक्कलालकम्मिंदू ।
लच्छीभइणीपमुहा, एए जिणरोहनिम्मवगा ॥६८॥
आमकुमारनरेसा, वब्भट्टामच्चविक्कमा भीमो ।
अंबडमणसुहपमुहा, जिण्णगिहूद्धारगा एए ॥६९॥
मायरतित्थाईणं, धणिजमणाभाउसेट्ठिपमुहेहिं ।
उद्धारो निम्मविओ, तेसिं सहलं धणं भणियं ॥७०॥
तत्थत्थ पईवनिहो, जिणागमो भावसुद्धिपवहदओ ।
दीवाइव रुवमाणो, भवाभिणंदीणमइदुलहो ॥७१॥
आगमबहुमाणाओ, तिउडीबहुमाणमित्थ होज्ज कयं ।
अहिओ केवलनाणा, मुणिभत्तनिदंसणा भणिओ ॥७२॥
सामाइएण सिद्धा, अणंतजीवा अइंदियपयासो ।
कालाइहेउदोसा, से विच्छिण्णोत्ति कलिऊणं ॥७३॥
विहिओ गंथारूढो, नागज्जुणखंदिलाइसूरीहिं ।
इय सड्ढा भत्तीए, पलिहाविंति प्पमोएणं ॥७४॥
एवं कुणमाणाणं, णंधत्तजडत्तदुक्खमूयत्तं ।
सुयपाढगाइयाणं, भत्तीइ हवंति सिद्धीओ ॥७५॥
इक्कारसंगसवणं, पासे सिरिधम्मघोससूरीणं ।
विहियं सुयबहुमाणा, मंतीसरपेहडाईहिं ॥७६॥
आगमनिहिणो ठविया, भरुअच्छाईसु सत्त खित्तेसुं ।
इह दिट्ठंता णेया, कुमारपालाइभव्वाणं ॥७७॥
दव्वाइवियारेणं, संजमजुग्गा सयाइ वत्थूणं ।
चरणाहिलासितणया-इयाण हरिसेणदाणाओ ॥७८॥
निंदगनिवारणेणं, कुज्जा भत्तिं सुपत्तसाहूणं ।
इय साहुणीण णेया, पुच्छाहाराइजोगेहिं ॥७९॥

नियगेहासण्णगिहे, मज्जायासाहणे ठिइं दिज्जा ।
जं दुट्ठुप्पडियारो, थीहिं भत्तिं पि कारिज्जा ॥८०॥
संजमभाविसुयाई, दिज्जा संजमसिणेहभावाओ ।
थिज्जं तेसिं चरणे, कुज्जा सुहसारणाईहिं ॥८१॥
सिवमग्गसाहगावे, सुयाहिया नियमणम्मि मण्णिज्जा ।
एवं दोण्हं भत्ती, विण्णेया जिणपवयणुत्ता ॥८२॥
सङ्घस्स सङ्घसङ्घी, साहम्मित्तेण वण्णिया दोण्णि ।
दुलहो तेसिं संगो, दंसणसोहो महालाहो ॥८३॥
जम्मुच्छवाइसमए, भूसणपमुहाइ दिज्ज भत्तीए ।
नासिज्ज दुहं तेसिं, पुव्वठिइं वावि पाविज्जा ॥८४॥
सिढिले धम्मविहीए, कुज्जदढे सारणाइहेऊहिं ।
इय सावियाण णेया, भत्ती मह भावणागंथा ॥८५॥
पढमाणं भत्तीए, दोण्हं भद्दाइयाण दिठ्ठंता ।
संभवनाहाईणं, परूविया दुण्ह मंताणं ॥८६॥
एवं दाणपसंगे, पण्णत्तो सत्तखित्तसंखेवो ।
**भावणकप्पलया**ए, विवण्णिओ वित्थरो तेसिं ॥८७॥
पत्तापत्तविवक्खं, उवेक्खिऊणं दयाइ दाणंपि ।
कूवजलं व नियधणं, वियारिऊणं सया कुज्जा ॥८८॥
चित्तं वित्तं पत्तं, जोगो तिण्हं हविज्ज धण्णाणं ।
ते धण्णेसु वि धण्णा, दिंति सुपत्तम्मि हरिसंता ॥८९॥
एयं च लक्खिऊणं, वुत्ताइं भूसणाइ दाणस्स ।
तह पंच दूसणाई, तिण्णि पयारा पबंधेणं ॥९०॥
इह णो भण्णिज्जंते, उवएसतरंगिणीइ णायव्वं ।
सव्वं वित्थारभया, गंथस्स समत्तमिइ कुलगं ॥९१॥
मुत्ती णेव विणा तं, दाणं कस्सवि विलोइऊणमिणं ।
थोवाओऽवि हु थोवं, देयं जं तितयजुग्गत्तं ॥९२॥
किच्चुवइट्ठं पहुणा, तब्भवसिवगामिणा किवा निहिणा ।
विहिणा कुणमाणाणं, नियमा संसारविच्छेओ ॥९३॥
रिसिनिहिणंदिंदुमिए(१९९७), विक्कमसंवच्छरे पढमदियहे ।
सिरि**रायनयर**मज्झे, गुरुवरसिरि**णेमिसूरी**णं ॥९४॥
**पउमेणा**यरिएणं, सीसेणं दाणकुलगमप्पहियं ।
रइयं पढंतु भव्वा, लहंतु वरसुलहबोहित्तं ॥९५॥

(जैन-सत्यप्रकाशः - वर्ष-६, अङ्क ३-६)

## ॥ १८. तत्त्वामृतभावना ॥

– श्रीविजयपद्मसूरिः

प्रणम्य स्तम्भनाधीशं, नेमिसूरीश्वरं मुदा ।
कुर्वे स्वान्योपकाराय, श्रीतत्त्वामृतभावनाम् ॥१॥
उन्मीलिताऽऽत्मदृष्टिर्मे, श्रीजिनेन्द्रप्रसादतः ।
विभावतिमिरं नष्टं, तदद्याऽऽनन्दवासरः ॥२॥
फलितो धर्मकल्पद्रुः, प्रसन्नाः परमेश्वराः ।
यतोऽद्याऽऽत्मगुणारामे, विहरामि प्रमोदतः ॥३॥
दर्शनज्ञानचारित्रा-ऽऽराधनोत्साहदायकाः ।
सांनिध्याधायकास्तत्र, ये वन्दे तानहर्निशम् ॥४॥
स्वभावात् परनिष्ठासद्-दोषान् पश्यन्ति ये सदा ।
मध्यस्थभावना तेषु, द्वेषलेशोऽपि नाऽस्ति मे ॥५॥
समीहे भद्रमेतेषां, सद्दोषोच्चारकारिणाम् ।
मत्वोपकृतिमातन्वे, दोषशुद्धिं हितावहाम् ॥६॥
स्वचिन्ता हितदा तथ्या, परचिन्ता न शान्तिदा ।
उभयोर्हन्ति भद्रं सा, तत् सृतं परचिन्तया ॥७॥
एकोऽहं नास्ति मे कश्चि-न्नाऽप्यहं कस्यचिद् भवे ।
यन्मदीयं च मालिन्यं, तज्ज्ञेयं कर्मबन्धनैः ॥८॥
रागद्वेषाविति प्रोक्ते, कर्मबन्धनकारणे ।
सारल्य-तोषतः शीघ्रं, नश्यते रागबन्धनम् ॥९॥
क्षमा-नम्रत्वहेतुभ्यां, द्वेषनाशो भवेद् ध्रुवम् ।
रागद्वेषविहीनात्मा, नमस्यार्हः फलप्रदः ॥१०॥
ज्ञानदर्शनचारित्रै-र्युतोऽहं शाश्वतः सदा ।
द्रव्यार्थिकेन चाऽनित्यः, पर्यायास्थितिभावतः ॥११॥
देहे वर्णादयो धर्मा, नैते वर्त्तन्त आत्मनि ।
तस्मान्नैक्यं द्वयोरेव-मुच्चरन्ति मनीषिणः ॥१२॥

मया संयोगजन्याऽऽप्ता, दुःखश्रेणिर्भवे भवे ।
तेन संयोगसंसर्गं, व्युत्सृजामि त्रिधा मुदा ॥१३॥
संसारे ममताहेतुः, संयोगः परिहारतः ।
तस्य सौख्यं भवेत् सत्यं, प्रशमादिसमन्वितम् ॥१४॥
कदाऽहं समतालीनः, सर्वोपाधिविवर्जितः ।
तीर्थकृद्ध्यानसंपन्नो, भविष्यामि प्रमोदभाक् ॥१५॥
कोऽहं किं मे कथं वर्त्ते-ऽधुना मे कीदृशी स्थितिः ।
कः कालः कीदृशं क्षेत्र-मित्यालोचयति प्रधीः ॥१६॥
मेऽधुना मानसे कीदृग्, भाव आत्महितं कियत् ।
कृतं मयाऽवशिष्टं च, किमेतदवधारयेत् ॥१७॥
अनन्तशक्तिसंपन्नो-ऽप्ययमात्मा विमोहतः ।
भजते विविधं भावं, संसाराखेटकेऽनिशम् ॥१८॥
जीव ! जानीहि खल्वस्मा-दधमान्मोहपाशतः ।
नैकेऽङ्गिनो नारकत्वं, प्राप्तास्तत्त्यागता सुखम् ॥१९॥
महापुण्योदयेनाऽऽप्तो, नृभवो देवदुर्लभः ।
गतक्षणार्पणे नैव, कोऽपि शक्तो धनैरपि ॥२०॥
आसन्नसिद्धिकास्तत्र, लभन्ते धर्ममार्हतम् ।
यत्प्रभावेण सिद्ध्यन्ति, सिद्धाः सेत्स्यन्ति भाविनः ॥२१॥
नेहे विधर्मसाम्राज्यं, रङ्कत्वं धर्मसंयुतम् ।
वरं मन्ये यतो नाशः, तस्य स्याद् धर्मसाधनात् ॥२२॥
जीव ! केशाः सिता जाता, न जाता मतिशुक्लता ।
विषयेषु कषायेष्वा-सक्तिस्तन्मोहजृम्भितम् ॥२३॥
त्यक्त्वा तान् विषयादीन् ये, सिंहशूराः समाश्रिताः ।
सत्संयमं बाल्यकाले, वन्दे तत्पादपङ्कजम् ॥२४॥
संजातस्य ध्रुवं मृत्युः, चारित्रोत्कर्षशालिनाम् ।
प्रशस्यं मरणं प्रोक्तं, सर्वगोत्कर्षभूषितम् ॥२५॥
पावनं शासनं जैनं, पावनाशयशालिनः ।
समाराध्य समीहन्ते, भावतस्तद् भवे भवे ॥२६॥
आराधिता जिना देवा, भावतो गुरवोऽपि यैः ।
साधितो जैनधर्मश्च, तेषां मृत्योर्भयं कथम् ॥२७॥
पञ्चाऽपि विषयास्त्यक्ताः, कषाया यैर्विरागिभिः ।
क्षामिताः सकला जीवा, भाविता भावनाः शुभाः ॥२८॥
जिनागमाः समभ्यस्ताः, विधिना गुरुसंनिधौ ।
तत्प्रधानप्रयोगा ये, तेषां मृत्योर्भयं कथम् ॥२९॥

सत्पात्रेभ्यो ददानानां, दानं सद्ब्रह्मचारिणाम् ।
तपस्यासाम्ययोगानां, तेषां मृत्योर्भयं कथम् ॥३०॥
उद्दिश्याऽऽत्मानमाचार-साधनाऽध्यात्ममीरितम् ।
तत्र निश्चलचित्तानां, तेषां मृत्योर्भयं कथम् ॥३१॥
धर्मकर्त्ता गुरुर्वैद्यो, धर्मज्ञो धर्मदेशकः ।
सदौषधं मोक्षमार्ग-साधना ज्ञानपूर्विका ॥३२॥
पथ्यं सद्भावनायोगात्, त्रयाणां च प्रणश्यति ।
भावामयो मिलन्तु मे, त्रये एते भवे भवे ॥३३॥ (युग्मम्)
श्रुताभ्यासो नतिर्देवे, सत्कथाचार्यसङ्गतिः ।
दोषप्रकाशने मौनं, प्रिया वागात्मभावना ॥३४॥
[करुणा] गुणदृष्टिश्च, विंशतिस्थानसेवना ।
अन्तरालभवेष्वेते, संपद्यन्तां भवे भवे ॥३५॥
आत्मवादादिभिस्तत्त्वै-र्जयति जिनशासनम् ।
उत्कृष्टं सर्वधर्मेषु, साधकाः सन्तु निर्मलाः ॥३६॥
निर्लेपाः पद्मवज्जाता, अनन्ता अधुनाऽङ्गिनः ।
भवन्ति च भविष्यन्ति, जैनधर्मस्य साधनात् ॥३७॥
जैनधर्मो रत्नतुल्यो, धर्माश्चाऽऽन्ये न तादृशाः ।
यथार्थकरणं जैने, धर्मेऽन्यत्रैव भाषणम् ॥३८॥
जैनधर्मरताः सर्वे, भवन्तु सुखिनः सदा ।
मैत्रीप्रमोदकारुण्य-सन्माध्यस्थ्यान्वितास्तथा ॥३९॥
मङ्गलं तीर्थराजो मे, मारुदेवप्रभुस्तथा ।
शान्तिनेमिपार्श्ववीरा, देवाः कुर्वन्तु मङ्गलम् ॥४०॥
वर्षेऽत्र वैक्रमे श्रेष्ठे, निधिनन्दनवेन्दुगे(१९९९) ।
फाल्गुने सितपञ्चम्यां, ग्रामे **बोटाद**नामनि ॥४१॥
**नेमिसूरी**शशिष्येण कृतेयं **पद्म**सूरिणा ।
**लक्ष्मीप्रभस्य** विज्ञप्त्या, श्रीतत्त्वामृतभावना ॥४२॥ (युग्मम्)

(जैन-सत्यप्रकाशः - वर्ष-११, अङ्क-६)